विद्योदयो निराकुर्यादविद्यातिमिरं सदा॥

अथ केशवीया जातकपद्धतिः प्रौढमनोरमासहिता॥

सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः॥

प्रौ.म. श्रीकेशवोग्रहकौतुकादिगणितस्कन्धंप्रथमतोविधिवद्व्यवस्थाप्याधुनासंक्षिप्ताक्षरवृत्तैर्निबद्धांबहूर्थांसुलघुप्र
२ क्रियांजातकपद्धतिंचिकीर्षुर्जन्मजन्मान्तरार्जितदुरितोत्पन्नप्रत्यूहव्यूहनिरासेनग्रन्थंसमाप्त्यर्थंसमाप्तेऽपि
ग्रन्थेतत्प्रचयगमनार्थंशिष्टाचारपरिपालनेनशिष्यशिक्षार्थंचनमस्कारलक्षणंमङ्गलमाचरन्ग्रन्थारम्भंशार्दू
लविक्रीडितपूर्वार्द्धेनप्रतिजानीते॥ ॥नत्वाविघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्कुर्वेजात
कपद्धतिंस्फुटतरांहोराविदांप्रीतये॥ ॥अहंकेशवोजातकपद्धतिंकुर्वेइतिक्रियाकारकयोजना।अत्र
क्रियाबलादहमित्यध्याहारः।जातस्यबालकस्यप्राग्जन्मार्जितसदसन्मिश्रकर्मजनितशुभाशुभमिश्रफलनि
रूपकंशास्त्रंजातकंतस्यपद्धतिःक्षुण्णोमार्गः।सरणिःपद्धतिःपद्येत्यमरोक्तेः।एवंतांजातकपद्धतिंकुर्वेकरोमि।
किंकृत्वाविघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्नत्वा।विघ्नंपातीतिविघ्नपोगणेशः।यथामृगप्राणहरेसिंहे
मृगपतिप्रयोगोयथाचशकनृपप्राणहरेविक्रमादित्येशकनृपप्रयोगस्तथाविघ्नहरेगणेशेविघ्नपप्रयोगइति
ध्येयम्।शारदासरस्वती,अच्युतोविष्णुः,शिवोमहादेवः,ब्रह्माप्रसिद्धः,अर्कमुख्याःश्रीसूर्यादयोनवग्रहाः,तान्न रामः
मस्कृत्येत्यर्थः।नन्वन्यजातकपद्धतिषुसतीषुकिमर्थमयंग्रन्थःकृतइतिग्रन्थस्यास्यवैयर्थ्यप्रसङ्गापत्तिरित्याश २

श्रीगणेशाय नमः ॥ प्रौढमनोरमाटीकासहिता केशवीयपद्धतिः प्रारभ्यते ॥ आदित्यमज्ञानघनान्ध
कारच्छिदं मुदं संततमादधानम् । जगत्प्रसूतिस्थितिनाशहेतुं श्रीभास्करं भास्वररूपमीडे ॥ विघ्ननिघ्नमहं वन्दे वि
घ्नपं विबुधार्चितम् । यस्य स्मरणतः साध्यं सिद्धिं प्राप्नोति सत्वरम् ॥ श्रीकेशवार्यवचनानि जयन्ति तानि निर्दूषणा
नि बहलार्थसुपूरितानि । धन्यानि शिष्यजनबुद्धिविवृद्धिदानि स्वल्पाक्षराणि बुधतोषविधायकानि ॥ अपि स्फुर
त्पण्डितमण्डनेन प्रचण्डपाण्डित्यमखण्डियेन । ज्ञानाधिराजस्य गुरुं नृसिंहं प्रचण्डचण्डांशुमतिं तमीडे ॥ श्री
मच्छिवाख्यं गणितज्ञचक्रचूडामणिं सज्जनवृन्दवन्द्यम् । विदुर्विदं यं धिषणेन तुल्यं तं नौमि नित्यं धिषणाप्तिहे
तोः ॥ श्रीकेशवार्यैर्गगनाब्धि ४० वृत्तबद्धोदिता जातकपद्धतिर्या । तैरेव तस्या विवृतिः कृताऽस्ति परं न तत्राऽस्ति सु
युक्तिरुक्ता ॥ संप्रार्थितः शिष्यगणेन युक्तिः कार्याति वर्येति दिवाकरोऽहम् । सवासनां तद्विवृतिं करोमि यतो जनो मे स
कलोऽपि रज्यः ॥ यद्यप्यशक्या विवृतिर्विधातुं मयाऽजडेनामलकेशवोक्तेः । तथाऽपि कुर्वे शिवपादपद्मप्रसादतः
प्रौढमनोरमाख्याम् ॥ अथ श्रीकौशिकमुनिवरवंशोद्भवो परपारावारतीरनिकटवर्तिनन्दिग्रामनिवासस्कन्दम
तेश्वरसुन्दरचरणकमलयुगलभजनावाप्तसमस्तविद्यः सकलागमाचार्यवर्यः श्रीकमलाकरदैवज्ञनन्दनः

हिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्नामिधानस्त्वसौ होरान्योऽङ्ग॰विनिर्णयश्च कथितस्कन्धस्तृतीयोऽपरः
तस्मात्केवलहोराविदिन् ज्योतिःशास्त्राभिज्ञताव्यवहार इति सिद्धम्। अन्यथा गणितस्कन्धैकदेशकरणाभिज्ञेऽपि ग
णितस्कन्धसिद्धान्तज्ञताप्रसङ्गः स्यात्। होराविदामित्यनेन तु केवलजातकवि
दां त्रिस्कन्धज्योतिःशास्त्रविदां च प्रीतिजनकत्वमुक्तं भवति। त्रिस्कन्धज्योतिःशास्त्रविदां होराज्ञत्वात्। आचार्येणा
प्युक्तं ये ज्योतिर्विदस्ते एतद्धोराशास्त्रविदो भवन्त्येवेति। तस्माद्धोराविदामिति पाठः साधीयान्॥ अथोत्तरार्धेन ग्र
ह्यान्तरसाध्यामिति कर्तव्यतामस्त्वं लग्नसाधनं चाह॥ ॥ यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेद्योऽथ खेटाः
स्फुटा यत्नस्ते हि घटन्त उद्गमदृहास्तत्संसषङ्गः स च॥ १॥ अत्रास्यां पद्धतौ यन्त्रैः कृत्वा जन्मसमयः स्पष्ट
तरोऽतिसूक्ष्मो वेद्यो ज्ञातव्यः। यन्त्राणि तु श्रीभास्करेणोक्तानि। गोलो नाडीवलयं यष्टिः शङ्कु॰ घटी चक्रम्। चापं तुर्यं
फलकं धीरेकं पारमार्थिकं यन्त्रम्॥ एभ्यः समयज्ञानं तैरेवोक्तं विस्तरभयान्नात्र प्रतिपाद्यते। अत्रास्मिन् जन्मका
ले खेटाः साध्याः। खे आकाशे अटन्ति गच्छन्तीति खेटा ग्रहा इत्यर्थः। ननु मध्यमन्दस्पष्टभेदभिन्नत्वाद्ग्रहाः कीदृशाः सा
ध्या इत्यत आह। स्फुटा इति। फलादेशे स्फुटानामेव मुख्यत्वात् स्फुटा इत्युक्तं युक्तम्। तदुक्तं सिद्धान्तशिरोमणौ। या

कृत्वा ह। स्फुटतरामिति। अतिशयेन स्फुटेति स्फुटतरा तामतिलघुप्रक्रियामित्यर्थः। तथा चानेन विशेषणेन पूर्वैः
नीलकंठश्रीधरश्रीपतिपूर्वैरचितपूर्वपद्धतिभ्यो वैशिष्ट्यं द्योतितम्। तत्र तु सर्वं भावदृग्बलादिगणितजातं ब
नायासेन साधितमस्तीति भावः। अतो नवीनग्रन्थप्रणयनमाचार्यस्य युक्तमेव। केचित्तु स्फुटतरां प्रकटार्थामिति
व्याचक्षते तदयुक्तम्। नहि प्राचीनश्रीपत्यादिग्रन्थेभ्योऽत्र पद्यार्थः प्रकटः समुपलभ्यते। अतोऽस्मदुक्तव्याख्यान
मेव ज्यायो विशिष्टगुणाधायकत्वात्। अथ क्रियामात्रप्रवृत्तेः प्रयोजनपूर्वकत्वात् प्रयोजनमनुद्दिश्य न मन्दोऽ
पि प्रवर्तते, इति न्यायादत्र च तदनभिधाने प्रवृत्त्यनुपपत्तिरित्याशङ्क्य पद्धतिकृत्यां प्रवृत्तौ प्रयोजनमाह। होरावि
दां प्रीतय इति। होरां जातकं विदन्ति जानन्ति ते होराविदस्तेषां प्रीतये बृहच्छास्त्रगम्भीरार्थेन शिष्यान् बोधयितुं प
रिश्रान्तानां जातकशास्त्राभिज्ञानां सुगमोपायदर्शनेन उत्पन्नप्रीतये इत्यर्थः। ज्योतिर्विदां प्रीतय इति पाठे त्रिस्क
न्धज्योतिःशास्त्रविदां प्रीतिजनकत्वमस्य ग्रन्थस्य प्रतीयते। ननु केवलजातकाभिज्ञानाम्। तेषां ज्योतिःशास्त्रैक
देशवेत्तृत्वेन संपूर्णज्योतिःशास्त्रवेत्तृत्वाभावात्। विशिष्टस्य स्कन्धत्रयस्यैव ज्योतिःशास्त्रपदाभिधेयत्वाच्च। उक्तं
चैतद्वराहेण ज्योतिःशास्त्रमनन्तभेदविषयं स्कन्धत्रयाधिष्ठितं तत्कार्त्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते सं

शैं·म· तच्चनयगणेशदैवज्ञैर्ग्रहलाघवेस्पष्टंविरचितम्।तद्यथा।सौरोऽर्कोपिविधूच्चमङ्ग·कलिकोनाब्जोगुरुस्त्वा
४ र्यजोऽसृग्राहूचकजंत्वकेन्द्रकमथार्धेसेषुभागःशनिः।शौक्रंकेन्द्रमजार्यमध्यगमितीमेयान्तिदृक्तुल्य
तांसिद्धैस्तैरिहपर्वधर्मनयसंत्कार्यादिकंत्वादिशेत्॥अस्मिन्कालेऽनयैवघटनयासाधिताग्रहादृक्सम
त्वंयान्त्यतद्यमेवघटनासमीचीनेतिवेद्यम्।ततस्तात्कालिकोऽर्कोऽयनभागयुक्त,इत्यादिनाकरणोक्त
वर्त्मनास्वोदयैःकृत्वाइहजन्मसमयेउद्गमःसाध्यः।उद्गमोराशीनामुद्गमोलग्नमितियावत्।राशीनामुदयो
लग्नमित्यमरोक्तेः।सउद्गमःसषड्भःसन्नस्तसंज्ञोभवति।षड्भैःसहवर्ततेसतथाषड्राशियुक्तइत्यर्थः।अस्तेअस्त
क्षितिजेऋक्षंराशिः।राशिक्षेत्रगृहर्क्षभानिभवनंचैकार्थसंप्रत्ययादित्यभिधानात्।यत्रभास्वानस्तंयातितदस्त
क्षितिजमित्युच्यते।एतदेवास्तर्क्षंज्योतिर्विदोजायाभावइतिवर्णयन्ति।यतोऽस्माज्जायायाःशुभाशुभविचारः
क्रियते।अतोजायाभावइतियुक्तंनाम।एवंयत्रभावेलग्नादिकेयस्यविचारस्तत्संज्ञातस्यभावस्यस्यात्।यथा
लग्नस्यतनुसंज्ञेत्यादिध्येयम्।चकारःसमुच्चयार्थेव्याख्येयः।लग्नानयनवासनानुपातद्वयेनसुगमा।अथ राम:
लग्नशब्देनकिमेतच्चिन्त्यते।लगतीतितल्लग्नम्।प्राक्कुजेक्रान्तिमण्डलस्ययोग्रहाद्यवयवोलग्नस्तद्गृहाद्यं ४

त्राविवाहोत्सवजातकाशे खेटैः स्फुटैरेव फलस्फुटत्वम्। इति। ननु ब्रह्मसौरार्यादिपक्षाणां सत्वात् कस्मिन् पक्षे ग्र
हाः साध्या इत्यत आह। यत्पक्षे हि घटन्त इति। यत्पक्षे यस्मिन् पक्षे हीति निश्चयेन घटन्ते प्रत्यक्षमाकाशे दृश्यन्ते त
स्मिन् पक्षे ग्रहाः साध्या इत्यर्थः। उक्तं च दामोदरपद्धतौ। यान्ति संसाधिताः खेटा येन दृग्गणितैक्यताम्। तेन पक्षेण ते
कार्याः स्फुटास्तत्समयोद्भवाः॥ इति। ननु ग्रहानयनमत्रार्षशास्त्रादेव कर्तुं युज्यते न तु मानुषात्तस्यायथार्थत्वादिति
चेत् सत्यम्। ग्रहानयनं मुनिकृतशास्त्रादेव कर्तुमुचितं परं तत्रापि कालवशेनान्तरं पतति। यत उक्तं सूर्यसिद्धा
न्ते। शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः। युगानां परिवर्तेन कालभेदोऽत्र केवलः॥ इति। वासिष्ठेऽपि। इत्थं माण्ड
व्यसंक्षेपादुक्तं शास्त्रं मयोत्तमम्। विस्रस्ती रविचन्द्राद्यैर्भविष्यति युगे युगे॥ विस्रंसनं विस्रस्तिः शिथिलत्वमिति
यावत्। तदन्तरं बीजसंज्ञं ब्रह्मगुप्तादिभिर्मानुषैः स्वसत्ताकाले लक्षयित्वा मुनिशास्त्रग्रहेषु निक्षिप्य तादृशनिक्षेप
युक्ताः स्वग्रन्था रचितास्तद्युक्तमेव। तदन्तरमतीन्द्रियज्ञैर्मुनिभिश्चलत्वात् ग्रन्थबाहुल्यभयाच्च नोक्तमपि देयमि
त्युक्तमेव। तथा च ब्रह्मसिद्धान्ते। संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्यः। तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ।
इति। आचार्येणापि वर्तमानघटनां विलोक्य ग्रहकौतुके ग्रहानयनमरचि। तदपि षष्टिमिते गतेऽब्दे शिथिलं दृष्ट्वा।

ग्रो·म· त्कालिकीकरणमयुक्तमिति। अत्रोच्यते। घटिकादिकं मासमानादियुक्तेर्नाक्षत्राद्दृष्टघटिकाग्रहीतैरौदयिका
५ र्काल्लग्नं साध्यमिति मूलयुक्तिः। परं नाक्षत्रनाडीनामज्ञानात् प्रभासाधनोपयोगाच्च सावना एव घटिकाः पूर्वैर्लग्ना
नयने स्वीकृताः। अथ तासां नाक्षत्रत्वं विधेयम्। तत्रानुपातः। यदि घटीषष्ट्या सूर्यगतिकला लभ्यन्ते तदेष्टघटी
भिः किमिति दृष्टसंबन्धिन्यो गतिकलाः स्युः। तासां प्राणीकरणार्थं द्वितीयोऽनुपातः। यदि राशिकलाभिः १८००
सूर्याधिष्ठितराश्युदयासवो लभ्यन्ते तदेष्टघटीसंबन्धिगतिकलाभिः किमिति लब्धा दृष्टघटीसंबन्धिगतिक
लोत्पन्नासवः। सावनसंख्यातो नाक्षत्रसंख्याया अधिकत्वात् सावनघटीषु योज्यास्ता नाक्षत्र्यदृष्टघटिका भ
वन्ति। एवं प्राप्ते परमलाघविकैराचार्यैरिष्टघटीसंबन्धिन्यो गतिकला एव रवावौदयिके क्षिप्ताः। तथा कृते
तात्कालिकार्क एव संजातः। यतदृष्टघटीसंबन्धिन्यो गतिकलानामदृष्टघटीसं
बन्धिसूर्यचालनम्। तद्यावदौदयिकार्के क्षिप्यते तावत्तात्कालिकार्क एव भवतीति सुप्रसिद्धम्। एतत्तात्कालिका
र्कभोग्यं सावननाक्षत्रनाड्यन्तरतुल्यमेवोदयार्कभोग्यान्न्यूनमायाति। उदयार्कभोग्यं नाक्षत्रनाडीभ्यस्तात्कालि रामः
कार्कभोग्यं सावनघटीभ्यः शोध्यं शेषं सममेव। अतस्तात्कालिकार्ककरणेन सावनघटीनां नाक्षत्रत्वं भवतीति युक्त ५

लग्नमित्यभिधीयते। यः परक्षितिजे लग्नस्तदस्तलग्नम्। यऊर्ध्वयाम्योत्तरवृत्ते लग्नस्तद्दशमलग्नम्। योऽधो-
याम्योत्तरवृत्ते लग्नस्तच्चतुर्थलग्नमिति भावचतुष्टयम्। उक्तं च भास्करीयगोले। यत्र लग्नमपमण्डलं कुजे तद्गृहा-
द्यलग्नमुच्यते। प्राचि पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे॥ इति। नन्विदं लग्नसाधनमयुक्तम्। त-
था हि। तत्र लग्नार्थं यादृष्टघटिका गृह्यन्ते ता नाक्षत्राः सावना वा। नाद्यः। तासां दुःसाध्यत्वात् प्रभासाधनार्थमनुपयु-
क्तत्वाच्च। नापि द्वितीयः। विभिन्नजातिभ्यस्ताभ्यो नाक्षत्राणामुदयानामपनयनस्यायुक्तत्वात्। भोदयाद्भोदयप-
र्यन्तं नाक्षत्रं दिनम्। तत्र द्वादश राशयः समुद्गमं यान्त्यत उदया नाक्षत्रा इति स्पष्टमेव। न च तात्कालिकार्ककरणे-
न सावनघटीनां नाक्षत्रीकरणं संपाद्य नाक्षत्रा उदयाः शोध्या इति वाच्यम्। प्रथमतस्तात्कालिकार्ककरणस्यैवा-
युक्तत्वात्। तथा हि। कुजे क्रान्तिमण्डलस्य यः प्रदेशो लग्नस्तत् किल लग्नम्। सूर्योदये सूर्यतुल्यं लग्नम्। सूर्य-
स्य क्रान्तिमण्डलावस्थितत्वात्। राशेर्भोग्यांशा उदयानन्तरमेवोदयन्ति। अत उदयकालीनार्कस्यैव भोग्यं ग्र-
हीतुं युज्यते। न तात्कालिकार्कस्य। किं च नाक्षत्रनाडीमयेऽहोरात्रसमे काले ६०।१० यावत्तात्कालिकार्काल्लग्नं क्रियते
न तावदर्कसमं भवति। यावदौदयिकार्कात् क्रियते तावदर्कसमं भवतीत्यन्वयव्यतिरेकाभ्यां प्रतीतेर्युक्तिः तच्च ना-

गो॰म ण्डलाहोरात्रसंपातात्त्र्यस्राणि क्षेत्राण्युत्पद्यन्ते। तद्यथा। मेषान्तापक्रमज्या निरक्षक्षितिजे भुजः, तद्द्युज्या
६ १७१९ परममण्डले कर्णः, तद्वर्गान्तरपदं मेषान्ताहोरात्रवृत्ते कोटिः। एवं वृषान्तापक्रमज्या भुजः, वृषान्तद्युज्या क
र्णः, तद्वर्गविश्लेषपदं वृषभान्ताहोरात्रवृत्ते कोटिः। एवं द्वन्द्वान्ते त्रिज्या कर्णः, परमापक्रमज्या १३९७ भुजः,
परद्युज्या कोटिः। तदेवं प्रसाधितानां कोटीनां ज्यारूपत्वेन ज्याखण्डानां द्युज्यावृत्तीयत्वाभावेन त्रिज्यावृत्ते परि
णाम्य चापीकृतानि। तत्र यत्प्रथममेकराशिज्यासंभूतं स मेषोदयकालः। द्वितीयं राशिद्वयस्य। तृतीयं राशित्रय
स्य। राशीनामाद्यन्तकालज्ञानार्थं प्रथमं द्वितीयात् द्वितीयं तृतीयाद्विशोध्य मेषादित्रयाणामुदयास्त एवात्र
शिष्यन्त इत्युपपन्नम्। त एव विलोमाः कर्क्यादित्रयाणां भवन्ति। यतः कन्यान्ताद्विलोमं कीटाद्यवधि द्युज्यापक्र
मज्याद्युज्यादेर्मेषादिसाम्येनैवोपजायमानत्वात् फलस्योत्क्रमतस्तुल्यताया एवावसीयमानत्वाच्चोत्क्रमस्या
दित्युपपन्नम्। एवं तुलादिष्वपि विलोमाद्बोद्धव्यम्। तथोपजातानामेषां न्यासः॥ एते षड्
क्ताजाता ब्रह्मतुल्यादावुक्ता नागतुरङ्गदस्रा इत्यादयो लङ्कोदयाः पलात्मकाः। अथातो नि राम:
जपत्तनजननभवनसमुद्गमनमानसाधनवासना प्रोच्यते। अवनौ गगनं समन्तात्स्थल ६

मी १६७० मे	ध १९३५ क
कुं १७९५ वृ	वृ १७९५ सि
म १९३५ मि	तु १६७० क

म्। तथा चोक्तं सिद्धान्ते। लग्नार्थमिष्टघटिका यदि सावनास्तास्तात्कालिकार्ककरणेन भवेयुरार्क्ष्यः। इति। अत्र म
न्दावबोधार्थं प्रकारान्तरेण वासना निगदिता सिद्धान्तशिरोमणिवासनावार्तिके ऽस्मत्पितृचरणैः श्रीनृसिंहाचा
र्यैः। औदयिकार्कभोग्यकाले शोध्ये नाक्षत्रनाडीमयेष्टकालाच्छोधकादपनीते यावदवशिष्यते तावदेवेष्टेन के
वलशोध्ये दृष्टेन केवलं शोधकादपनीते ऽवशिष्यत इति प्रसिद्धम्। तत्र सावननाक्षत्रनाड्यन्तरतुल्यमिष्टं क
ल्पितम्। तन्नाक्षत्रघटीभ्यो यावदपनीयते तावत्सावनादृष्टघटिका भवन्ति। यावदौदयिकार्कभोग्यकालादपनी
यते तावत्तात्कालिकार्कभोग्यकालो भवति। अतस्तात्कालिकार्कात् सावनघटीभिर्लग्नं साध्यमित्युपपन्नम्। अ
थ वौदयिकार्कान्नाक्षत्रेष्टकालात् साध्यम्। प्रकारद्वयमपि सयुक्तिकमेव। अतः सर्वमवदातम्। एतदुदयलग्नं
स्वोदयैः साध्यम्। स्वोदयास्तु लङ्कोदयाधीना इति प्रथमतो लङ्कोदयवासनोच्यते। अपमवृत्ते क्षेत्रविभागेन सर्वे रा
शयस्तुल्यप्रमाणा एव सन्ति। नाडीवृत्ते तु कालांशविभागेन सर्वे राशय उद्गच्छन्ति। निरक्षे तु तन्नाडीवृत्तं सम्पूर्वा
परं सममण्डलवद्भ्रमति। क्रान्तिवृत्तं तु दक्षिणोत्तरतस्तिरश्चीनत्वेनोदेति। क्रान्तिवृत्तस्थो मेषो यावत्तिरश्चीन उदेति
तावन्नाडीवृत्ते ऽष्टाविंशतिभागाः किंचिन्न्यूना एवोद्गच्छन्ति। तिर्यगेवमुद्गच्छतो ऽपममण्डलस्य तिरश्चीनत्वेनोन्म

प्रमाणंभवतीतिजातम्। एवंमेषादेर्मिथुनान्तस्त्रिराशिनिरक्षोदयप्रमाणयोगेनोद्वृत्तेलगति। स्वक्षितिजेतुत्रिरा
शिचरखण्डयोगतुल्यकालेनपूर्वमेवलगतीत्यतस्त्रिराशिचरखण्डोनंनिरक्षजतृतीयराशिमानंस्यादित्युपप
न्नम्। अतोनिरक्षोदयाः क्रमस्थानिजैः क्रमस्थैश्चरार्द्धैरूनाः स्वदेशेमेषादित्रयाणामुदयाभवन्तीतिसिद्धम्। एवंमे
षादेः कर्कान्तोनिरक्षजचतूराशिप्रमाणयोगेनोन्मण्डलेलगति। स्वक्षितिजेतुद्विराशिचरखण्डयोगतुल्यकालेनपू
र्वमेवलगति। अतोद्विराशिचरखण्डोनं निरक्षजचतूराशिमानंस्वदेशेचतूराशिप्रमाणंस्यादितिजातम्। अस्मिंस्त्रि
राशिचरखण्डोनत्रिराशिनिरक्षोदयंप्रमाणयोगरूपेणस्वदेशजत्रिराशिप्रमाणेनोनीकृतेतृतीयराशिचरार्द्धयुक्तं
निरक्षजचतुर्थराशिमानंस्वदेशेचतुर्थराशिमानंस्यादितिजातम्। तथाचबालावबोधार्थंबीजक्रिययालिख्यते।
तत्रस्वदेशजत्रिराशिप्रमाणयोगः। निरक्षज त्रिराशिप्रमाणम् १ त्रिराशिचरार्द्धम् १। अयमस्मात्निचराप्र १
द्विराचं १। चतूराशिमानयोगात् शोध्यः। तत्रनिरक्षजत्रिराशिप्रमाणयोगेनिरक्षजचतूराशिप्रमाणयोगात् शोधिते
निरक्षजेचतुर्थराशिप्रमाणमेवावशिष्यते। अथत्रिराशिचरखण्डयोगः क्षयगतोद्वि
राशिचरखण्डयोगात् क्षयगतात् शोध्यमानः संशोध्यमानमृणंस्वंस्यादित्यादिनाधनगतोभवति। अथधनर्णयोरन्त

ग्नमिवदृश्यतेतदस्मात्क्षितिजम्। तथाचमत्पद्यम्। अवनौगगनंसमन्ततः सततंलग्नमिवाऽवलोक्यते। क्षिति
पृष्ठनिवासिमानुषक्षितिजंतद्गणकानिरूचिरे॥ तस्यनिरक्षक्षितिजेनयदूर्ध्वाधरमन्तरंतच्चरम्। दिग्द्वयेऽपि
चरसत्वेनास्यैकदिक्त्वाभिप्रायेणचरार्द्धत्वेनैतद्व्यपदिश्यते। तथाचान्तरभूतेनस्वस्वचरार्द्धेननिरक्षोदयायु
तोनाः कर्तव्याः स्वोदयाभवन्तीत्युत्सर्गः। वस्तुतस्तुमेषादिरुन्मण्डलेक्षितिजेचसमकालमेवलगतिक्षितिजो
न्मडलसंपातएवमेषादेरुदयस्थानात्मेषान्तः पुनर्मेषनिरक्षोदयासुभिरुन्मण्डलेलगति। स्वकुजेतुमेषचर
खण्डतुल्यकालेनपूर्वमेवलगतीत्यतः प्रथमराशिचरखण्डोनंप्रथमराशिनिरक्षोदयप्रमाणंस्वदेशेप्रथमरा
शिप्रमाणंस्यादित्युपपन्नम्। एवंमेषादेर्वृषान्तोद्विराशिनिरक्षोदयप्रमाणयोगेनोन्मण्डलेलगतिस्वकुजेतुद्विरा
शिचरखण्डयोगतुल्यकालेनपूर्वमेवलगति। अतोद्विराशिचरखण्डोनंद्विराशिनिरक्षोदयमानंस्वदेशेद्विराशि
मानंभवतीत्युपपन्नम्। तत्रप्रथमराशिप्रमाणेनयावदूनीक्रियतेतावत्केवलंद्वितीयराशिप्रमाणमेवावशिष्यत
इतिप्रथमराशिचरार्द्धोनप्रथमराशिनिरक्षोदयप्रमाणरूपे   प्रथमराशिमाने
द्वितीयराशिमानादनन्तरोक्ताच्छोधितेद्वितीयराशिचरार्द्धोनंद्वितीयराशिनिरक्षोदयप्रमाणंस्वदेशेद्वितीयराशि

नांशशब्देन क्रान्तिपातः। क्रान्त्यर्थं पातः क्रान्तिपात इत्यन्वर्थसंज्ञेयम्। पातो नाम नाडीवृत्तक्रान्तिवृत्तयोः संपातः
क्रान्त्यभावे यावान् ग्रहश्चक्रशुद्धः स क्रान्तिपातः स्यात्। अस्यैव मुञ्जालाद्यैरयनचलनमिति नाम धृतम्। यतोऽने
न क्रान्तिपातेनायनस्य विषुवद्वृत्तापवृत्तसंपातात् प्रवृत्तराश्यन्तरगमनस्य यथास्थितक्रान्तिवृत्तस्य रेवत्यन्त
मधिकृत्य प्रवृत्तराश्यन्तरगमनात् प्राक् पश्चाद्वा चलनं जायत इत्यतोऽयनचलनमिति युक्तम्। अयनचल
नांशा एव केचिल्लाघवादयनांशा इति व्यवह्रियन्ते। कथं पुनः प्राक्पश्चाद्वा चलनमित्येतदुच्यते। इष्टेऽह्नि मध्याह्ने
द्वादशाङ्गुलशङ्कोश्छायालक्षणीया। ततः दिनार्द्धघुतेस्त्रिज्यकाघ्याहृतायाः स्वकर्णेन चापांशकाः स्युर्नतांशाः।
दिनार्द्धवियुक्ता युतास्ते पलांशै रुदग्दक्षिणेभाग्रकेऽर्कापमः स्यात्॥ ततः क्रान्तितो वैपरीत्येन भानुर्भवेदिति भा
स्कराचार्योक्त्या भास्करः साध्यः। परं स सायनः स्यात् क्रान्तेः सकाशात् साधितत्वात्। तथा च करणोक्तवर्त्मनाऽ
न्योऽपि तात्कालिकः स्पष्टभास्करः साध्यः। तयोरन्तरमयनांशाः स्युः। तत्र करणागतेऽर्के छायार्कादूने धनायनांशाः।
अधिके ऋणायनांशाः। धनायनांशेषु प्राक्चलनम् ऋणायनांशेषु प्रत्यगिति वेदितव्यम्। तस्मादसौ क्रान्तिपातोऽन्व
र्थत्वात् खगे क्रान्त्यानयनाय योज्य इति सिद्धम्। क्रान्तिवशाच्चरं चरवशादुदया उदयवशाल्लग्नमतो लग्नार्थमर्केऽ

रमेव योग इति कृते तृतीयराशिचरखण्डं पनगतमवशिष्टम्। अतस्तृतीयचरार्द्धयुतं निरक्षज चतुर्थराशिमानं स्व
देशे चतुर्थराशिमानं स्यादिति जातम्। अथ मेषादेः सिंहान्तो व्यस्तज पञ्चराशिमानयोगे नोद्वृत्ते लगति। स्वक्ष्माजे तु प्र
थमराशिचरार्द्ध कालेन पूर्वमेव लगत्यतः प्रथमराशिचरार्द्धोनं निरक्षज पञ्चराशिमानं स्वदेशज पञ्चराशिमानं स्या
दिति जातम्। अस्माच्च नृराशिप्रमाणयोगे प्राग्वत् शोधिते द्वितीयराशिचरार्द्धयुतं व्यस्तज पञ्चमराशिमानं स्वीय प
ञ्चमराशिमानं स्यादित्युपपन्नम्। एवमजादेः कन्यान्तो व्यस्तज षड्राशिमानयोग तुल्य कालेनोद्वृत्ते क्षितिजे च लगति।
अत्रापि स्वदेशज पञ्चमराशिमानयोगे शोधिते प्रथमराशिचरार्द्धयुतं व्यस्तज षष्ठराशिमानं स्वदेशज षष्ठराशिमानं
स्यादिति सिद्धम्। अतो निरक्षोदया उत्क्रमस्था उत्क्रमस्थैश्चरखण्डैः स्वैर्युक्ताः कर्कादित्रयाणां मानानि स्युरिति निष्प
न्नम्। अनयैव युक्त्या साधितानि तुलादेरनुलोमं मीनान्तावधिकराशिमानानि कन्यान्तादिलोमं मेषाद्यवधिकराशि
मानतुल्यानि भवन्त्यत एतान्येवोदयमानानि विपरीतानि तुलादिषण्णां मानानि स्युरिति सिद्धम्। तदुक्तं सिद्धान्तशि
रोमणौ॥ क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमोत्क्रमस्थैश्च विहीनयुक्ताः। मेषादिषण्णामुदयाः स्वदेशे तुलादितोऽ
मी च विलोमसंस्थाः॥ इति। अथार्कलग्नानयनार्थमयनांशा योज्यन्ते तत्कारणमयनांशस्वरूपं च निरूप्यते। अय

यनांशा योज्या इति युक्तम्। उक्तं च श्रीभास्कराचार्यैः। क्रान्तिवशाच्चरमुदयाश्चरदललग्नागमे ततः स्पष्टाः इति।
एतत्तु धनायनांशविषयम्। ऋणायनांशास्तु वियोज्या इत्यनुक्तमपि बुद्धिमता ज्ञेयम्। ऋणायनांशा अपि पूर्वं
स्थिता इति श्रूयते। तथा च वराहसंहितायाम्। आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्। आसीत्तदा
नि नूनं येनोक्तं पूर्वशास्त्रेषु॥ पूर्वशास्त्रेषु कश्यपसंहितादिषु। ऋणसंज्ञपष्ठि सत्त्रंशत्रयोविंशत्ययनांशेष्वे
व २३।२० इदं संभवति। तस्माद्वराहसत्ताकाले धनायनांशा आसन्। अधुनापि धनायनांशा एव न त्वृणाय
नांशा इति बोद्धव्यम्। यत्तु भूनेत्रतिथ्युन्मिते १५२१ शालिवाहनशकयातवर्षगणेन तु सांप्रतं सार्द्धषोडशाय
नांशा ऋणगताः सन्ति। छायार्कात् करणागतस्यार्कस्याल्पत्वात्। इति वदता केनचिन्मौहूर्तिकेन छायार्कात्क
रणागतेः स्वेस्त्यृणायनांशा इति स्वीकृतम्। तदसदेवेति वयं ब्रूमः। यदि सांप्रतमृणायनांशास्तर्हि ते लग्नानय
नार्थमर्के वियोज्याः स्युः। किं चायनांशहीनं तनुः स्यादित्यत्रापि संशोध्यमानमृणं स्वं स्यादित्यादिनाऽयनांशयुक्तत
नुः स्यादिति प्रसज्येत। अपि च विषुवद्वृत्तात् क्रान्तिवृत्तावधि दक्षिणोत्तरगमनं क्रान्तिरिति विषुवत्क्रान्तिवृत्तपा
ते संपाते क्रान्तेरभावस्तत्र सायनग्रहदोर्ज्याया अप्यभावेन भाव्यमतस्तत्र सायनग्रहः शून्यराश्यादिरिति ता

प्रो.म. त् सर्ववादिसिद्धम्। अथ प्राक्चक्रे चलिते संपातोऽपि मेषादेः प्रागेव भवतीति तत्रस्थो ग्रहो मेषादेः सकाशान्न्यूनत्
९ व भवत्यतस्तत्रायनांशयोगेनैव शून्यराशिता भवति। अयनांशशोधने तु शून्यराशिः स्यादिति तान कथमपि स्यादिति
दूषणान्तरम्। न चर्णायनांशा अपि योज्या इति वाच्यम्। तथा सति धनर्णयोरन्तरमेव योग इति सिद्धान्तो व्याकु
प्येत। अन्यच्च। खेटेऽयनांश्मेषटपूर्वके स्वमस्वं क्रियाद्येषु रिमेऽयनांशाः इति प्राचीनोक्तप्रकारेणापि इदानीं धना
यनांशा लभ्यन्ते तैस्तैः सह विरोधोऽपि दूषणम्। तस्मादिदानीं करणागतार्कात् छायार्कस्याधिकत्वेन चक्रस्य प्रा
क्चलितत्वात् धनायनांशा इत्यवधेयम्। अत एव तात्कालिकोऽर्कोऽयनभागयुक्त इति संगच्छते। छायार्कात्
करणागतेऽर्के न्यूने प्राक्चक्रं चलितं ज्ञेयम्। तदा धनायनांशा इत्यर्थः। धनायनांशा एवाधुना सन्तीति सौरभाष्ये
श्रीमन्नृसिंहदेवज्ञैरप्युक्तम्। ब्रह्मसिद्धान्तेऽपि। छायार्कार्कान्तरांशास्तु चलांशाः स्वमिनाधिके। छायार्के त्वृणमूने
प्राक्पश्चाच्चक्रं चलम्बते॥ स्पष्टार्थमेतत्। तस्मात् करणागतादधिके छायार्केऽर्णायनांशा इति मतं प्रत्याख्येयमे
व। अथोदयैः साध्यमानं लग्नं नाडीमण्डलक्रान्तिमण्डलसंपातादायाति। अपेक्षितं च रेवतीयोगतारकत इत्यय राम:
नांशहीनं क्रियतं इति स्पष्टम्। अन्ये तु। लग्नं सायनमेव। नायनांशहीनं कार्यम्। मुनिभिरनुक्तत्वात् सायनादेव ८

फलादेशः कर्तव्य इत्याह तन्मन्दम् । एतदर्थं शाकल्यसंहितायां पञ्चमाध्याये दृक्कर्मोपसाधने । चलसंस्कृत
लग्नज्यालम्बज्ये चेद्भवत्यपि ॥ चलोऽयनांशास्तैर्यन्नगतैर्युक्तं [illegible] संस्कृतमित्युच्यते । यद्य
त्र भगवतो ब्रह्मणः सायनमेव लग्नमभिमतं स्यात्तर्हि पुनरयनांशयोजनं नोक्तं स्यात् । सायनलग्नेऽयनांशयो
जनेन द्विगुणायनांशा योजिता इति जायते । द्विगुणायनांशयोजनं तु वासनाशून्यत्वादन्यार्षग्रन्थेष्वप्रसि
द्धत्वाच्चानुपपन्नम् । ततो निरयनमेव लग्नं कार्यमित्याशयोऽस्य मे । तस्मादयनांशहीनं सत्तनुः स्यादिति स
र्वसम्मतम् । पुनराह रेकदेशिनः । चलांशसंस्कृतः स्पष्टग्रहः स्फुटग्रह इति शाकल्योक्तेरयनां
शसुक्ताः स्वग्रहाः स्पष्टाः स्युः । [illegible] तेभ्य एव यात्रादिना [illegible] जातकादौ फलादेशः कर्तव्यः । तथा सायन
योरेव चन्द्रार्कयोरन्तरात्तिथिः साध्या । न हि ते सायनादेव साध्यत्वं [illegible] पि सायनरवीन्द्वोर्योगादेव साध्य इति । त
दप्यतिमन्दम् । यतश्चलांशसंस्कृतग्रहस्य [illegible] इदम् । अयनाभ्युपगमादेतस्योपचारश्च [illegible] । अस्यार्थः
एतस्य चलांशसंस्कृतस्य ग्रहस्य स्पष्टग्रह किंतु कार्यान्तरवशात् स्पष्टत्वेनोपचर्यत इति भावः । तत्र हेतुमा
ह । अयनाभ्युपगमादिति । अयनं राश्यन्तरगमनं तस्याभ्युपगमस्तस्मात् । क्रान्तिसाधनार्थमिति तात्पर्य [illegible]
र इत्युपचारः क्रियतेऽस्ततो नायं स्पष्टग्रहः ।

धै०म एतद्युक्तमुक्तं वृद्धवसिष्ठसिद्धान्ते। खचराश्चलन्ति तस्मात् पूर्वे युक्ताश्च पश्चिमे हीनाः। तस्मादपमच्छा।
चरदललग्नादिकं ततः साध्यम्॥ रोमशेऽपि। तत्संस्कृतग्रहात् क्रान्तिलग्ननत्युन्नतिस्फुटम्। इति। सोमसि
द्धान्तादिष्वप्येवमेव। अतोऽयनांशसंस्कृता ग्रहाः क्रान्तिसाधनार्थमेव स्पष्टा भवेयुर्न तिथ्यादिसाधनार्थं फलादे
शार्थं चेत्यत्र प्रौढं निर्व्यूढम्। तस्मात् परिहार्योऽयमपावनयावनमतानुसारिणोऽपि राजपथः। पुनर्भवेदेवम्। य
दि स्पष्टग्रहसंस्कारत्वेनैव चलांशयोजनं मुनीनामभिप्रेतं स्यात्तर्हि मन्दशीघ्रफलादिस्पष्टग्रहोपकरणसंस्का
रप्रकरण एवोक्तं स्यात्। क्रान्तिप्रकरणेऽभिहितमतः क्रान्तिसाधने तस्योपयोग इति बालैरपि बुध्यते। न चैवं
ग्रहाणां निरयणत्वे संक्रान्तिरपि निरयणैवास्तामिति वाच्यम्। दृष्टापत्तेः। संक्रान्तिषु तथा कालस्तदीयेऽप्यय
ने तथा। इति मुनिभिरुक्तत्वात् सायननिरयणसंक्रान्त्योरुभयोरपि पुण्यकालः। यद्यपि राशयो निरयणा इति
निरयणैव संक्रान्तिस्तस्या एव व्यवहारयोग्यत्वम्। तथापि चलसंस्कृततिग्मांशोः संक्रमो यः स संक्रमः। अजाग
लस्तनद्वयराशिसंक्रान्तिरिष्यते॥ इति वृद्धवसिष्ठसिद्धान्तोक्तेः सायनसंक्रान्तौ पुण्याधिक्यमिति युक्तमुत्पश्या रामः
मः। अत एवाहुरस्मत्पितृव्यचरणाः श्रीशिवदेवज्ञा मुहूर्तचूडामणौ। अयनांशकलाः स्पष्टरविगत्युद्धृताः पुरा। १०

दिनार्द्धैर्वह्निपुण्याः स्युर्मेषादिभ्यश्चलक्रमाः॥ इति। तस्मात् सायनग्रहेभ्यस्तिथ्यादिसाधनमयुक्तत्वादार्षविरु
द्धत्वादद्ययावत्प्रामाणिकैरकृतत्वाच्च न कार्यमित्यलं प्रसङ्गागतया मतान्तरदूषणकथाप्रस्तावनया। एतदु
क्तं प्रसक्तानुप्रसक्त्या श्रीपतिटीकाकारैरनुक्तमपि। यन्मयाल्पमतिनाधुनाकृतं गोपिराजमतखण्डनं वरमात
च्छिवस्य गुरोर्दयाभरालोकनप्रभववैभवं किल॥ इदानीं प्रकृतमनुसरामः। उदयलग्नं षड्भयुतमस्तलग्नं भ
वति। उदयास्तक्षितिजयोर्मध्येऽर्द्धस्यैवापमण्डलस्य व्यवस्थितत्वात्। तदुक्तं गोले। योऽभ्युदेति समयेन येन त
त्क्रमोऽस्तमुपयाति तेन च। राशिरूर्ध्वमपमण्डलं कुजादर्धमेव सततं यतः स्थितम्॥ इति। अतः शोभनमुक्तम
स्तर्क्षं सषड्भः स च, इति। एवं भावद्वयमभिधायेदानीमन्यभावद्वयसाधनं विवक्षुस्तावत् तदङ्गीभूतं नतोन्नत
साधनं वृत्तार्धेनाह॥ ॥ रात्रेः शेषमितं युतं दिनदलेनाह्नो गतं शेषकं विश्लेष्यं खलु पूर्वपश्चिमनतं
त्रिंशच्च्युतं चोन्नतम्॥ ॥ रात्रेः शेषमिति। इतं भुक्तं वा दिनदलेन युतं सत् खल्विति निश्चयेन क्रमेण पूर्वप
श्चिमनतं स्यात्। एतदुक्तं भवति। यद्यर्धरात्रानन्तरं जन्म स्यात् तदा रात्रिशेषं दिनार्द्धेन युक्तं कार्यं पूर्वनतं स्यात्।
यद्यर्धरात्रात् प्राक् जन्म तदा रात्रिगतं दिनार्धयोज्यं पश्चिमनतं स्यात्। अह्नो दिनस्य गतं शेषकं वा दिनदलेन वि

श्लेष्यमन्तरितं कार्यं दिनदलात् शोध्यमिति यावत्। क्रमेण पूर्वपश्चिमनतं स्यात्। अथोन्नतमाह। त्रिंशच्च्युतमि-
ति। नतं त्रिंशतः च्युतं शुद्धं सदुन्नतं स्यात्। पूर्वनते त्रिंशच्छोधिते पूर्वोन्नतं पश्चिमनते त्रिंशच्छोधिते पश्चिमोन्न-
तमित्यर्थः। चकारः समुच्चयार्थः। अत्रोपपत्तिः। खगोलस्य प्रागपरविभागेन कपालद्वयं भवति। तत्र निशामध्यात् म-
ध्याह्नपर्यन्तं त्रिंशद्घटिकान्तरेण भानोरारोहणमार्गावधि प्राक्कपालम्। तथा मध्याह्नात् निशीथपर्यन्तं त्रिंशद्घटिकान्तरे-
ण भानोरवरोहणमार्गावधि प्रत्यक्कपालम्। एवं प्रागपरकपालयोर्मध्ये मध्याह्नापेक्षया यावतीभिर्घटीभिः सविता
नम्र उपलभ्यते स नतकालः। तथा मध्यरात्रापेक्षया यावतीभिर्घटीभिरुच्च उपलभ्यते स उन्नतकालः। एवं तौ त्रिंशतः
शुद्धावन्यथा भवतः। ततः खगोलस्य क्षितिजसंनिवेशनेन विभागचतुष्टयं भवति। तथा च प्राक्कपाले सूर्ये क्षितिजा-
दूर्ध्वस्थे सति दिनगतं तथाधःस्थिते रजनीशेषम्। पश्चिमकपाले तु कुजोर्ध्वस्थे दिनशेषमधःस्थे रात्रिगतम्। एवं दि-
नगतशेषे दिनार्धात् शोधिते तथा रात्रिशेषगते दिनार्धेन युते सती प्रागपरनते स्तः। अत उपपन्नं रात्रेः शेषमित्या-
दि। नतोन्नते त्रिंशद्घटीमध्ये ऽतो नतं त्रिंशच्छुद्धमुन्नतं स्यात्। अतो युक्तमुक्तं त्रिंशच्च्युतं चोन्नतमिति। अथ यदर्थमेता- रामः
वानुपक्रमस्तदधुनादशमचतुर्थभावसाधनं वृत्तोत्तरार्द्धेनाह॥ ॥ प्राक् पूर्वोन्नतषड्युक्तरवितः पश्चान्न ११

तादित्यतो यल्लङ्कोदयकैस्वलग्नमिव तन्माध्यं सषड्भं सखम् ॥ २ ॥ यदिति। पूर्वोन्नतषड्भयुक्तरवि
तः लङ्कोदयकैर्लग्नमिव लग्नं यत् भवेत् तत् माध्यं स्यादिति योजना। पूर्वस्मिन् कपाले उन्नतं पूर्वोन्नतम्। षड्भैः
राशिषट्केन युक्तश्चासौ रविश्च षड्भयुक्तरविः। पूर्वोन्नतं च षड्भयुक्तरविश्च पूर्वोन्नतषड्भयुक्तरवी ताभ्यामिति प
ञ्चम्यर्थे तसिः। मध्ये ऊर्ध्वयाम्योत्तरवृत्ते भवं माध्यं दशमलग्नमित्यर्थः। एवं पश्चान्नतादित्यतो लङ्कोदयकैर्ल
ग्नमिव यल्लग्नं तत् माध्यं स्यात्। पश्चान्नतं चादित्यश्च पश्चान्नतादित्यौ ताभ्यामिति पञ्चम्यर्थे तसिः। एतदुक्तं भव
ति। अर्धरात्रादुपरि दिनार्धपर्यन्तं पूर्वकाले उन्नतमिष्टकालं प्रकल्प्य सषड्भसायनतात्कालिकार्कं सूर्यं प्रक
ल्प्य लङ्कोदयान् स्वोदयान् प्रकल्प्य तद्भोग्यभागैरुदयो हतः खत्र्यादिना लग्नवद्यत् साधितं तद् मध्यलग्नं
स्यात्। एवं दिनार्धादुपरि रात्र्यर्धपर्यन्तं पश्चिमकाले नतमिष्टकालं प्रकल्प्य केवलसायनतात्कालिकार्कं
सूर्यं प्रकल्प्य लङ्कोदयानुदयान् प्रकल्प्य तद्भोग्यभागैरित्यादिना लग्नवद्यत् साधितं तद् मध्यलग्नं स्यात्।
तद् मध्यलग्नं सषड्भं षड्राशियुक्तं सत् सुखं चतुर्थलग्नं भवति। अत्रोपपत्तिः। मध्याह्ने सूर्यतुल्यमेव मध्य
लग्नं स्याद् मध्यलग्नमिति दक्षिणोत्तरे इत्युक्तत्वात्। मध्याह्नादग्रे याव[illegible]षमध्यलग्नमपेक्ष्य तद्नतमाह्ने

पा॰भ॰ २ तुल्यमेवेष्टकालंप्रकल्प्यसूर्योत्क्रमलग्नंसाध्यंतद्मध्यलग्नंभवति।यथा॥सूर्योदयेसूर्यतुल्यमुदयलग्ः
सूर्योदयादिष्टघटीभुक्क्रमेणोदयलग्नंसाध्यतेतथात्रापि।सूर्योदयात्पूर्वंयथोत्क्रमेणलग्नंसाध्यतेतथैवह
पिमध्याह्नात्पूर्वंपूर्वनतनाडीतुल्यमेवाभीष्टकालंप्रकल्प्यसूर्यात्ऋणलग्नंसाध्यंतद्मध्यलग्नंस्यात्।अतः
सिद्धमेतत्पूर्वनतेसूर्याद्विलोमलग्नंसाध्यंपश्चिमनतेतुसूर्योत्क्रमलग्नंसाध्यंमध्यलग्नंस्यादिति।अतएवोक्तं
वसिष्ठसिद्धान्ते।लङ्कोदयैर्लग्नमृणंविलोमंखमध्यजंपूर्वनतासुभिर्यत्।पश्चान्नतप्राणचयैर्धनाख्यंतत्षड्
युक्तंचरसातलाख्यम्।इति।एतत्षड्राशियुक्तंचतुर्थलग्नंस्यात्।ऊर्ध्वाधरयाम्योत्तरवृत्तयोर्मध्येऽधस्यैवाप
वृत्तस्यस्थितत्वात्।यद्वा।पूर्वोन्नतात्क्रमलग्नंपश्चिमोन्नतादृणलग्नंसाध्यंचतुर्थलग्नंस्यात्।तत्षड्राशियुतं
मध्यलग्नंभवति।ऋणलग्नसाधनार्थंपद्यद्वयम्।तात्कालिकोऽर्कोऽयनभागयुक्तस्तद्भुक्तभागैरुदयोहतश्चाख
ग्न्युद्धृतस्तैरविभुक्तकालंपलीकृतात्पूर्वनताद्विशोध्य॥ततश्च्युतोराश्युदयांश्चशेषमशुद्धहृत्खाग्निगुणंलवा
द्यम्।मेषाद्यशुद्धर्क्षमितैर्विशुद्धंततोऽयनांशोनमृणाख्यलग्नम्॥इति।तस्मात्पश्चिमनतेसतिसूर्यात्पश्चिमनत रामः
मेवेष्टकालंप्रकल्प्यलङ्कोदयैःक्रमलग्नंसाध्यंमध्यलग्नंस्यादितिसिद्धम्।अतउपपन्नंपश्चान्नतादित्यतोऽयलङ्को १२

५ मध्यलग्नं तु सषड्भसूर्यतुल्यं मध्यरात्राद्‌ग्रे यावतीषु घटीषु

दयकेष्वलग्नमिव तन्मध्यमिति। पूर्वनते तु पूर्वनतमिष्टकालं प्रकल्प्य लङ्कोदयैः सूर्यादृणलग्नं साध्यं तन्म

ध्यलग्नं भवतीति प्राप्ते परमकारुणिकेनाचार्येणर्णलग्नसाधने शिष्यक्लेशो माभूदिति प्रकारान्तरेणर्ण

लग्नानपेक्ष्यैवमध्यलग्नसाधनमरचि। तद्यथा। पूर्वोन्नतमिष्टकालं प्रकल्प्य सषड्भसूर्यात् क्रमलग्नमेव म

ध्यलग्नं स्यादिति। अत्रेयं युक्तिः। पूर्वकपाले मध्यलग्नं साध्यते। तत्र पूर्वकपालारम्भो मध्यरात्रे। तत्र सूर्यतुल्य

मेव चतुर्थलग्नं मध्यलग्नमवगन्तव्यं ता एव पूर्वोन्नतघटिका इति बालोऽपि जानाति। अतः सषड्भसूर्यात् पूर्वोन्न

तस्य क्रमिकेष्टकालत्वात् क्रमलग्नं मध्यलग्नं स्यादिति सिद्धम्। अत्र प्रतीत्यर्थमुदाहरणम्। काश्यां पलभापादो

नषडङ्गुलमिता ५।४५ यदैतावा स्तात्कालिकोऽर्कः १।५।५२।३७ अयनचलनांशाः १८।१० रात्रिमानम्

२६।५० तदार्कोदयात् पूर्वमेकघटीमितेष्टकाले तात्कालिकार्कादानीतमिदं विलोममुदयलग्नम् ०।२९।

३३।२० । अथवा सषड्भतात्कालिकार्कात् २५।५० एतद्घटीतुल्यमिष्टकालं प्रकल्प्य साधितमिदं क्रमेणोदय

लग्नं च ०।२९।३३।२० सममेव यथा भवति तथैवात्रापि केवलसूर्यात् पूर्वनतमितेष्टकाले साधितमृणलग्नं स

षड्भसूर्यात् पूर्वोन्नतमितेष्टकाले साधितं क्रमलग्नं च सममेवोपजायत इति मन्दानां प्रतीतिः स्याद्यथा। अत उ क्

प्रौ.म. यत् पूर्वोन्नतषड्भयुक्तरवितः इत्याद्युपपन्नम्। अत्र नताज्ञाने सप्तमभावान्माध्यसाधने लग्नाच्चतुर्थभावसा-
१२ चोक्तं श्रीदामोदरेण। अथास्तलग्नाद्द्विवह्निनार्धं तन्नाडिकाभिस्तत एव लग्नम्। लङ्कोदयैस्तद्दशमाह्वयं स्याल्लग्ना-
त्तथा रात्रिदलोत्थमम्बु॥ उत्तानार्थमिदम्। अत्रोपपत्तिः। सूर्यास्ते किल सूर्यतुल्यमस्तलग्नं भवति। ततो दशमलग्न-
तूर्ध्वयाम्योत्तरवृत्ते सौम्ययाम्यगोलयोः किंचिदधिकोनत्रिभान्तरे भवति। तयोरन्तरं सूर्यतुल्यास्तलग्नोत्पदिन-
र्धनाडीतुल्यम्। अतः सूर्यतुल्यास्तलग्नात् सूर्यतुल्यास्तलग्नोत्पन्नदिनदलमिष्टकालं प्रकल्प्य यत् क्रमलग्नं सा-
ध्यते तद्दशमलग्नं सूर्यास्ते यथा भवति तद्वदेव इष्टकालीनास्तलग्ना तदुत्पन्नदिनार्द्धेन यावल्लग्नं साध्यते तावत्
दशमलग्नं भवतीति सर्वं निरवद्यम्। तथा तेनैव प्रकारेणोदयलग्नात् रात्रिदलोत्पन्नं अम्बु चतुर्थलग्नं स्यात्। अ-
स्योपपत्तिः प्राग्वदेव। अथैतन्माध्यं लङ्कोदयैः साध्यते तत्कारणमुच्यते। मेषादौ लङ्काक्षितिजे याम्योत्तरसंस्था सैव मे-
षादावूर्ध्वयाम्योत्तरवृत्ते। तदत्रापि मेषादिसंबन्धानन्तरं मेषान्तो लङ्कोदयप्रमाणेनैव लगतीत्यतो मध्यलग्ना-
नयने लङ्कोदया एव ग्राह्याः। यद्वा। राशीनामसवस्त्रिविधाः। उदयासवो मध्यासवोऽस्तासवश्चेति। तत्रोदयासूनाम- रामः
स्तासूनां च योगार्धं मध्यासवो भवितुमर्हन्ति। ते तु लङ्कोदयासुतुल्या एव। अतो मध्यलग्नं लङ्कोदयैरेव साध्यमित्युप- १२

पन्नम्॥इदानीमवशिष्टभावसाधनमाह॥ ॥ त्र्यंशोंऽव्यस्तखभस्यभूयमहतो योज्यस्तनौ द्विच्युतो वमौ ते पि च साङ्घ्रि भास्तनुसुखाः॥ ॥ त्र्यंश इति। विगतमस्तं सप्तभं यस्मादिति व्यस्तम्। तच्च तत् खभं च व्यस्तखभम्। खभं नाम मध्यलग्नम्। व्यस्तखभस्य त्र्यंशो राश्याद्यिः द्विष्ठः। एकत्र भुवा एकेन हतः गुणितः अपरत्र यमाभ्यां द्वाभ्यां हतः सन् तनौ लग्ने योज्यः क्रमेण द्वितीयभावौ भवतः। पुनः स एव त्र्यंशो द्वाभ्यां सकाशात् च्युतः शुद्धस्ततो द्विष्ठः एकत्र भुवा हतोऽपरत्र यमहतः सन् बन्धौ योज्यः। तौ क्रमात् पञ्चमषष्ठभावौ भवेताम्। तेऽनन्तरानीताश्चत्वारो भावाः साङ्घ्रि भाः राशिषट्कयुताः सन्तः परे सप्तधर्मापञ्चयभावाः स्युः। एवं तनुसुखास्तन्वाद्यो द्वादशभावाः सिध्यन्ति। एभिर्भावैः समग्रं शुभाशुभफलं चिन्त्यमित्यर्थः। अपिचशब्दावनुक्तसमुच्चयार्थौ। अत्रोपपत्तिः। लग्नचतुर्थान्तर्वर्तिक्रान्तिवृत्तस्य समास्त्रयो भागा द्वितीयादयस्त्रयो भावाः। एवं चतुर्थसप्तमान्तर्वर्तिनः पञ्चमाद्यो भावास्त्रयः। एवं सप्तमदशमान्तर्वर्तिनोऽष्टमादयस्त्रयो भावाः। दशमलग्नान्तर्वर्तिन एकादशादित्रयो भावा इति। अथानुपातः। यदि त्रिभिर्भावैर्लग्नचतुर्थान्तरतुल्यमन्तरं लभ्यते तदैकेन किमिति लग्नचतुर्थान्तरं त्रिभक्तं क्रमादेकद्विगुणं लग्ने योजितं सत् द्वितीयतृतीयभावौ भवत इति सिद्धं सत्याचार्यैर्यावदेव लग्नचतुर्थान्तरं तावदेव सप्तमदशमान्तरमिति सप्तमदशमान्तरस्यैव त्र्यंशो भूयमह

 तोलग्नेयोज्यदृत्युक्तम्।अतउपपन्नंत्र्यंशोव्यस्तखभस्यभूयमहृतोयोज्यस्तनाविति।इदानींचतुर्थसप्तमान्त
 रस्यत्र्यंशोभूयमहृतश्चतुर्थेयोज्यःपञ्चमषष्ठभावौस्तइत्यत्रसप्तमदशमान्तरस्यैवत्र्यंशोद्विच्युतश्चतुर्थस
प्तमान्तरस्यत्र्यंशोभवतीतिसप्तमदशमान्तरस्यत्र्यंशोद्विच्युतएकद्विगुणश्चतुर्थेयोज्यःसुतरिपुभावौभव
तइतिसम्यगुक्तंद्विच्युतोवन्ध्यांनिति।नन्वत्रसप्तमदशमान्तरत्र्यंशोद्विच्युतश्चतुर्थसप्तमान्तरत्र्यंशोभवती
तिमदुक्तंतत्रकायुक्तिरितिचेत्।शृणु।चतुर्थसप्तमान्तरसप्तमदशमान्तरयोगोराशिषट्कंभवति।चतुर्थद
शमान्तरेणषण्णामेवराशीनांस्थितत्वात्तेषांत्र्यंशोद्वौ।अथचतुर्थसप्तमान्तरेसप्तमदशमान्तरेचकिंचिदूना
धिकमेवराशित्रयंभवति।यथास्वदेशेप्रथमंतथाद्वितीयंराशिषट्कंत्रिंशद्घटीभिःसमुदेति।परंपञ्चदशनाडीभी
राशित्रयंनोदेतितद्वदत्रापि।यद्यपिचतुर्थदशमान्तरेराशिषट्कमास्तेतथापिचतुर्थसप्तमान्तरेसप्तमदशमान्त
रेचराशित्रयंनास्ति।अत्रेदमवगन्तव्यम्।यदिचतुर्थसप्तमान्तरंराशित्रयादूनंतदासप्तमदशमान्तरंराशित्रयाधि
कमेवस्यात्।एवंतदाधिक्येतस्यन्यूनता।अथतस्यत्र्यंशोपिकिंचिदूनाधिकंरूपंत्र्यंशद्वययोगोद्वयम्।अतःसप्त
मदशमान्तरत्र्यंशोद्विच्युतश्चतुर्थसप्तमान्तरत्र्यंशःस्यात्।एवंचतुर्थसप्तमान्तरत्र्यंशोद्विच्युतःसप्तमदशमान्त

रंत्र्यंशोभवतीत्यतोयुक्तियुक्तं निरुक्तं हिच्युतइति। अथसप्तमदशमान्तरत्र्यंशो भूयमहतोजायाभावे योज्यः क्रमान्मृत्युधर्मभावौभवतइत्यत्रजायाभावस्यलग्नात्सद्धाद्यन्तरितत्वाल्लग्नएवयोजितोधनसहजभावौजातौ। अथतौएवषड्युतौ तौमृत्युधर्मभावौस्तः। एवं दशमलग्नान्तरत्र्यंशएकद्विगुणोदशमे योज्योलाभव्ययभावौस्तइत्यत्र दशमस्यचतुर्थात्षड्राश्यन्तरितत्वात् चतुर्थेएवयोजितःपञ्चमषष्ठभावौजातौअथतौएवषड्भयुतौआयव्ययभावौस्याताम्। अतउपपन्नंसाङ्कभाइति। यत्तुकेनचिदुक्तंभावसाधनमार्षग्रन्थाद्अभिहितत्वात्निर्मूलमितितत्तुच्छमायतःपराशरहोरायाम्। लग्नंसुखात्सुखंकामात्कामंखात्खंचलग्नतः। त्र्यंशमेकद्विगुणितंयुञ्ज्यात्लग्नादिषुक्रमात्॥ पूर्वापरयुते रद्धैसंधिःस्याद्भावयोर्द्वयोः। एवंद्वादशभावाःस्युर्भवन्तिहिससंधयइति। अथसंधिसाधनमाह॥ ॥संधिर्द्वियोगोर्द्धितः॥ ॥द्वयोर्भावयोर्योगोर्द्धितो द्व्याप्तःसन्संधिर्भवेत्। अत्रभावद्वययोगकरणे चक्रा१२धिकतायांचक्रंनत्याज्यम्। तथाप्रथमभावेद्वादशैकादशवाराशयो।ग्रिम भावेभून्यमेकोवाराशिः। तदाभूयैकस्यानेद्वादशराशयोऽधिकाग्राह्याइत्यभिसंधिः। असौसंधि र्द्विविधः। आरम्भविरामभेदात्। तथाहि। लग्नद्वितीययोर्योगार्द्धलग्नस्यविरामसंधिः। सएवद्वितीयस्यआरम्भसंधिः। एवंसर्वेषामपि। इदमत्रावधेयम्। आरम्भसंधेरूनोग्रहो

प्रौ॰ म॰ गतभावजातं फलं करोति। वि[रा]मसंधे रधिकोऽग्रिमभावजातं फलं करोति। आरम्भसंधे रनल्पो विरामसंधेः
१५ रल्पोऽग्रहस्तु स्वाधिष्ठितभावजं फलं करोति। तथा च आहुः। आरम्भसंधे द्युचरो यदोनः फलं ददात्या दिमभावजा
तम्। विरामसंधे रधिकस्तदानीमागामिभावोत्थफलप्रदः स्यादिति। अत्र वासना श्रीपतिपद्धतिटीकायां तु नरसिंहै
रुदितासैवोच्यते। राश्यंशकलाविकलात्मकलग्नस्य चरमविकलारूपमेव नितान्तसूक्ष्मरेखाकारक्रान्तिवृत्तस्थ
लं नितान्तसूक्ष्मरेखाकारे क्षितिजे लग्नं भवतीति चरमविकलैव वस्तुतो लग्नम्। एवमधस्तनरेखाकारसूक्ष्मया
म्योत्तरवृत्तलग्नत्वात् चरमविकलैव च[illegible]लग्नम्। ताभ्यामुत्पादितत्वाद् द्वितीयभावोऽपि चरमविकलैव। एवम
न्येऽपि भावाश्चरमविकलात्मका एव। चरमविकलातः प्रागपरत्र पुनः सांनिध्यात् लक्षणया लग्नादिपदप्रयोगो
गौणः सांनिध्यं तु युक्तिसाम्यात् पूर्वभावस्य यावत्पर्यन्तमग्रे तदग्रिमस्य पश्चादपि तावत्पर्यन्तमेव स्वीकरणी
यमिति द्वादशप्रथमभावयोगार्द्धात्मकसन्धिपर्यन्तं लग्नचरमविकलायाः पश्चात्सांनिध्यं लग्नद्वितीययोगार्द्धा
त्मकसंधिपर्यन्तं पुनरग्रे सांनिध्यमतः पूर्वसन्धिमारभ्याग्रिमसन्धिपर्यन्तं लग्नव्यवहारः। एवं द्वितीयादिभा राम:
वव्यवहारोऽपि। इह भावस्य चरमविकलास्थो ग्रहो भावस्य राश्यंशक[लावि]कलाभिः समद्रतियावत्प्राधान्येन १५

तस्मिन्भावेमुख्येवर्ततइति तद्भावोक्तसमग्रफलदः।भावस्यचरमविकलातोविकलामात्रन्यूनाधिक्येस
मग्रफलस्यनाशोबाधितोऽनेनापि क्रमेणपूर्वभावसमाप्तिस्थलमँभावफलारम्भस्थलमेकंसंधिरूपमेव
सिद्धम्।तद्भावमारभ्याग्निमसंधिपर्यन्तंपूर्वभावफलस्यक्रमेणापचयः।तथापूर्वसंधिमारभ्याग्निमभाव
पर्यन्तमग्निमभावफलस्यक्रमेणोपचयः।सन्धौतुप्रथमभावस्यसमाप्तत्वादग्निमभावस्यानारम्भान्निष्फलो
ग्रहः।सन्धेरूनेग्रहेतुपूर्वभावफलस्यासमाप्तत्वात्पूर्वभावफलम्।सन्धेरधिकेऽग्निमस्यारम्भादग्निमभावफ
लमितिसर्वंशोभनम्।प्रथमभावचतुष्टयेसन्धित्रयेचसिद्धेसुगमोपायेनान्यभा वसन्धिसाधनंमिश्रोक्तपद्ध
तौ।त्रिद्विभावैक्यमाद्युक्तौद्वाभ्यांवेदैःसुतद्विषौ॥लग्नादिभावाःषट्षड्युक्ताःसप्तमकादयः॥१॥त्रिद्व्येकसम्भ
पस्त्वेकत्रीषुराशियुताःक्रमात्॥सन्धयःसुखतुर्थाद्याःसषड्भाःषडमीपरे॥२॥सुतरिपुभावसाधनवासना
मन्दावबोधार्थमव्यक्तक्रिययोच्यते।तत्रलग्नचतुर्थान्तरत्र्यंशाढ्यलग्नयोगेतृतीयभावोऽयंखण्डद्वया
त्मकोवृत्तः॥ल·च·अं·३ल·यो·१।चतुर्थसप्तमान्तरैकत्र्यंशःचतुर्थभावयोगेजातःपञ्चमोयम्।च·स·अं·१च·यो·भ
अनयोरन्तरंतृतीयभावेयावद्योज्यतेतावत्पञ्चमभावोभवतीत्यज्ञोपिजानाति।अतस्तयोरन्तरंसाध्यते।त

प्रौ॰म॰ त्रसंशोध्यमानेस्वमृणत्वमेतीत्यादिनातृतीयभावःखण्डद्व्यात्मकःऋणगतोजातः। अथलग्नेचतुर्थीद्विशो
१६ धितेलग्नचतुर्थान्तरमेवजातम्। अस्माल्लग्नचतुर्थान्तरस्यत्र्यंशद्वयेऽपनीतेएकएवत्र्यंशोऽवशिष्यते। तत्रचतु
र्थसप्तमान्तरत्र्यंशेयोजितेद्वयमेवस्यात्। यतउक्तंप्राक्त्र्यंशद्वययोगोद्वयमिति। अतोद्वययुतस्तृतीयःक्र
मःस्यादित्युपपन्नम्। एवमेवरिपुभावोपपत्तिरूह्या। शेषोपपत्तिरतिसुगमाबालावबोधाच। अथभावफला
भावंभावस्थानेभावफलसाधनंचवृत्तोत्तरार्द्धेनाह॥ ॥ शून्यंसन्धिषुभावगेऽखिलफलंस्याद्भावस
न्ध्यन्तरेणाप्तंसन्धिखगान्तरंक्षयचयंभावाधिकेऽल्पेखगे ॥३॥ सन्धिषुस्थितेग्रहेशून्यफलंस्या
त्। भावगेभावांशादितुल्येखगेअखिलफलंस्यात्। अखिलंसंपूर्णरूपमितमितियावत्। यतोऽत्रसर्वत्रहोरिकैः
संपूर्णताद्योतकंरूपमेवकल्पितम्। भावादधिकेखगेसतिसन्धिखगान्तरंभावसन्ध्यन्तरेणाप्तंभक्तंसत्क्ष
यमवरोहाख्यंफलंस्यात्। भावाल्पेखगेसन्धिखगान्तरंभावसन्ध्यन्तरेणाप्तंसच्चयमारोहाख्यंफलंस्यात्।
अयमत्राभिसन्धिः। भावादल्पेग्रहेआरम्भसन्धिग्रहान्तरमारम्भसन्धिभावान्तरेणभक्तंसद्ग्रहभावफलं रामः
स्यात्। एवंभावादधिकेविरामसन्धिग्रहान्तरंविरामसन्धिभावान्तरेणभक्तंसद्भावफलंस्यादिति। अत्रोप १६

पतिः।आरम्भसन्धिसमेग्रहे फलस्यारम्भस्ततः क्रमेणोपचयः । भावसमेसमग्रफलंरूपमितं· ततःक्रमे
णापचयः । विरामसन्धिसमेतुफलनाशः।तदुक्तंश्रीपतिभिः॥ भावप्रवृत्तौहिफलप्रवृत्तिः पूर्णंफलंभाव
समांशकेषु॥ ह्रासःक्रमाद्भावविरामकालेफलस्यनाशःकथितोमुनीन्द्रैरिति॥भावसमेग्रहेफलंपरमंतत्र
सन्धिखगान्तरमपिपरमंभावसन्ध्यन्तरतुल्यम्।सन्धितुल्येग्रहेफलाभावःसन्धिखगान्तराभावश्च।तस्मा
त्सिद्धमेतत्।सन्धिखगान्तरपरमत्वेफलपरमत्वंसन्धिखगान्तराभावेफलाभावइति।अथानुपातः।यदिभाव
सन्ध्यन्तरतुल्येनग्रहसन्ध्यन्तरेणरूपंफलंलभ्यतेतदेष्टसन्धिखगान्तरेणकिमिति।सन्धिखगान्तरस्वरूपं
गुणस्तस्याविकृतत्वान्नाशः।भावसन्ध्यन्तरंहरः।अतःसन्धिखगान्तरंभावसन्ध्यन्तरेणभक्तंभावफलंभवती
तिसिद्धम्।अतउपपन्नंभावसन्ध्यन्तरेणाप्तमित्यादि।अत्रेदंतत्वम्।यदिग्रहोभावादूनस्तदारम्भसन्धिर्ग्रहाद्भा
वाच्चविशोध्यः।यद्यधिकस्तदाग्रहोभावश्चविरामसन्धेःशोध्यः।ततउक्तवत्फलंसाध्यम्।यद्यत्रशोध्यंनशुध्यत्त
दाशोधकेद्वादशराशयोऽधिकाग्राह्याइत्यनुक्तमपिबुद्धिमताज्ञायते।फलस्यक्षयचयत्ववासनाप्रतिपादितप्र
मेयासुगमाच।अत्रविषयद्वैधादनुपातद्वयंकृतंसुन्दरमिश्रैस्तदेकेनैवानुपातेनभावफलंसाधयताभगव

कौ. भ. ताचार्येणनादृतंगौरवात्। ऋजुमार्गेणसिद्ध्यतोऽर्थस्यवक्रेणसाधनायोगादितिन्यायाच्च। केचित्तुग्रहेभ्योऽपिभाव
१७ साधनंकुर्वतेतत्प्रामाणिकैः श्रीनीलकण्ठश्रीधरश्रीपतिभिरनुक्तत्वादयुक्तत्वाच्चनादरणीयम्। किंच। ग्रहभा
वानीलकण्ठादीनामप्यभिमताभवेयुस्तदादृष्टिसाधनंभावैरेवकृतंस्यान्नतुवक्ष्यमाणप्रकारेण। यतोजातकेस्था
ननियमेनदृष्टिरुक्तास्ति। अपिच। लग्नदशाप्राथम्येलग्नाद्भावाःसन्तीतिभावफलगुणितानिग्रहबलानिदशाक्र
मबलानिस्वीकृतानि। एवंग्रहभावस्वीकारेरवीन्द्वोर्दशाप्राथम्येलग्नदशाप्राथम्यइवैतद्भावफलघ्नग्रहबलानि
दशाक्रमबलानिस्युस्तथासतिवक्ष्यमाणप्रकारेणखगोदयबलाद्धि· रिष्यनेनदशाक्रमवीर्यसाधनमुच्छिद्येत। त
स्माद्ग्रहेभ्योभावसाधनंनैवकार्यमितिसिद्धान्तः। एवंग्रहभावाभावेसिद्धेतत्कालमित्रामित्रादिसुनफानफादियो
गसूर्यचन्द्रकेन्द्रादिविचारेग्रहात्स्थानाधीनोव्यावहारिकमेषवृषादिसंज्ञराशिवशेनैवालग्नात्तुकेन्द्रादिस्थानं
द्विविधम्। मेषादिराशिरूपंभावरूपंचेति। तथासतियत्रप्राचामाचार्याणांराशिपर्यायपदपर्यन्तधावनं ग्ययभ
वनादित्यादौतत्रमेषादिराशिरूपाणिव्ययादिस्थानानिग्राह्याणि। यत्रतुदशान्तर्दशादौनराशिपर्यायपदोपादानं रामः
तत्रभावरूपाण्येवस्थानानिग्राह्याणीतिसंक्षेपः। इदानीमध्यायसमाप्तिंगाथेनाह॥ ॥इतिकेशवपद्धतौभावा १७

ध्यायइति॥ ॥इतिसमाप्तः। इतिहेतुप्रकरणप्रकर्षोदिसमाप्तिंषिस्समरः ॥ सवासनायासमकारिवृत्तिर्दिवाक
रेणामलकेशवोक्तेः॥ पितृव्यसंप्राप्तधियादिमोऽत्रभावाधिकारःसमगात्समाप्तिम्॥ इतिश्रीकृष्णदैवज्ञात्मजनृसिं
हस्यसुतेनदिवाकरेणरचितायांकेशवोक्तजातककर्मपद्धतेष्टीकायांसवासनायांप्रौढमनोरमाभिधायांभावा
ध्यायः प्रथमः॥१॥ ॥भावाध्यायस्यभावार्थंव्याख्यायगणकोत्तमः॥ दिवाकरोऽथदृष्ट्याख्यंव्याख्यातिविमलोक्ति
भिः॥१॥तत्रदृष्टिसाधनाध्यायंवृत्तेनैकेनाह॥ ॥ खैकाग्निद्विखवेदरामयमभूखाभ्राभ्रमेकादिभे दृ
ष्टावर्जितदृश्यकस्यगृहणाचेदष्टवेदेकृताः॥मन्देनाङ्क·यमेसृजानगगुणेङ्काभादिजाःसंस्कृताभाग
घ्नस्यषड्द्विखानल ३० लवेनाभ्युद्धृतादृग्भवेत्॥४॥ दृष्टावर्जितदृश्यकस्यैकादिभेएकादिराशिषुखै
काग्नीत्यादयोऽङ्काःस्युः। तत्रैकभेऽङ्कः खंशून्यम्। द्विभेएकः। त्रिभेअग्नयस्त्रयः। चतुर्भे द्वौ। पञ्चभे खम्। षड्भे वेदाः
चत्वारः। सप्तभेरामाः त्रयः। अष्टभेयमौ द्वौ। नवभेभूः एकः। दशभेखम्। एकादशभेअभ्रंशून्यम्। द्वादशभेअभ्रंशू
न्यम्। खाभ्राभ्रमित्यत्रसमाहारैकवद्भावः। पश्यतीतिदृष्टा। तेन दृष्टा· दर्शनार्होदृश्यः। दृश्यएवदृश्यकः। दृष्टा
वर्जितदृश्यकस्यैकादिभेएतेऽङ्काःस्युः। एकादिभइत्युक्तेकिमेतेराश्यादौराशिमध्येराश्यन्तेवाङ्काःस्युरितिसंशयः

ग्रो.म. स्यात्तन्निरासार्थमाह। आदिजादिति। द्वितीयादिराश्यादिजा इत्यादि बोध्यम्। गुर्वादीनां विशेषमाह। चेदिति। चेद्गुरु
१८ णा दृष्टावर्जितदृश्यकस्य अष्टवेदे भे अष्टमे चतुर्थे च कृताश्चत्वारोऽङ्काः स्युर्न तदा पूर्वोक्त इत्यध्याहारः। मन्देन शनैश्च
रेण दृष्टावर्जितदृश्यस्याङ्कः पञ्चमे भे नवभे द्विभे च कृताश्चत्वारोऽङ्काः स्युर्न तु पूर्वोक्ताः। असृजा भौमेन दृष्टावर्जितदृ
श्यस्य नगगुणे भे सप्तमे त्रिभे च कृताश्चत्वारोऽङ्काः स्युर्न पूर्वोक्ताः। एवं राश्यादावङ्कानुक्त्वा राश्यधःस्थांशानामङ्क
साधनं विशेषणद्वारेणाह। किंविशिष्टा अङ्काः। भागघ्नस्यपरद्विरसानललवेन संस्कृताः। एतदुक्तं भवति। रा
श्यादिजो योऽङ्कः सोऽग्निमाङ्काच्चेत्तुदुस्तदा वृद्धिर्यदाग्निमाङ्को राश्यादिजाङ्काच्चेत्तुदुस्तदाग्रे ह्रासोऽस्तीति वेदितव्य
म्। तेन स्वयेन वृद्ध्या वा गुणिता ये राश्यधःस्था भागास्ते त्रिंशता भाज्याः। लब्धेन तेऽङ्काः संस्कार्याः। कथम्। स्वयेहीना
वृद्धौ युक्ता इति। ततोऽङ्कयुक्ताश्चतुर्भक्ताः सन्तो दृग्भवेत्। अत्रेदमवधेयम्। गुरुणा दृष्टावर्जितदृश्यस्य पञ्च
मराशौ नवमराशौ च राश्यादिजोऽङ्कः पूर्वोक्तो द्विमितो न ग्राह्यः किन्तु चत्वारः। एषां क्रमशः पूर्वोक्ताभ्यां सहान्तरं वि
धायोक्तदिशा दृष्टिः साध्या यदा तु गुरुणा दृष्टावर्जितदृश्यस्य त्रिमितं शेषं तदा राश्यादिजोऽङ्कस्त्रिमितो ग्राह्योऽन्तरं च राम:
तुर्भिः सार्धं कार्यं न द्वाभ्यामिति। एवं सप्तमिते शेषेऽङ्कस्त्रिमितो ग्राह्योऽन्तरं चतुर्भिः सह विधेयं न द्वाभ्यामिति। एवं श १८

निभौमयोरपिबोध्यम्। एवंद्वादशभावानामप्युपरिभावान् दृश्यान्ग्रहान्द्रष्टॄन्प्रकल्प्यग्रहाणां दृष्टयोऽनेनैव प्रकारे
णसाध्याः। अत्रोपपत्तिः। बृहज्जातके। त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः॥ रविजा
मरेज्यरुधिराः परे च ये क्रमशो भवन्ति खलु वीक्षणेऽधिका इति। परे रविचन्द्रबुधशुक्राश्चकाराद्रविजादीनां समु
च्चयस्ततः परे चेत्यस्य समस्तादित्यर्थः। परे चेत्युपादानं तु क्रमप्रतिपादनार्थं वीक्षणेऽधिका इति वाक्यखण्डस्य
संपूर्णदृष्ट्याद्रष्टार इत्यर्थं प्रकटयितुं च। तृतीयदशमं शनिर्नवमपञ्चमं गुरुश्चतुर्थाष्टमं भौमः सप्तमं सर्वे संपूर्ण
दृष्ट्या पश्यन्ति। तृतीये। आदौ मध्येऽन्ते च सर्वत्र पादमिता दृष्टिर्नोचिता। कुत्रचिदेकत्रोचिता। तद्यावति मेषवृषा
दिभागेऽवस्थितस्य ग्रहस्य तृतीये तावत्येव भागे स्थिते ग्रहे द्विराश्यन्तर उत्सर्गसिद्धसाम्यलक्षणयुक्तेः सत्वात्तृ
तीयस्य मेषवृषादिसंज्ञत्वावहारिकराशेरवश्यंभावाच्च पादमिता दृष्टिर्न्याय्या। तथा नवराश्यन्तरेऽपि। एवं द्रष्टृग्र
हाच्चतुरष्टराश्यन्तरे द्विपादमिता दृष्टिः। त्रिसप्तभान्तरे त्रिपादमिता दृष्टिः। षड्भान्तरे संपूर्णा चतुःपादमिता दृष्टिः।
शेषेषु दशराश्यन्तरादिषु अनुक्तत्वाद्दृष्ट्यभाव इति सिद्धम्। एवं द्रष्टुरेकादिरा
श्यन्तरे दृश्ये सति सिद्धा दृष्टिपादा लिख्यन्ते। अत उपपन्नं खेकाग्निद्विखवेदरा

१	२	३	४	५	६	७	८	९	१०	११	१२
०	१	३	२	०	४	३	२	१	०	०	०

मयमभूत्खांभ्रांभ्रमेष्कादि भ इति। अथदृक्साधनोपपत्तिः। दृष्टुपेस्याद्दृश्यः कियतान्तरेणाग्रतोस्तीति ज्ञानार्थं
१९ दृश्योद्रष्टावर्जितः क्रियते। द्रष्टावर्जितदृश्यस्य यावत्संख्योराशिस्तदधोयोऽङ्कः सग्राह्यः। ततोराश्यर्धः स्थांशानां
दृक्साधनायानुपातः। यदि त्रिंशदंशे गते ष्याङ्कान्तरतुल्या वृद्धिः क्षयो वा लभ्यते तदा शेषांशैः किमिति। क्षयवृद्धि
गुणिता भागास्त्रिंशता भाज्याः फलेन गताङ्कः क्षये हीनो वृद्धौ युक्तः कार्यः॥ अतः सुष्ठूक्तं भागघ्नक्षयवृद्धिखानल
लब्धेन संस्कृता इति। एवं रूपचरणात्मिका दृष्टिर्भवति। चतुर्भिश्चरणै रूपमिति चतुर्भक्ता रूपादिका स्यात् इत्यु
पपन्नम्। अथविशेषदृगुपपत्तिः। गुरोश्चतुरष्टराश्यन्तरे शनेर्द्विनव राश्यन्तरे कुजस्य त्रिसप्तराश्यन्तरे संपूर्णा चतु
श्चरणात्मिका दृष्टिरतस्तद्राश्यन्तरे तेषामङ्कः श्चत्वारो न्याह्य इत्युपपन्नम्। प्रोक्तराश्यधिकान्तरे तु संपूर्णदृष्टेरपच
याद् त्रिमाङ्कै र्नसहान्तरं कृत्वा दृष्टिः साध्येत्यपि युक्तम्। अथ गुरोस्त्रिसप्तान्तरे त्रिपाद मिता दृष्टिश्चतुरष्टभान्तरे च
तुः पादमितामध्ये तु पादत्रयाधिका पादचतुष्टयादूना दृष्टिरुचिता। अतश्चतुर्भिः साकमन्तरं कार्यं न द्वाभ्यामेवं शनि
भौमयोरपीति सर्वं निरवद्यम्। एतद्दृष्टिसाधनमंतिलघुक्रिययोक्तं पराशरहोरायाम्। दृश्याद्विशोध्य द्रष्टारं षड्राशि रामः
भ्योधिकं भवेत्॥ दिग्भ्यो विशोध्य द्वाभ्यां तु भागीकृत्य च दृश्यः॥ १॥ पञ्चाधिके विना राशिं भागाद्विघ्नाश्च दृश्यः। वेदा १९

धिके त्यजेद्दूताद्भागाद्दृष्टिस्त्रिभाधिके ॥ २ ॥ विशोध्य युगतो द्वाभ्यां लब्धं खाग्नियुतं भवेत्। कराधिके विना राशिं भागा स्तिथियुतास्तथा ॥ ३ ॥ रूपाधिके विना राशिं भागा द्वाभ्यां विभाजिता इति ॥ अत्र विशेषदृक्साधनार्थं श्लोकाः ॥ भागा द्विनिघ्ना विधुभेन्तराले त्रिंशद्युतांशा गजभे र्कजस्य। दृष्टिर्भवेद्भूगदलोनषष्टिर्द्विभे द्व्‌भे द्विघ्नलवोनषष्टिः ॥ १ ॥ त्रिभे द्विभे शार्द्धयुतेषुवेदाः पश्येत जीवेन विहीन दृश्ये। द्विघ्नांशकोना युगभे तु षष्टिः सार्द्धांशकोना गजभे पि षष्टिः ॥ २ ॥ त्रिभेऽद्विभे भागविहीन षष्टिर्दृष्टिः प्रणीता धरणीसुतस्य। पञ्चावनीसंयुत सार्द्धभागाद्द्विभे द्व्‌भे षष्टिकलोन्मितैव ॥ ३ ॥ स्पष्टार्थाः सर्वे पि परमनेनप्रकारेण षष्ट्यंशात्मिका दृष्टिः स्यात्षष्टिभक्ता सती रूपादिका स्यादिति बोद्धव्यम्। वासनात्र श्रीपतिकृत दृष्टिसाधनवासनावज्ज्ञेया स्पष्टत्वाद्ग्रन्थबाहुल्यभयाच्च न मया लिख्यते ॥ यत्तु केनचित्प्र लपितं बृहज्जातके वीक्षणेऽधिकाद्युक्तेः रविजादीनां त्रिदशादिस्थाने अन्यग्रहापेक्षया वीक्षणे आधिक्यमात्रं न तु संपूर्णत्वं तथा सति पद्धत्युक्तं विशेषदृगानयनमसङ्गतमार्षग्रन्थानुक्तत्वादिति तच्चिन्त्यम्। पराशरजा तके विशेषदृगानयनस्योक्तत्वात्। तथा च पराशरवाक्यम्। शरवेदाः खरामाश्च तिथयो योजिताः क्रमात्। यथानिर्दे शं तु भौमानामेवं दृष्टिः स्फुटा भवेत् ॥ सारावल्यामपि। पूर्णं पश्यति रविजस्तृतीयदशमे इत्यादि। बृहज्जातकटीका

स्यामुत्पलग्नार्स्थाने चेद्दृशं तृतीयदशमस्थितान्ग्रहराशीन्सौनैश्चरः पश्यन्नन्यग्रहेभ्योऽधिकफलप्रदो भवति परिपू
र्णपश्यतीत्यर्थ इति। तस्माद्विशेषदृक्साधनमार्षमूलकमिति सर्वमवदातम्॥ ॥ सवासनायासमकारि वृत्तिर्दिवा
करेणामलकेशवोक्तेः॥ पितृव्यसंप्राप्तधियाखगानां दृक्साधनं तत्र समाप्तिमागात्॥२॥ इति श्रीरुद्रदेवज्ञात्म
जनृसिंहगणकस्य सुतेन दिवाकरेण विरचितायां केशवोक्तजातककर्मपद्धतेष्टीकायां सवासनायां प्रौढमनोरमा
भिधायां दृष्टिसाधनाध्यायो द्वितीयः॥२॥ श्रीमच्छिवाख्यस्य मतानुसारं प्राचां कृतिभ्यः परिगृह्य सारम्॥ खेचारिवीर्या
नयनाधिकारं दिवाकराख्यो विवरीवरीति ॥१॥ अथ बलसाधनाध्यायो व्याख्यायते। तत्र बलं द्विविधं ग्रहबलं
भावबलं चेति। आद्यं स्थानदिक्कालनिसर्गचेष्टादृग्भेदैः षड्विधम्। तत्रापि स्थानबलं पञ्चधा। दिग्बलमेकधा। काल
बलं चतुर्द्धा। निसर्गबलमेकधा। चेष्टाबलं त्रिधा। दृग्बलमेकधैव। एवं पञ्चदशधा ग्रहबलम्। द्वितीयं त्रिविधं स्वा
मिबलदिग्बलदृग्बलभेदात्। तत्र तावद्ग्रहबलं विवक्षुः स्थानबलभेदेषूच्चबलमाह॥ ॥ नीचोनो भगणाच्च्यु
तः षडधिकश्चेत्षड्गृहहृदौच्चं बलम्॥ ॥ नीचेनोनो यो ग्रहश्चेत्षडधिकस्तर्हि भगणाद्द्वादशराशिभ्यश्च्युतः शु रामः
द्धः चेत्षड्राश्यल्पस्तदा यथास्थित एवेत्यर्थतः सिद्धम्। ततः षड्गृहहृद्भक्तः सन् उच्चसंबन्धि औच्चं बलम्। उच्चबलं २०

रूपादिकं स्यादित्यर्थः। अत्रायमभिसंधिः। यदि नीचोनग्रहस्य संपूर्णाः षड्राशयः स्युस्तदा ते षड्भक्ताः पूर्णरूपमितं ब
लं स्यात्। यदि षडल्पास्तदा प्रथमरूपस्थाने शून्यं ग्राह्यम्। तद्राश्याद्यं षष्ट्या गुण्यं ततो विकलास्थानात्प्रतीपं स्वस्व
हारेण लब्धमुपर्युपरि संयोज्य यदूर्ध्वस्थाने भवति तत्पुनः षड्भिर्भाज्यम्। लब्धं शून्याधः षष्ट्यंशाज्ञेयाः। शेषं रा
श्यादिस्थानीयं पुनः षष्ट्या संगुण्य प्राग्वत्कृते यदूर्ध्वस्थाने निष्पद्यते तदपि षड्भिर्भाज्यं, लब्धं तदधो विषष्ट्यंशाः
एवं त्रिस्थं रूपाद्युच्चबलं भवति। यद्वा प्रथमं रूपस्थाने शून्यं ग्राह्यं ततो राशीन्षष्ट्या संगुण्य तत्र द्विगुणानंशान्सं
योज्य षड्भिर्भागे हृते लब्धं षष्ट्यंशाः स्युः। पुनर्यच्छेषं तत्षष्ट्या संगुण्य तत्र द्विगुणाः कलाः प्रक्षिप्य षड्भिर्भक्ते विष
ष्ट्यंशाः स्युरेवमग्रेऽपि। यद्वा नीचग्रहान्तरस्य षड्भाल्पस्यांशत्र्यंशः षष्ट्यंशाद्युच्चबलं स्यात्। तत्षष्टिभक्तं रूपादिकम
पि स्यादिति सुगमप्रकारोऽयम्। उच्चनीचविभागः सारावल्याम्। सूर्यादीनामुच्चाः क्रियवृषमृगयुवतिकर्कमीनतु
लाः॥ स्वोच्चे तु कथ्यभागा यथाक्रमेणैव परमोच्चाः॥१॥ दिग्वह्न्यष्टाविंशतितिथिबाणत्रिघनविंशतयः॥ स्वोच्चात्स
प्तमराशिर्नीचः स्याद्दशकैः परमः॥२॥ अथोपपत्तिः॥ ॥ सारावलीवाक्यम्। स्वोच्चे स्थितः शुभफलं प्रकरोति पूर्णं
नीचस्थितस्तु विफलत्वमिति। अत्रोच्चस्थे ग्रहे फलपरमत्वाद्बलं परमं रूपमितं। तत्र नीचग्रहान्तरमपि परमं षड्राशि

तुल्यं सतो नीचं ग्राचदपचयः नीचे फलाभावाद्बलाभावः तत्र नीचग्रहान्तराभावश्च ततउच्चं यावदुपचयः।
नीचग्रहान्तरतएवोच्चबलं साधयितुं युज्यते। अथानुपातः। यदि षड्राशितुल्येन नीचग्रहान्तरेण रूपं बलं तदेष्टेन
किमिति फलमुच्चबलं स्यात्। अतः सम्यगुक्तं नीचोनः षड्भहृदिति। परमनीचाद्ग्रस्येग्रहे ग्रहेणोनं नीचं कार्यं नी
चाद्ग्रस्येनीचोनो ग्रह इति। अत्राचार्यैः सर्वदा नीचेनैवोनो ग्रहः कर्तव्य इत्युक्तं तथाकृते उच्चाद्ग्रस्ये ग्रहे नीचग्र
हान्तरमुपचीयते। बलं त्व पचीयते। उपचीयमानादन्तरादपचीयमानं बलं साधयितुं न युज्यत इति भगणाच्छु
तं इत्युक्तम्। भगणाच्छोधिते नीचाद्यीचीनराश्यादि शिष्यते। एतत्तूच्चाद्ग्रस्ये प्रतिदिनमपचीयत इत्यस्मादप
चीयमानं बलं साध्यमिति युक्तम्। अथ षष्ट्यंशग्रहणोपपत्तिः। प्रथमं रूपस्थाने शून्ये गृहीते सत्यनन्तरं रूपस्य
षष्ट्यंशग्राह्याः। तत्र षष्ट्यंशानां षष्ट्या रूपमिति शेषं षष्टिगुणं कृत्वा षड्भक्ते षष्ट्यंशाः स्युरिति युक्तम्। एवं विषष्ट्यं
शषष्ट्या षष्ट्यंश इति शेषं पुनः षष्ट्या संगुण्य षड्भिर्भक्ते विषष्ट्यंशाः स्युरित्यपि साधु। अथ द्वितीयप्रकारवासना
प्रथमप्रकारान्तर्भूतोदाहरणमुररीकृत्योच्यते तत्र नीचोनो ग्रहो राश्यादिः ॥०॥१६।२६।२६। असौ षड्भक्तो लब्धं
रूपस्थाने शून्यं शेषं षष्टिगुणितमिदम्। ३।२।२६।२६।०। अत्र राशिस्थाने षष्टिगुणराशिद्विगुणांशयोगः। अंश

स्थाने कलाः। कलास्थाने विकला इति जातम्। एतत्षड्भक्तं कार्यम्। अतो राशीन्षष्ट्या संगुण्य तत्र द्विगुणानंशान्प्रक्षि
प्य षड्भिर्भक्ते लब्धं षष्ट्यंशाः स्युरिति सम्यगुक्तम्। पुनः शेषं २।५२।२६। षष्टिगुणम् १७२।२६। ।०। इह राशिस्थाने षष्टि
गुणे षड्द्विघ्नकलायोगोंऽशस्थाने विकलाः। इदं षड्भिर्भाज्यम्। अतः सुष्ठूक्तं द्विगुणाः कलाः संयोज्येत्यादि। एवमग्रे
ऽपि द्रष्टव्यम्। अथोच्चबलस्य द्वितीयप्रकारे युक्तिः। षड्राशितुल्ये नीचग्रहान्तरे बलं परममिति प्रागुक्तं तत्र षड्रा
श्यंशाः १८० अत्रैराशिकम्। यदि खाष्टेन्दुमितैर्नीचग्रहान्तरभागैः षष्टिषष्ट्यंशा लभ्यास्तदेष्टैः किमित्यत्र गुण
हरौ गुणेनापवर्त्य प्राप्तं हरस्थाने त्रयम्। अत उपपन्नं नीचग्रहान्तरस्य षड्राश्यंशानां त्र्यंशः षष्ट्यंशा उच्चबलमिति।
तथा च पराशरहोरायाम्। नीचोनं तु ग्रहं भार्द्धाधिकं चक्राद्विशोधयेत्॥ भागीकृत्य त्रिभिर्भक्तं फलमुच्चबलं भवे
दिति॥ इदानीं सप्तवर्गजबलमाह॥ ॥ स्वर्क्षे द्वं समभेऽष्टमस्त्रिचरणा मूलत्रिकोणे बलम्। मित्रर्क्षेऽङ्
घ्रिरधीष्टभे त्र्यदृभांशा वैरिभे षष्ट्यंशको दन्तांशोऽधरिभे ग्रहादिपवशात्त्वेवं स्यसप्तैक्यजम्॥ ५॥ अ
त्रायं गुरुसंप्रदायः। प्रथमं शत्रूमन्दसितावित्यादिना निसर्गमित्रामित्रसमचक्रं लेख्यम्। ततोऽन्योन्यस्य धनव्य
याय सहजव्यापारबन्धुस्थितादित्यनेन तात्कालिकमित्रामित्रचक्रं लेख्यम्। ततोऽधिसुहृन्मित्रादिभिः कल्पये

ग्री.म. दिति अधिमित्रादिचक्रं चलेख्यम्। ततः सप्तवर्गजबलज्ञानार्थं सप्तवर्गचक्रमधिमित्रमित्रस्वसमवैर्यधिवैरुप
२२ लक्षितसप्तवर्गेशान्वितं लेख्यमिति। अथ व्याख्या। स्वस्य क्षेत्रे राशावर्थाद्ग्रहे सति अर्द्धं बलं स्यात्, समराशिस्थे ऽष्ट
मांशो बलं, मूलत्रिकोणराशिस्थे त्रयश्चरणाः, मित्रराशिस्थे चतुर्थांशः; अधिमित्रभस्थे त्रयोऽष्टमांशाः; शत्रुराशिस्थे
षोडशांशः; अधिशत्रुराशिस्थे द्वात्रिंशदंशो बलं स्यादिति सर्वत्र संबन्धः। अर्द्धाष्टमांशादिरूपस्येत्यर्थः सिद्धम्। अ
त्र सर्वत्र राशिपदं होराद्युपलक्षकं तेनायमर्थः संपन्नः। स्वराशिस्थे स्वहोरादिस्थे वा ग्रहे रूपार्द्धं बलं स्यादेवमि
तरत्रापि। इदमत्रावगन्तव्यम्। ग्रहो यदा स्वमूलत्रिकोणराशेर्होराद्यवस्थितो भवति तदा चरणत्रयं बलं न ग्रा
ह्यं किंतु मूलत्रिकोण राशेर्योऽधिपतिः सोऽधिमित्रादिषु यद्भवति तदुक्तं बलं ग्राह्यं ग्रहादिपदवशादित्युक्तत्वात्।
यदत्र विशेषेण मूलत्रिकोणग्रहणं कृतं ततः केवलं गृह एव मूलत्रिकोणान्वयो न होरादिष्विति। तथोक्तं श्रीधरा
चार्यैः। स्वगृहादिगतानां यद्ग्रहाणामुदितं बलम्। तदेव सप्तवर्गेपि तदीशस्य वशाद्भवेदिति। तदीशस्य होरादिस्वा
मिनः। स्वाधिमित्रत्वादिवशात्स्वगृहादिगतानामेव यद्बलमुक्तं तदेव गृहस्योक्तत्वाद्गृहातिरिक्तसप्तवर्गे बलं भव ग्रमः
ति। अत्र स्वगृहादीत्युक्तत्वाद्धोरादिषु न त्रिकोणान्वय इति सिद्धम्। मूलत्रिकोणानि बृहज्जातके। सिंहो वृषः प्रथम ष २२

थहयाङ्गतौलिकुम्भास्त्रिकोणभवनानिभवन्तिसूर्यादिति।स्वोच्चत्रिकोणस्वगृहाणांत्रयाणांद्वयोर्वासांकर्येप्यस्य
सारावल्याम्।विंशतिरंशाःसिंहेत्रिकोणमपरेस्वभवनमर्कस्य॥उच्चंभागत्रितयंवृषइन्दोःस्यात्त्रिकोणमपरेंशाः
॥१॥द्वादशभागामेषेत्रिकोणमपरेस्वभंतुभौमस्य॥उच्चमथोकन्यायांबुधस्यतुङ्गांशकैःसदाचिन्त्यम्॥२॥परत
स्त्रिकोणजातंपञ्चभिरंशैःस्वराशिजंपरतः॥दशभिर्भागैर्जीवस्यत्रिकोणंधनुषितत्परंस्वगृहम्॥३॥शुक्रस्यचति
थ्यंशास्त्रिकोणमपरंस्वभंतुलायांतु॥कुम्भेत्रिकोणस्वगृहेरविजस्यरवेर्यथासिंहेइति।मुहूर्तदर्पणेपि।सिंहे
विंशतिरादितोगविपरेसर्वेंशकास्तुङ्गतोमेषेद्वादशपञ्चयोषितिपरेतुङ्गाद्धयाङ्गेदश॥जूकेपञ्चदशांशाऽद
ऽघटेदृमेमूलत्रिकोणाह्वयाःसूर्यादेःक्रमशोग्रहस्यकथिताःशेषाःस्वराश्यंशकाः॥१॥गुणाकरस्तुसूर्यजीवभृ
गुभानुसुतानांखांशैर्मूलत्रिकोणभवनमितिशास्त्रविरुद्धंब्रुवन्स्वाज्ञानमेवाविष्कार।तस्मात्सारावलीवाक्यानां
प्रामाणिकत्वाद्वृद्धोत्पलेनापिबृहज्जातकटीकायामुदाहृतत्वाच्चतेभ्यएवनिर्णयःकार्यः।गुणाकरस्यतुद्रेष्काण
बलद्वयात्राप्ययथार्थाभिधायित्वात्तदुक्तमप्रमाणमेवेतिमन्तव्यम्।अत्रोच्चबलस्यपृथगेवानीतत्वादुच्चस्यानपेक्षि
तत्वान्मूलत्रिकोणस्वगृहनिर्णयस्यैवापेक्षितत्वाच्चसंपूर्णएववृषराशिरिन्दोस्त्रिकोणम्।किंचचन्द्रस्यवृषराशौ

प्रौ·म· प्रधानमेकं मूलत्रिकोणबलमेव ग्राह्यं नतु मित्रादिसंबन्धवशादन्यदपीति बोध्यम्। बुधस्य तु कन्यायां ति। ।।
२३ लंशास्त्रिकोणम्। परे दशांशाः स्वगृहम्। यत्र तु स्वत्रिकोणस्वगृहाणां त्रयाणामप्यपेक्षा तत्र स्वोच्चे रूपमित्यादि
यथोक्तैव व्यवस्था॥ ॥ एवं स्वादिभादिगतानां ग्रहाणां बलमुक्त्वेदानीं सप्तसु वर्गेषु तत्स्थापनमथ च तदेको
सप्तवर्गजबलं भवतीत्याह। गृहादिपवशादित्यादिना। खेटस्य गृहादिपवशाद्गृहमादिर्येषां ते गृहादयः आ
दिशब्देन होराद्रेष्काणादीनां संग्रहः। गृहादीन् पान्ति ते गृहादिपाः गृहादिसप्तवर्गस्वामिनस्तेषां वशात्स्वर्क्षेद्धमि
त्रादीनि सप्तवर्गबलानि ग्राह्याणि। तेषां सप्तानामेकयाज्ञायते तत्तथा। एवंविधं बलं सप्तवर्गजबलं स्यादित्य
र्थः। एतदुक्तं भवति। यस्य ग्रहस्य सप्तवर्गजबलं ज्ञातुमिष्टं तस्य गृहादिस्वामी स्वाधिमित्रादिषु यद्भवति तदुक्तं
बलं ग्राह्यमिति। अत्र कश्चिदेवं व्याचष्टे। ग्रहो यस्मिन् गृहे होरादौ वास्ति तद्गृहस्वामी होरादिस्वामी वा चेन्मूलत्रि
कोणेस्ति तदा त्रिचरणं बलं स्वगृहे चेद्रूपार्धमित्यादि। तन्नश्रद्धेयम्। निखिलजातकशास्त्रविरोधात्। किंचात्र गृ
हादिपवशादित्युक्ते भ्रान्तिरपि संभवति। परं प्राचीनग्रन्थे केनापि तथा नोक्तमिति भ्रान्त्यनवकाशादिति मिश्रा ऊ रामः
चुः। तथा च सारावलीवाक्यम्। स्वोच्चे स्थितः शुभफलं प्रकरोति पूर्णं नीचार्कगस्तु विफलं रिपुमन्दिरेऽल्पम्। पादं फ २३

लस्यहितभेस्वगृहे तथार्द्धपादत्रयं गगनगाः स्थितवांस्त्रिकोण इति। अत्र स्वोच्चादिस्थानेषु स्थितवान् गगनगो ग्रहः
संपूर्णादिशुभं फलं ददातीत्युक्तं परं स्वोच्चादिषु स्थितो ग्रहस्वामी संपूर्णादि फलं ददातीति नोक्तमेव तस्माद् गृहादि
स्वामिनि स्वभस्थे रूपार्द्धबलमित्यादिव्याख्या मम सदैवेति प्रतीमः। पराशरजातकेपि। मूलत्रिकोणस्वर्क्षाधिमि
त्रमित्रसमारिषु॥ अधिशत्रुगृहे चापि स्थितानां क्रमशो बलमिति। अत्रापि मूलत्रिकोणादिस्थितानां वर्गेशानां बलं
स्यादिति नाभिहितमेव। पुनर्भवेदेवम्। त्रिकोणादौ स्वोच्चे चोभयत्रापि गगनगपदस्य संबन्धाद्विनिगमनाविरहा
दुच्चबलमपि यदि नीचगृहस्वामिग्रहान्तरतः साधितं स्यात्तदुच्चबलं तथा न साधितमतः केनचित्परविश्वासा
यद्व्याख्यातं तन्न सुधीभिरादरणीयम्। यत्तु केशवसांवत्सरैः स्वकृतटीकायामुक्तं ग्रहो यस्मिन् गृहेस्ति तद्गृहस्वा
मितः स्वर्क्षादुक्तबलं ग्राह्यमिति। तदपि सर्वप्राचीनग्रन्थाविरोधायान्यथा व्याक्रियते। ग्रहो यस्मिन् गृहेस्ति तद्गृ
हस्वामी चेत्स्वयमेव तदा रूपार्द्धबलं यद्यधिसुहृत्तदा त्रयंशा इत्यादि एवं होरादावपि॥ ॥ अथोपपत्तिः॥
बृहज्जातके। स्वोच्चत्रिकोण स्वसुहृच्छत्रुनीचगृहार्कगैः॥ शुभं संपूर्णपादोनदलपादाल्पनिष्फलमिति॥
एवं फलतारतम्यनिर्देशात्फलसदृशगेनैव स्वोच्चादिग्रहबलेन भवितव्यमतः स्वोच्चे रूपं मूलत्रिकोणे त्रिचरणं

स्वगृहेऽर्द्धपादोमित्रगृहेरिपुगृहेत्वंनोचेफलाभावःद्वलाभावइतिसिद्धम्।एवंतारतम्यवशादवशिष्टाधिमित्र
समशत्रुमहाधिशत्रुगृहेषुफलंबलंचन्याय्यम्।तत्रादावधिमित्रगृहेसाध्यते।अधिमित्रगृहेस्वगृहापेक्षयान्यून
तामित्रगृहापेक्षयाधिक्यमितिप्रसिद्धम्।अतःस्वगृहाद्यावतीन्यूनतातावत्येवमित्रगृहादधिकतेतिन्यूनत्वाधि
कत्वमर्द्धंव्यवस्थितम्।ततःस्वगृहमित्रगृहबलयोरन्तरार्द्धेऽस्मिन् ७।२० स्वगृहबलाद्धीनेमित्रगृहबलेवायो
जितेऽधिमित्रगृहबलंजातमिदम्। २२।३०।अनेनार्द्धाधिकंमित्रमधिमित्रमित्यधिमित्रशब्दस्यमुख्यार्थोऽपिव्यक्ती
भूतइत्याहुःप्राञ्चः।तद्यथा।अधिमित्रेमित्रापेक्षयाऽर्द्धमित्रताऽधिका।एवमधिमित्रशब्दोपम्यादधिशत्रौशत्रोर
पेक्षयार्द्धशत्रुताऽधिका।अथसमगृहे।तत्रसमशब्दार्थोद्विधाअर्द्धमित्रमर्द्धशत्रुरित्येकः।नमित्रंनशत्रुश्चेतिद्विती
यः।ततःशत्रुगृहेदशबलमित्युक्तेद्विगुणशत्रुगृहेऽर्थाद्यथापञ्चबलंप्राप्यतेतथाऽर्द्धशत्रोरपेक्षयाशत्रौद्विगुणत्व
मितिसमेऽर्द्धशत्रुतासत्त्वाच्छत्रुगृहबलाद्द्विगुणम्।अर्द्धमित्रतासत्त्वान्मित्रगृहबलस्यार्द्धंयथास्यात्तथासमगृहब
लंन्याय्यमतोमित्रगृहबलार्द्धं ७।३० जातंसमगृहबलम्।एतदेवशत्रुगृहबलाद्द्विगुणमित्यंस्यार्द्धं ३।४५ शत्रुगृ
हबलमपिसिद्धम्।समेनमित्रंनशत्रुरितिसमान्मित्रतोऽपचयेमित्रगृहबलेमित्रतानिबन्धनंसमगृहबलाधवद

त्वर्त्तावदेवान्तरमपचीयमानमेवं शत्रुतानिबन्धनं शत्रुगृहबले वाच्यमितियुक्तम्। शून्यं बलमत्रायाति। एतच्चबा
धितम्। रिपुमन्दिरेऽल्पमित्यल्पफलोपस्येनात्राल्पबलस्यावश्यकत्वान्नोचएवफलाभावस्योपपादितत्वाच्च। अथा
धिशत्रुगृहे समे शत्रुत्वमित्रत्वाभावात्ततः शत्रुतोऽपचयेन शत्रुगृहबले शत्रुतानिबन्धनः समगृहबलाद्यावान्न्त्वा
सस्तावानधिशत्रोरपेक्ष्या शत्रोरर्द्धं शत्रुताधिक्यान्निजार्द्धसहितः ५।३७।३० समगृहबलादूनः ७।३० सन्नधिशत्रु
गृहबलं जातम्। १। ५२। ३०। अत्र शत्रुगृहबलस्य समगृहबलेनैव सिद्धत्वादधिशत्रुगृहबलस्यापि समगृहबलाधी
नेयमेवं प्रसिद्धिर्न्यायानान्या। एवं मह बलमुपपन्नम्। अथ स्वाधिमित्रादिहोरादावपि स्वाधिमित्रादिसंबन्धसाधार
ण्यात्स्वाधिमित्रादिगृहबलमेव बलं युक्तम्। वर्गे स्वाधिमित्रमित्रादीनां पतीनामुपात्तत्वाद्गृहादिपवशादितिसिद्धम्।
बृहज्जातके स्वत्रिकोणनवांशैः। स्वस्यत्रिकोणं च नवांशश्च तैरित्यर्थः। पश्चात्त्वपदेनाधिमित्राद्योनवांशपदेन होरा
द्यश्च लक्षिताः॥ इतिसप्तवर्गबलोपपत्तिः सुन्दरमिश्रोदिता॥ अथ युग्मायुग्मराशिनवांशबलमाह॥ ॥ शुक्रेन्दू
समभांशके हि विषमेऽन्येदद्युरङ्घ्रिं बलम् ॥ ॥ समभांशके स्त्रीराशिनवांशके स्थितौ शुक्रेन्दू हीतिनि
श्चयेनाङ्घ्रिं रूपचतुर्थांशं बलं दद्याताम्। भं चांशकश्च भांशकमित्यत्र द्वन्द्वैकवद्भावः। समं च तदंशकं च समभांश

गौ.म. कं तस्मिन्। अयमर्थः। स्त्रीराशौ स्त्रीराशेर्नवांशे वा यदि शुक्रेन्दू भवतस्तदा रूपचतुर्थांशो बलं यदा तु स्त्रीराशौ स्त्रीरा-
२५ शेर्नवांशे चोभयोः स्थितौ भवतस्तदा पादद्वयं बलमित्यार्थसमाजमहिम्नैवोपलब्धम्। अन्ये सूर्यभौमबुधगुरुशन-
यः विषमे भांशके पुंराशिनवांशे अङ्घ्रिं बलं दद्युः। पुरुषराशौ पुरुषराशिनवांशे वा स्थिताः सूर्यादयः पादबलं दद्युः।
यदा तु पुंराशौ पुंराशिनवांशे च स्थिता भवन्ति तदा पादद्वयमित्यर्थः। अत्र विषमपदस्य पुमर्थोपलक्षकत्वं स-
मपदस्य च स्त्र्यर्थोपलक्षकत्वमतो वृषस्य द्वितीयनवांशे स्थितस्य सूर्याद्यन्यतमस्य द्वितीयनवांशस्य युग्मत्वा-
त्पादबलं न स्यादिति भ्रमो निरस्तः। अत्र द्वितीयनवांशः कुम्भस्येत्यस्य पुंभात्मकत्वमेव। अत्रोपपत्तिः। स्त्रीराशिषु
स्त्रीग्रहाणां पुरुषराशिषु पुरुषग्रहाणां बलाधिक्यं प्रसिद्धम्। तथा चात्र मेषाद्याः पुंस्त्रीसंज्ञाश्चरस्थिरद्विस्वभावसं-
ज्ञा इत्यादिना समराशीनां स्त्रीत्वं विषमराशीनां पुरुषत्वमुक्तम्। तथा बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युव-
ती नराश्च शेषा इति शशिशुक्रयोः स्त्रीग्रहत्वं चातस्तयोः समराश्युपलक्षिते स्त्रीराशौ बलाधिक्यम्। तथैवेतरेषां
पुरुषग्रहाणां विषमराश्युपलक्षिते पुरुषराशौ बलाधिकत्वम्। अत्र शनिबुधयोर्नपुंसकत्वेपि पुरुषाकृतित्वात्पुं- राम:
ग्रहेष्वन्तर्भावः। तथा च लघुजातके। चन्द्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः। बलिनः इति। राशिसमांशस्तत्तांशेपि २५

बलंसिद्धम्। किंचात्रद्वाविन्दुशुक्रौयुग्मांशेतिथिरोजांशंकाःपरद्ति। पराशरवाक्येपिअंशेबलमुक्तम्। यथासप्तव
र्गबलेग्रहबलंनवांशबलंचस्वतन्त्रंतद्वद्त्रापिपुंस्त्रीराशिबलंपुंस्त्रीराशिनवांशबलंचोभयंस्वतन्त्रमेव। अतोयुग्म
राशिगतत्वेसतियुग्मांशगत्वंविवक्षितम्। तयोरन्यतमेस्थितस्यपादबलंनोत्पद्यतइतिसूर्यज्योतिर्विदांमतंपरास्त
म्। जातकसंग्रहे। मित्रगेहबलद्रेष्काणबलपुंस्त्रीराशिनवांशबलानांफलसाम्यनिर्देशान्मित्रगेहेयद्बलंतद्देषांत्र
याणामितिविशेषयुक्त्यापादबलंसिद्धम्। यदातुशुक्रेन्दूसमभेसमभांशेचभवतस्तदोभयोरपिस्वतन्त्रत्वात्पादद्वयं
बलंयुक्तियुक्तमितिगुरुचरणाः॥ येपिताव्त्रिकाः। समभेसमभांशेवास्थितयोःशुक्रेन्द्वोःपादोबलमुभयत्रापिस्थित
योरपिपादएवबलंनपादद्वयमित्याहुस्तदविचारितरमणीयम्॥ अथकेन्द्रादिबलमाह॥ ॥ केन्द्राद्येषुचरूप
कार्द्धचरणान्यच्छन्तिखेटाःक्रमात्॥ ॥ केन्द्रमाद्योयेषांतानिकेन्द्राद्यानिकेन्द्रपणफरापोक्लिमानितेषु
स्थिताःखेटाःक्रमाद्रूपकार्द्धचरणान्बलानियच्छन्तिइति। रूपमेवरूपकंस्वार्थकप्रत्ययः। अर्द्धंरूपार्द्धंचरणोरूप
चतुर्थभागः। क्रमादितिकेन्द्रस्यारूपबलंपणफरस्यारूपार्द्धम् आपोक्लिमस्याःपादबलंदद्युरित्यर्थः। केन्द्रादिसंज्ञा
बृहज्जातके। कण्टककेन्द्रचतुष्टयसंज्ञाःसप्तमलग्नचतुर्थखभानाम्। केन्द्रात्परंपणफरंपरतश्चसर्वमापोक्लिममिति।

अत्रकैश्चिद्भावस्वीकारःकृतस्तन्मतंनग्राह्यमितिद्योतनार्थंचकारः।अथोपपत्तिः।भगवान्गर्गः।केन्द्रस्थःपूर्णबलो
मध्यमबलःपणफरस्थितस्तद्वत्।आपोक्लिमगःप्रोक्तोहीनबलःखेचरोमुनिभिरिति।केन्द्रेस्थितस्यसंपूर्णबलम्।
संपूर्णतारूपात्मिकेतिरूपंबलम्।पणफरस्थस्यमध्यबलंमध्यंत्वर्द्धरूपत्वमवस्थितमित्यर्द्धरूपंबलम्।एवंस
तिपणफरापेक्षयाकेन्द्रस्थस्यद्वैगुण्यमित्यनयैवयुक्त्यापोक्लिमस्थस्यापेक्षयापणफरस्थस्यद्वैगुण्यंसिद्धमतः
पणफरस्थबलार्द्धपादोहीनबलमापोक्लिमस्थस्य।अतःसर्वमुपपन्नम्।अत्ररत्नावलीकारेणभावस्वीकारःकृ
तः।तथाचतद्वाक्यम्।केन्द्रादिप्राप्ताद्युसदोत्रभावफलंतदर्द्धंचरणोन्मितंचेति।नचैतद्युक्तंमुनिभिरनुक्तत्वात्।
तथाचपराशरः।केन्द्रादिषुस्थितालभ्यास्त्वष्टिःत्रिंशत्तिथिःक्रमादिति।आचार्येणाप्युक्तम्।अत्रकेचिद्भावफलष-
ष्ट्यंशकल्पनयात्रैराशिकमिच्छन्ति।तदप्ययुक्तमिति।क्वचित्पुस्तकेतदपियुक्तमितिदृश्यतेतल्लेखकदोषात्सति
तमितिबोध्यम्।अतःसूर्यगणेशदामोदरादिभिर्भावस्वीकरणंकृतंतदार्यग्रन्थविरुद्धत्वाद्बुधस्याप्यनुपातेनन
तोन्नतबलसाधनमिवोपेक्षणीयम्।इदानींद्रेष्काणबलमाह॥ ॥स्त्रीखेटौचरमेनराःप्रथमकेक्लीबौच
मध्येतथाद्रेष्काणेवितरन्तिपादम्॥ ॥स्त्रीखेटौचन्द्रशुक्रौयत्रक्वापिराशौचरमेतृतीयस्मिन्द्रेक्काणेस्थि

तौ पादं बलं दत्तः। नराः सूर्यभौमगुरवः प्रथमके द्रेष्काणे पादं बलं वितरन्तिद्दति। क्लीबौ नपुंसकाख्यौ बुधशनी म
ध्ये द्रेष्काणे पादं बलं ददाते। अत्रोपपत्तिः। पराशरः। आदिमध्यावसानेषु द्रेष्काणेषु स्थिताः क्रमात्॥ पुंनपुंसकयोषा
ख्याद्युस्तिथि बलं ग्रहा इति। सारावल्यामपि। पुंस्त्रीनपुंसकाख्याः क्षेत्रेष्वाद्यन्तमध्यसंप्राप्ताः॥ बलिन इति। अतः
केशवश्रीपत्यादिभिराचार्यैर्यदुक्तं तत्समूलमेव। यत्तु होरामकरन्दे। क्षेत्रादिमध्यान्तगतान् योषिन्नपुंसकाख्या
बलिनः क्रमेणेति गुणाकरेणोक्तं तदिति भ्रान्तिविलसितम्। यद्यपि विज्ञानशून्येन ज्ञानराजसुतेन सूर्येण श्रीप
तिपद्धतिटीकायामेतदाचार्यैः केषांचिन्मतमङ्गीकृतम्। यतो दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवन
समध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालमिति ब्रुवतां वराहादीनामनभिमतमि
त्यगादित्यप्यसत्। दिनकररुधिरावित्यादि वराहवाक्यस्याष्टवर्गफलविषयत्वात्। उत्पलेनाप्येवमेवोक्तम्। अ
तो वराहादीनामाशयमजानता सूर्येण यदभिधायि तदयुक्तमिति सिद्धम्॥ अथोपसंहरति॥ ॥ उदितं स्यात्स्था
नवीर्यं त्विदम्॥ ॥ इदं यत्पञ्चधा बलमुदितं कथितं तत् स्थानवीर्यं स्यात्। पञ्चानां योगे स्थानबलं स्यादित्यर्थः।
अमुमेवार्थं प्रकटयितुं तु शब्दोपादानमत्रेति बोध्यम्। एवं सभेदं स्थानबलमुक्त्वाधुना क्रमप्राप्तं दिग्बलमाह॥

प्रौ.म. ॥ ॥ मन्दाल्लग्नमिनात्कुजाच्च हिबुकं शोध्यं विधोर्भार्गवान्माध्यं ज्ञाद्गुरुतोस्तमत्र रसभायुक्तं त्यजेच्च
२७ क्रतः ॥ दिग्वीर्यं रसहृत्तु ॥ ॥ स्पष्टम् । तुशब्दोत्र भजनविधिरुच्चबलानयने प्रागुक्तः स एवेति ज्ञापनार्थम् ॥
अत्रोपपत्तिः ॥ दिग्बलं नाम यो ग्रहो यस्यां दिशि बलवानुक्तस्तदुत्पन्नं बलम् । एवं ग्रहाणां दिक्संबन्धेन बलोत्कर्षा
पकर्षौ मिहिरागमप्रामाण्यतः सिद्धौ । तदुक्तं वराहमिहिराचार्यैः । दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशी
तकरौ चेति । एवं ग्रहाणां दिक्क्रमस्तु राशिचक्र एव कल्पनीयो भवति तथा लग्नचतुर्थसप्तमदशमभावाः सव्यक्र
मेण पूर्वोत्तरपश्चिमयाम्यदिक्स्थानीया इति प्रत्यक्षतो लक्ष्यन्ते । यतः क्रान्तिमण्डलक्षितिजसंपातोपलक्षित
स्य प्राग्लग्नस्य सूर्योदयादितः प्रवृत्तिर्दृष्टा सूर्योदयस्तु प्राच्यामेवेति लग्नस्य पूर्वदिक्स्थानीयत्वम् । तथैव प्र
त्यक्क्षितिजे वस्थितस्यास्तलग्नस्य पश्चिमदिक्स्थानीयत्वम् । अथ लग्नास्तोपलक्षितयोः प्रागपरयोर्मध्ये स
म्यदक्षिणस्थितयोश्चतुर्थदशमभावयोः क्रमेणोत्तरदक्षिणदिक्स्थानीयत्वम् । तत्र यथोक्तदिशि ग्रहस्य संपू
र्णबलं ततो यथा यथा विप्रकर्षस्तथा तथा बलस्य ह्रासः । परमविप्रकर्षे बलाभावलक्षणः परमो ह्रासो युक्तः । प रामः
रमविप्रकर्षस्तु यथोक्तदिशातः क्रान्तिवृत्तार्द्धे निजनिजसप्तमभावात्मके । अत्रानुपातः । बलाभावलक्षणा २७

द्यथोक्तभावाद्वीगग्रतोपिक्रमेणबलस्योपचयेषड्राशिभिः संपूर्णरूपंबलंभवतीतिग्रहाद्रूलाभावलक्षणंभु
वंविशोध्यशेषंषड्राश्यल्पंषड्भिर्भक्तंफलंदिग्बलम्।षड्राधिकेतुशेषेचक्राद्विशोधितेबलाभावलक्षणाद्भावाद
र्वाचीनराश्यादिःशिष्यतद्दत्वसौषड्भक्तःफलंदिग्बलमितिसुगमम्।अत्रशेषंराश्यादिदशगुणंलवादितोद्विगु
णंचषष्ट्यंशाद्यंबलंस्यादितिसुगमोपायोवेद्यः॥ ॥अथकालबलंनिरूपयिषुस्तावन्नतोन्नतबलमाह॥ ॥अ
थोसमम्यजंरूपंसदास्याद्विदस्त्रिंशद्वृकनतोन्नतेशशिकुजार्कीणांपरेषांबले॥ ॥ अथेति।दि
ग्बलकथनानन्तरंसममजंकालजंबलमुच्यते।विदःबुधस्यसदेतिदिनरात्रौचरूपंबलंस्यात्।त्रिंशद्वृक्तनतोन्नते
शशिकुजार्कीणांपरेषांचबलेभवतः।नतंचउन्नतंचनतोन्नते त्रिंशताभक्तेत्रिंशद्वृक्ते।त्रिंशद्वृक्तेत्वतेनतोन्नते
चत्रिंशद्वृक्तनतोन्नते।अत्रैतदुक्तंभवति।प्रागानीतंनतंघटिकाद्यंत्रिंशद्वृक्तंसचन्द्रभौमशनीनांबलंभवेत्।उ
न्नतंत्रिंशद्वृक्तंसत्परेषांरविगुरुशुक्राणांबलंस्यात्।अत्रयुक्तिः।बृहज्जातके।निशिशशिकुजसौराःसर्वदा
ज्ञोह्निचान्यइति।बुधःसर्वदारात्रौदिनेपिबली।चन्द्रभौमशनीनांरात्रौबलमर्थाद्दिवात्रान्येषांबलाभावः।रविगुरुशु
क्राणांदिवसेबलमर्थाद्रात्रान्येषांबलाभावइतिदिनकरकरनिकरप्रकाशशालित्वलक्षणस्यादिनस्यमध्यमेहिदिवस

 रत्रकाशोत्कर्षशालित्वादुत्कर्षता नतोदिनबलानामिह संपूर्णरूपंबलम्।नक्तंबलानांत्वत्रबलाभावः।एवंन
 ईरात्रस्यमहानिशात्वान्निशायामर्द्धरात्रस्यमहत्वम्।अतोरात्रिबलानांरूपंबलम्।अत्रदिनबलानांतुबलाभावः।
मध्याह्नेउन्नतत्वपरमेमध्यरात्रेतुनतंपरममितिप्रसिद्धम्।अतःसिद्धमेतत्।उन्नतपरमत्वेदिनबलानांबलपरमत्व
म्।उन्नताभावेबलाभावइति।एवंनतपरमत्वेनक्तंबलानांबलपरमत्वंनताभावेबलाभावइति।अथानुपातः।य
दित्रिंशत्तुल्याभिर्नतोन्नतघटीभीरूपमितिबलेलभ्येतेतदेष्टनतोन्नतनाडीभिः किमिति।नतोन्नतेत्रिंशद्धृतेस
तीनिशादिनबलवतांवीर्यैकमाद्धृतंइतियुक्तम्।अत्रलाघवार्थंपद्यमयोक्तम्।द्विघ्नंनतंप्राक्परिसाधितंयत्तमी
शसौरबलंभवेत्तत्।षष्टिच्युतंस्यादितरग्रहाणामहर्निशंत्र्यस्यतुषष्टिरेव॥१॥अत्रकेनचिन्मन्दमतिनानिज
निजाहोरात्रवशाद्ग्रहाणांनतंसाध्यमित्युक्तंतन्निवारणायप्राक्परिसाधितमित्युक्तम्।सूर्यस्येतियावत्।तथा
बुधस्यापिनतोन्नतानुपातेनबलंसाध्यमित्युक्तंतद्वारणायषष्टिरेवेत्युक्तम्।शेषंस्पष्टम्॥अथपक्षबलमाह॥१॥
॥ ॥ शुक्लेन्त्येतिथि१५हृद्धृतेष्यतिथयोवीर्यंसतांभूच्युतंपापानांद्विगुणंविधोरिदम्॥ ॥ शुक्लेशु
क्लपक्षेअन्त्येकृष्णपक्षेतिथिभिःपञ्चदशभिः१५ह्रियन्तेभज्यन्तेतेतथा ताहशागतैष्यतिथयःसतांशुभग्रहाणां

चन्द्रगुरुशुक्राणांपापवियुतस्यबुधस्यचवीर्यंस्यात्।तदेववीर्यंभुवःरूपाच्च्युतंशुद्धंसत्पापानांसूर्यभौमशनीनां
मेतेषामन्यतमेनयुतस्यबुधस्यचवीर्यंस्यात्।एतदुक्तंभवति।शुक्लपक्षेगताःसावयवास्तिथयःपञ्चदशभक्ताः
सतांबलंस्यात्।कृष्णपक्षेएष्याःगम्याःसावयवतिथयस्तिथिभिर्भक्ताःसतांबलंस्यात्।सद्दीर्घंरूपाच्छोधितंपक्षद्व
येपिपापानांबलंस्यादिति।इदंपक्षवीर्यंविधोश्चन्द्रस्यद्विगुणंकार्यम्।अथगतैष्यतिथिसाधनमुच्यते।सूर्योनच
न्द्रस्यांशाद्द्वादशभक्ताःगतास्तिथयोभवन्ति।शेषंभागादिगतंतत्षष्टिगुणंकृत्वापुनर्द्वादशभिर्भजितं।लब्धंजन्मस
मयेवर्तमानतिथ्याश्चान्द्रागतघटिकाःस्युः।पुनःशेषंषष्टिगुणंविधायद्वादशभक्तेपलानि।एवमग्रेपि।तथाकृते
चान्द्राःसावयवागततिथयोभवन्ति।परंयदिशुक्लपक्षेजन्मस्यात्।यदितुकृष्णपक्षेजन्मतदाताएवगततिथ
यस्त्रिंशच्छुद्धाएष्याःसावयवास्तिथयोभवन्तीतिज्ञेयम्।प्रतिपदमारभ्यपूर्णिमान्तंयावच्छुक्लपक्षःपूर्णिमा
न्तादमान्तपर्यन्तमसितइतिप्रसिद्धमेव।सूर्योनचन्द्रस्यलवार्कभागोगतातिथिःषष्टिगुणावशेषात्।द्विचन्द्र१२ल
ब्धंघटिकादिचान्द्रंभवेदिदंपक्षबलस्यसिद्धौ॥१॥कृष्णेतुपक्षेरवगुणच्युतासौगतातिथिःसावयवाऽगतास्या
त्।गतविकलाःसूर्येन्दुगत्यन्तरेणभक्ताःसत्योगतघटिकाःकरणादौसाधितास्तानात्रोपयुज्यन्तइतिनमाध्याः।

मासास्तथात्रतिथयस्तु हिनांशुमानादित्युक्ते तिथिशब्देन चान्द्रदिनस्यैव वाच्यत्वाच्चान्द्र्यो घटिकाः स्युर्ग्राह्या इ[illegible]
क्त तद्युक्तम्। करणादौ तु चान्द्रघटीनामज्ञातत्वात्सावनादेव व्यवहारसिद्धेः सावना घटिका आनीता इति बोद्धव्य
म्। एतदन्यैर्वासनाबाह्यैष्टिप्पणकारैरनुक्तमपि मयैव पार्थक्येनोदितमित्यवधेयम्। ननु क्षीणेन्दोः पापत्वाभिधा
नात्कथं चन्द्रस्य शुभत्वमेव व्याख्यातम्। न च चन्द्रस्य साहजिकशुभत्वाच्छुभत्वमेवाद्रियत इति वाच्यम्। विनि
गमनाविरहाद्बुधस्यापि शुभत्वाङ्गीकारापत्तेरिति चेत्। मैवम्। चन्द्रस्य च यवनेश्वरवाक्यबलाच्छुभत्वमेवाङ्गी
क्रियते बुधस्य तु सर्वसंमतत्वाद्यथोक्तैव व्यवस्था। तथा च यवनेश्वरः। क्रूरग्रहोऽर्कः कुजसूर्यजौ तु पापौ शुभाः
शुक्रशशाङ्कजीवाः॥ सौम्यस्तु सौम्यैर्व्यतिमिश्रितोऽन्यैः पापैश्च तुल्यप्रकृतित्वमेति॥१॥ मासे तु शुक्लप्रतिपत्प्रवृ
त्तेः पूर्वं शशी मध्यबलो दशाहे। श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैश्च दृष्टो बलवान्सदैव॥२॥ तस्माद्यवनेश्वरमते
चन्द्रस्य शुभत्वमेवेति सिद्धम्। यद्यत्र चन्द्रस्य पापत्वं यवनेश्वरस्याभिप्रेतं स्यात्तदा तृतीये दशकेऽल्पबल इति नो
क्तमेव स्यात्। तस्मात्क्षीणेन्दुः पाप इत्यन्येषां मतम्। एवं मतभेदे पद्धतिकारैर्यवनेश्वरमतमेवाङ्गीकृतम्। यतश्च
न्द्रस्य चेष्टाकेन्द्रजं बलं शुक्लपक्षबलं च सममेव भवतीति पक्षवीर्यं चन्द्रस्य द्विघ्नमुक्तम्। चेष्टाबलपक्षबलसा

स्यं तु चन्द्रस्य पापत्वाङ्गीकारेन सङ्गच्छते। तथाहि। पूर्णिमान्ते गततिथयः पञ्चदश १५ एते पञ्चदशभक्ता जातं प
क्षबलं रूपम्। १ तथाऽर्केन्दुः राशिषट्कं ६ षड्भक्ता जातं चेष्टाबलमपि रूप १ मेव। अमावास्यान्ते एष्यतिथिः पूर्ण
म्। अतः पक्षबलाभावः। अर्केन्दुरपि पूर्णम्। अतश्चेष्टाबलाभावोपि। अतश्चेष्टाबलपरमत्वे पक्षबलपरमत्वं चे
ष्टाभावे पक्षबलाभाव इति सिद्धम्। क्षीणेन्दोः पापत्वस्वीकारे तु भूम्युत्थं पापानामिति रूपं पक्षवीर्यं दर्शान्ते समा
याति। नेदं युक्तम्। यतश्चेष्टाबलाभावात्तत्रास्याभावेन भवितव्यम्। अतः पक्षतो सर्वग्रहस्य बलानयने चक्रार्द्धहा
नौ तन्तुगेरवलरावैमादिस्थले चन्द्रस्य शुभतैव। बुधस्य तु यथाप्राप्ता पापता शुभता वा ग्राह्या। एषां मते रिष्टयो
गादौ यत्रेन्दोः पापत्वाभिधानं तत्र क्षीणेन्दूपलक्षकं वेद्यमिति दिक्। अत्र सुन्दरमिश्रवाक्यम्। सदाशुभस्यैव वि
धोर्द्दिनिघ्नपक्षस्य वीर्यं गणकैर्निरुक्तम्। सर्वत्र पापाः कुजसूर्यमन्दाः पापैर्युतो ज्ञोपि परे शुभाः स्युरिति॥ १॥
अथोपपत्तिः। बृहज्जातके। बहुलसितगताः स्युः क्रूरसौम्याः क्रमेण। कृष्णपक्षे पापानां बलं शुभानामर्थाद्बला
भावः। शुक्लपक्षे शुभानां बलमर्थात्पापानां बलाभावः। तत्र प्रतिदिनमुपचीयमानकलाकलापकलानिधिल
क्षणस्य शुक्लस्य पक्षस्य पौर्णमास्यन्ते सकलकलोपचयादुत्कृष्टता। अतस्तत्र शुभानां बलं परमं रूपमितम्। अ

प्रै॰ म तविषयोपिपरमाः पञ्चदश १५ शुक्लप्रतिपदादेः शुभबलाभावस्तत्रगततिथ्यभावोपि। अतोनुपातः। यदिपञ्च
३० दशभिर्गततिथिभीरूपंबलंतदेष्टाभिः किमिति। गततिथितिथि १५ भागाः शुक्लपक्षेसतांबलंस्यादित्युपपन्न
म्। एवंचएवपूर्णिमान्तः स एव कृष्णपक्षादेरिति कृष्णपक्षादौ रूपंबलम्।१। तत्रैष्यतिथयः पञ्चदश १५ पर
माः। अमावास्यान्तेशुभानांबलाभावस्तत्रैष्यतिथ्यभावश्च। अतोनुपातेनैष्यतिथिपञ्चदशांशाः कृष्णपक्षेसतां
बलंस्यादित्युपपन्नम्। एवंशुक्लकृष्णपक्षयोरेष्यगततिथ्यनुपातेनक्रूराणामपिबलंसाधनीयम्। तत्राचार्यै
र्लाघवाच्छुभबलमेवमुक्तमुभयोरपिपक्षयोरशुभानांबलंस्यादित्युक्तम्। उपपन्नमेतत्। यतः सितादेरशु
भबलमपचीयतेशुभबलंतूपचीयतेकृष्णादितस्तुशुभबलमपचीयते क्रूरबलमुपचीयते यावानेवापचय
स्तावानेवोपचयइति। उपचयापचययोरनुरूपमध्यइतिरूपात्च्युतंशुभबलमशुभबलंस्यादिति। सदाशुभस्यै
वविधोः पक्षबलंवक्ष्यमाणचेष्टाकेन्द्रोत्थचेष्टाबलेनसममेवजायतइतिपुनस्तयोर्योगेक्रियमाणेद्विघ्नमेव
भविष्यतीतिपूर्वमेवद्विघ्नंकार्यमित्युक्तम्। एवंसूर्यस्यायनबलमपिचेष्टाबलेनतुल्यत्वाद्विगुणंकार्यमित्यग्रे रामः
प्रतिपादयिष्यते। अर्कस्यदृग्बलमिति। अतः पुष्पवतोश्चेष्टाबलेवीर्यैक्येक्रियमाणेसतिनयोज्यंपूर्वमेवयोजि २०

तत्वादत एव वक्ष्यते। प्राग्वन्नवीर्यीयते इति सर्वं निरवद्यम्। पक्षवीर्यसाधनं सुगमोपायेनोक्तं पराशरेण। चन्द्राद
र्कं विशोध्य च। अङ्काधिके विशोध्यार्काद्भागीकृत्य त्रिभिर्भजेत्॥ पक्षजं बलमिन्दुज्ञशुक्रार्याणां तु षष्टितः॥ हित्वा
न्येषामिति। अत्रापि ज्ञशुक्रार्याणां यद्बलं तदेवेन्दोः पक्षद्वयेऽपि बलमित्यर्थलाभात् क्षीणचन्द्रः शुभ एवेति प्रौढं
निर्व्यूढम्। अस्योपपत्तिस्त्रैराशिकेनोच्चबलवत्सुगमा। अथ त्र्यंशबलमाह॥ ॥ अथाह्नस्त्र्यंशकेषु क्रमा
त्। सौम्यार्कार्कभुवां निशः शशिसितारणां च रूपं सदेज्यस्य॥ ॥ अथेति। पक्षबलानन्तरम्।
अह्नो दिनस्य त्र्यंशकेषु सौम्यार्कार्कभुवां क्रमाद्रूपं बलं स्यात् सौम्यो बुधः। अर्कः सूर्यः। अर्कभूः शनिः। तेषां सौम्या
र्कार्कभुवामित्यत्र द्वन्द्वसमासः। निशः रात्रेस्त्र्यंशकेषु क्रमात् शशिसितारणां चन्द्रशुक्रभौमानां रूपं बलं स्यात्।
चकारः समुच्चये। ईज्यस्य बृहस्पतेः सदेति दिवानिशं यत्रक्वापि त्र्यंशे रूपं बलं स्यात्। एतदुक्तं भवति। प्रथमतो
दिने रात्रौ वा जननमस्तीति विज्ञाय ततस्तन्मानस्य त्रेधा विभागं विधाय यस्मिंस्त्र्यंशे जन्म तदंशपस्य रूपं बलं गुरो
स्तु सदैव रूपं बलं ग्राह्यमिति। अत्र प्रोक्तग्रहाणां दिनरात्रित्रिभागबलं होरागमप्रमाणसिद्धम्। तदुक्तं होरामक
रन्दे। निशामुखे शीतरुचिर्बलीयान्भृगुर्निशीथे कुसुतो निशान्ते॥ प्रातर्बुधो मध्यदिने दिनेशः शनिर्दिनान्तेऽपि

प्रौ॰म॰ षणः सदेवेति॥१॥अथवर्षेशादिबलमाह॥ ॥अथाद्रिचयाद्दलीकिलसमामासद्युहोरेश्वरइति॥ ९॥ अथशब्द
३१ आनन्तर्ये। समामासद्युहोरेश्वरः अद्रिचयात्पादवृद्ध्यावलीस्यात्। समावर्षं,मासः प्रसिद्धः; द्युदिनं द्युइत्यव्ययं
दिनशब्दवाचकमितिक्षीरस्वाम्यादयः। होराकालहोराआस्वामीश्वरः स्वामी,अद्रिवृद्ध्या दलीवर्षेशस्यपादैर्ब
लंमासेशस्यार्द्धंदिनेशस्यत्रयश्चरणाहोरेशस्यरूपंबलमित्यर्थः। किलेत्यागमप्रामाण्यसूचनार्थम्। वर्षमासेश
योरानयनमुक्तंकेशवसांवत्सरैः स्वकृतटीकायाम्। तद्यथा। द्विष्ठोद्युपिण्डोरदभूयुतोऽर्कयुक्खाङ्गाग्निहृत्तवा
ग्निहृतः फलेयुते॥ वेदैर्गुणैस्त्रिद्विहृतेऽद्रिशेषितेऽर्कोद्ब्रह्मतुल्यकरणेऽब्दमासपौ॥१॥अस्यार्थः। ब्रह्मतुल्यकरणे
द्युपिण्डोऽहर्गणः द्विष्ठः एकत्ररदभूमिर्द्वात्रिंशदधिकशतेनयुतः॥अपरत्रअर्कैर्द्वादशभिर्युक्युक्तःकार्यः। आ
द्यः खाङ्गाग्निभिः षष्ट्यधिकशतत्रयेण हृत्। भक्तः। अपरः खाङ्गाग्निभिस्त्रिंशताहृतः। उभेफलेक्रमेणवेदगुणैर्यु
तेततस्त्रिद्विहृतेअद्रिशेषितेसप्ततष्टेसती अर्कमारभ्यगतौ वर्षमासेशौभवतः। अत्रप्रगृह्यत्वाभावः प्रामादिकः।
अतस्त्रिद्विहृताद्रिशेषितेस्तोब्रह्मतुल्येरवितोऽब्दमासपाविति पाठः पाठ्यः। त्रिद्विहृतेचतेअद्रिशेषितेचेतिवि राम:
ग्रहः। फलइतिसप्तम्यन्तंकृत्वायथाश्रुतमेवव्याख्येयमितिवा। अत्रोपपत्तिः॥ सावनवर्षमासेशौसाध्येते। तत्रता ३१

वत्कल्पादेःसकाशाज्जन्मदिनजार्कोदयपर्यन्तमहर्गणः साध्यः।ततोयदिदिनानांषष्ट्यधिकशतत्रयेण३६० त्रिंश
ताचैकंवर्षमेकोमासश्चक्रमेणलभ्यतेतदेष्टाहर्गणेनकिमित्यभीष्टाहर्गणःखाङ्गाग्निहृत्वाग्निहृतःफलेसावन
निगतवर्षाणिसावनागतमासाश्चभवन्ति।यद्येकेनवर्षेणैकेनमासेनचैकमितोवर्षेशोमासेशश्चक्रमेणलभ्यते
तदेष्टैर्वर्षैर्मासैश्चकिमित्यभीष्टवर्षमासतुल्याएवतदीशास्ततोवाराःसप्तैवेतिसप्ततष्टाःशेषंवर्षेशंमासेश्वरौभ
वतइत्युपपन्नम्।अथैतौकस्माद्वासराद्गणनीयावितिचिन्त्यते।कल्पादौवर्षेशोरविरासीत्ततोद्वितीयवर्षेबुध
स्तृतीयवर्षेशनिरतोरवेरधःकक्षाक्रमेणतृतीयस्तृतीयोवर्षेशइति।एतदुक्तंभवति।कल्पगतसावनवर्षगणो
द्वितष्टेयदिशून्यंशेषंतदासूर्योब्दपोयद्येकस्तदाबुधइत्यादि।एवंकल्पादौमासेशोरविस्ततोद्वितीयेमासिमासे
शोभौमस्तृतीयेगुरुरतोरवेरूर्ध्वकक्षाक्रमेणद्वितीयोमासपतिरित्यवधेयम्।उक्तंचसूर्यसिद्धान्ते।वर्षाधिपतय
स्तद्वत्तृतीयाःपरिकीर्तिताः॥ऊर्ध्वक्रमेणशशिनोमासानामधिपाःस्मृताइति।तद्वदितिमन्दादधःक्रमेणेत्यर्थः।
शतानन्दोऽपि।शाकादिसौराब्दगणात्कलेर्वावर्षाधिपाःसप्तहृतावशेषाः।शुक्रेन्दुवाचस्पतिसूर्यसौम्यशनैश्च
राराःक्रमशोभवन्ति॥१॥अब्दोऽर्कनिघ्नोरविमासयुक्तःसप्तावशेषोरविमासनाथाः॥शुक्रसूर्यारसुरेज्यसौरिच

ग्र॰ ल॰ न्द्राद्युगात्सावनमासतोऽन्ये॥ २॥ सूर्यादिभिः सावनवर्षमासनाथयोः साधितत्वात्साधितौ सौरवर्षमासपती सूर्यादु
३२ क्तक्रमेणगणनीयाविति सिद्धम्। अहर्गणादावुच्चावचजनप्रसिद्धरविचन्द्रभौमबुधेत्यादिक्रमेण वारगणना
याउक्तत्वात्। अत्र तु तदन्यथाभावे शिष्याः क्लिश्येरन्निति यथा तेनैव क्रमेण वर्षमासपत्योर्गणना विधातुं शक्यते तथा
यतितमाचार्यचरणैः। तद्यथा। कल्पादौ रविर्वर्षस्वामी ततो द्वितीयवर्षे वर्षेशो बुधस्तयोः प्रसिद्धक्रमे त्रिमितम
न्तरमेवं प्रथमाग्रिममासस्वामिनो द्विमितमन्तरमतोऽनुपातः। यद्येकेन वर्षेण मासेन च त्रिद्विमितेऽन्तरे लभ्येते तत
दिष्टवर्षैर्मासैश्च किमिति। उक्तं च सूर्यसिद्धान्ते। मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतम्। सप्तोद्धृतावशेषौ तु वि
ज्ञेयौ मासवर्षपौ॥ अतः कल्पगताः। वाशिष्ठेपि। माससमादिनभक्ताद्युगणाल्लब्धं पृथग्यमगुणाग्रम्॥ सैकं च स
प्तभक्तं मासस्समाधीश्वरावर्कात्। सोमसिद्धान्तेपि। द्युगणात्त्रिंशताषड्घ्नषष्ट्याद्वित्रिहते फले॥ सैके सप्तावशेषि
ते मासवर्षपती क्रमादिति। वर्तमानगणनार्थं सैकमित्युक्तमत्र। अहर्गणो द्विष्ठः खाङ्गाग्निहृत् खाग्निहृतः फले
त्रिद्विहृते अद्रिशेषिते अर्कादितौ वर्षमासपती प्रसिद्धक्रमेण भवतइत्युपपन्नम्। अत्राचार्येण लाघवार्थं दिन रामः
गणस्य खण्डद्वयं कृतम्। एवं कल्पादेर्ब्रह्मतुल्यकरणादिपर्यन्तम्। अपरं ब्रह्मतुल्यादेर्जन्मदिनजार्कोदयाव ३२

धिाय देवद्युगणस्य द्वितीयखण्डं स एव ब्रह्मतुल्याहर्गण इति प्रसिद्धतरम्। अतो द्विष्ठो ब्रह्मतुल्यद्युपिण्डः खाङ्का
ग्निहृदित्याद्युपपन्नम्। परमेतौ वर्षमासशेषौ ब्रह्मतुल्यादिजाब्दमासशेषाभ्यां भवतोऽपेक्षितौ तु रविवारादितोऽतः क्षे
पान्वितौ कार्यौ तत्र क्षेपः साध्यते। कथितकल्पगतोऽर्कसमागणो रविगुण इत्यादिप्रकारेण ब्रह्मतुल्यादौ साधितो
हर्गणः करशरयुगसप्ताभ्राभ्रषड्द्विषट्खद्वितुरग ७२०६३६००७४५२ प्रमितः॥ अयं षष्ट्यधिकशतत्रयभ
क्तो लब्धागताब्दाः सावनाः। २००१७६६६८७ शेषं रदभूतुल्यम्। १३२ गताब्दास्त्रिगुणाः सप्तभक्ताः। शेषं पञ्च
५ अतोऽग्रन्यादितस्त्रिगुणवर्षेषु पञ्चमितः क्षेपो योज्यस्ततः सप्ततष्टे सूर्यादितोऽब्देशः स्यादित्युक्तम्। यदि तु
केवलवर्षेष्वेव क्षेपो योज्यतेऽनन्तरं त्रिभिर्गुण्यते तदा क्षेपस्त्रिगुणो योजितो भविष्यतीति त्रिभक्तः क्षेपो योज्यः।
अत्र पञ्चमिते क्षेपे त्रिभक्ते निरग्रं फलं नायातीति पञ्चसु सप्त संयोज्य त्रिभिर्भागे गृहीते लब्धाश्चत्वारः ४ अतो वे
दैर्युतमिति युक्तम्। एवं द्युगणस्त्रिंशद्भक्तो लब्धागतमासाः सावनाः २४०२१२००२४८॥ शेषमर्क १२ तुल्यम्। आग
तमासा द्विगुणाः सप्तभक्ताः शेषं षट् ६ अतो द्विघ्नमासेषु षण्मितः क्षेपः क्षेप्यस्तत्र सप्ततष्टे सूर्यादितो मासेशः
स्यात्। अत्राचार्यैः केवलवर्षेष्वेव क्षेपो योजित इति द्वाभ्यां भक्तो जातास्त्रयः। अतो गुणेर्युतं फलमित्यपि साधु

यद्वा सावनवर्षान्ते यो वारः सोऽब्दपतिः सावनमासान्ते वारो मासेश इति। अहर्गणः खाङ्गाग्निभक्तः खाग्निभक्त
श्च फले सावनवर्षमासा भवन्तीति प्रागुक्तं ततोऽनुपातः। यद्येकेन सावनवर्षेण षष्ट्यधिकशतत्रयं दिनानि त
दैष्टैः किमिति फलं ग्रन्थादेः सकाशादिष्टसावनवर्षादिपर्यन्तं सावनदिनानि स्युस्ततो वाराः सैकत्रैवेति सप्ततष्टा
निकार्याणीति पूर्वमेव लाघवार्थमब्ददिनानि ३६० सप्तभक्तानि शेषं त्रयमतो ग्रन्थोदितः सावनाब्दगण
स्त्रिभिर्गुणनीय इत्युपपन्नम्। एवं मासदिनानि ३० सप्तभक्तानि शेषं द्वयमतो मासगणो द्विगुण इति युक्तम्। अ
स्मिन्मते सूर्यात्प्रसिद्धक्रमेणैव गणनेति सर्वमवदातम्। क्षेपोपपत्तिः प्रागुक्तैव। अथाब्दमासशेषदिनयोग
कारणमुच्यते। ब्रह्मतुल्यकरणादौ सावनवर्षेशः शुक्र आसीत्। वर्षशेषदिनानि रदभूतुल्यानि १३२ अतो ग्रन्था
देरष्टाविंशत्यधिकशतद्वयमितेषु सावनदिनेषु गतेषु सत्सु वर्षेशश्चन्द्र इति ज्ञायते। ग्रन्थादितो वर्षेशानयने
वर्षदिन ३६० पर्यन्तं चन्द्रो नायाति। कल्पाद्यहर्गणतो वर्षनाथे साध्यमाने ग्रन्थादितो गगनाङ्ग-गुण ३६० दिनम
ध्येऽपि चन्द्रो लभ्यते। अतो ग्रन्थादिजाब्दशेषदिनानि संयोज्य वर्षेश्वरः साध्यः। अन्यथा ब्रह्मतुल्याहर्गणसाधित
वर्षेशस्य क्षेपयुतस्य कल्पाद्यहर्गणसाधितवर्षेशतुल्यत्वं भज्येतैव। एवं मासेशेऽपि योज्यम्। एवममुनाप्र

कारेणजन्मकालेवर्षमासेशौसाध्यौ।यत्रवारेरव्यादिकेजन्मसएवदिनेशइतिस्पष्टम्।अत्रवारप्रवृत्तिरर्कोद
यादेवनतुगणितसाधितवारप्रवृत्तिकालात्।मतुरत्नावल्याम्।वारप्रवृत्तेर्जननोत्थवारः प्रकल्पनीयः सदिना
धिनाथइतिगणेशेनोक्तंतदयुक्तंमुनिमतविरोधात्।तथाचवसिष्ठसंहितायाम्।वारप्रवृत्तिविज्ञानंक्षणवारा
र्थमेवतत्॥अन्येषुसर्वकार्येषुदिनादिरुदयोरवेरिति॥१॥यद्गणितेनवारप्रवृत्तिसाधनंकृतंतत्क्षणवारार्थं
कालहोरासाधनार्थमित्यर्थः।अन्यकार्येषुसूर्योदयादेववारस्यप्रवृत्तिरिति।होरेश्वराननयनंवसिष्ठसिद्धान्ते।
प्रभाकरस्योद्गमनात्पुरेस्याद्वारप्रवृत्तिर्दशकन्धरस्य॥चरार्द्धदेशान्तरनाडिकाभिरूर्ध्वंतथाधोप्यपरत्रतस्मा
त॥७॥वारप्रवृत्तेर्घटिकादिनेशात्कालाख्यहोरापतयः क्रमेण॥सार्द्धननाडीद्वितयेन २।३० षष्ठः षष्ठ
श्चषष्ठश्चपुनःपुनश्चेति॥२॥स्वार्कोदयाद्येनकालेनप्रागूर्ध्वंवालङ्कार्कोदयः सकालोवारप्रवृत्तिकालइतिस्प
ष्टम्।सौरमतेतुलङ्कार्द्धरात्रेसृष्टिरिति स्वार्द्धरात्राद्वाराभावेनकेवलंदेशान्तरघटीभिरेवप्रागूर्ध्वंवावारप्रवृत्ति
रित्युक्तंसूर्यसिद्धान्ते।तद्देशान्तरनाडीभिः सपादैर्भ्यधिकोनकइत्यादिना।वसिष्ठादिमुनिब्रह्मगुप्ताद्याचार्यम
ताविरोधाय मध्यरात्रादित्यथाह तत्तस्माद्देशान्तरनाडीभिः प्राक्पश्चाद्देशयुक्तोनेसपादैमितेकालेवारप्रव

मौ. म. त्तिः परमत्रस्य पार्द्धपदं निरस्य जस्य पार्द्धविषयमित्यनेन सौरभाष्ये स्मत्पितृचरणैः सम्यगाख्यातम्। एवमने
२४ नप्रकारेण होरेशो ज्ञेय इति प्राञ्चः। केचित्तु तत्कालार्कन्यूनलग्नांशपिण्डो भक्तः पञ्चदशभिः १५ भिर्भुक्त होरा इ
त्यनेन होरेशमाहुः। अत्रैवं मतद्वैधेऽर्कलग्नान्तरसाधितो होरेशोऽत्र पद्धतौ ग्राह्य इत्यस्मद्गुरूणां मतम्। एतदे
वयुक्तमुत्पश्यामः। तथाहि। भवनस्यार्द्धं होरेत्युक्ते दिनावसानसमये षट् लग्नानि व्यतीतानि भवन्ति। तद्द्विगुणानि
च द्वादशतुल्यानीति द्वादशैव होरा उक्ताः स्युः। एवं तत्कालार्कन्यूनलग्नांशपिण्ड इत्यनेनायान्ति। त्वयमेव होरासा
धनप्रकारोऽत्र होराशास्त्रे ग्राह्य इति युक्तम्। न चानेनैव प्रकारेण सर्वत्र होरेशानयने पूर्वप्रकारेण तदानयनमुन्म
त्तप्रलपितमिव स्यादिति वाच्यम्। यस्य ग्रहस्य वारे यत्किंचित्कर्म प्रकीर्तितम्। तत्तस्य कालहोरायां सर्वमेव वि
धीयत इत्यादौ तस्योपयोगात्। तस्मात्पद्धतावर्कलग्नान्तरसाधितो होरेशो ग्राह्योऽन्यत्र तु वारप्रवृत्तेर्घटिकाद्वि
त्यादिप्रकारानीतो होरेशो ग्राह्य इति विषयव्यवस्था सुस्था। तत्कालार्कन्यूनलग्नस्य राश्यादेर्भागकरणार्थं त्रिंश
द्गुणकः पञ्चदशहरश्च। गुणहरौ हरेणापवर्त्य लब्धं द्वयं गुणस्थाने। अतोऽर्कोनलग्नराश्यादि द्विगुणं कार्यं तथाकृ राम:
ते राशिस्थाने यन्निष्पद्यते तेन सप्त ७ तष्टेन तुल्या एव दिनाधिपाद्यारविशुक्रसौम्यशशाङ्कसौरेज्यकुजा इत्यनेन ग ३४

ताहोरेशाः स्युः। यद्वा। दिघ्नस्यार्कोनलग्नस्य केवलं राशयः पञ्चगुणाः सप्तभक्ताः शेषसमो गतो होरेशो दिनाधिपाक्र
मेणैव स्यादिति लाघवम्। अत एवोक्तं पद्धतिप्रकाशे वीनाङ्ग-दृग्घातगृहेषु ५ घातो होरापतिर्वारपतेः प्रयातः द्
ति। अधुना चेष्टाबलं विवक्षुस्तावत्तदङ्गीभूतमायनबलं भुजङ्गप्रयातेनाह॥ ॥ सदाक्रान्तिभागैर्युताज्ञस्य सि
द्धाः २४ शनीन्द्वोर्युतोनाः क्रमाद्याम्यसौम्यैः॥ विलोमं परेषां गजाम्भोधि ४८ भक्ता भवेदायनं वीर्यमर्कस्य दृ
ग्घ्नम्॥ २॥ ज्ञस्य बुधस्य सदेति। दक्षिणैरुत्तरैर्वा क्रान्तिभागैर्युताः सिद्धाः गजाम्भोधिभक्ताः सन्तः आयनं वीर्यं भवेत्। श
नीन्द्वोः क्रमादिति याम्यैर्युताः सौम्यैरूनाः सिद्धाः परेषां रविकुजगुरुशुक्राणां विलोममिति सौम्यैः क्रान्त्यंशैर्युता
याम्यैरूनाः सिद्धाः गजाम्भोधिभक्ताः आयनं बलं स्यात्। एवं साधितं सूर्यस्यायनबलं दृग्घ्नं कार्यम्। दृग्[illegible]हन्य
ते तद्द्वयं द्विगुणं कार्यमित्यर्थः। क्रान्तिसाधनं ग्रहलाघवे। चत्वारिंशदशीतिरद्रिकुभवः कुसेन्दवोम्भ [illegible] षड्
खाग्नीणि जिनाश्विनोङ्ग-विकृतीखाब्ध्याश्विनः सायनात्॥ खेटाद्दोर्लववद्गलवप्रमगतोङ्कोसैतदूनागत [illegible] ष
[illegible]लब्धियुग्दशाहृतोंशाद्योऽपमः स्यात्त्वदिक्॥ १॥ अत्रोपपत्तिः॥ अयनं गमनं तद्वशादुत्पन्नं बलमायन
बलमित्यन्वर्थनाम यत्रायने येषां बलं तदुक्तं सारावल्याम्। उत्तरमयनं प्राप्ताः शुक्रकुजार्कसुरमन्त्रिणो बलिनः।

पी·म·
याम्यशशिरविपुत्रौ द्वे अपि शशिजः स्वगृहस्थश्चेति। उत्तरायणे शुक्रार्ककुजगुरूणां संपूर्णं बलमुक्तं तत्र
३५
सायनमिथुनान्ते परमोत्तरगमनात्संपूर्णं बलं संपूर्णता रूपात्मिकेति रूपं बलम्। अर्थादेवैषां सायनधनुर
न्ते दक्षिणगमनस्य परमत्वाद्बलाभावः। दक्षिणगमनपरमत्वे रूपं बलम्। चन्द्रशन्योः परमोत्तरगमने ला
भावः। बुधस्य तु परमोत्तरगमने परमदक्षिणगमने च रूपं बलम्। बलाभावस्थानाद्बलपरमत्वस्थान न्तं हि
गुणपरमक्रान्त्यंशा गजाम्भोधिमिताः सन्ति। अथ बलाभावस्थानादहोरात्रवृत्तनिष्ठ ग्रहस्थानस्यान्तरे येंऽशाः परमां
शास्तैर्बलानयनं कर्तुमुचितमिति चन्द्रशनैश्चरयोर्याम्यक्रान्तौ जिनांशमितायां परक्रान्तौ योजितायां सत्यां सौ
म्यायां तु वियोजितायां बलाभावस्थानग्रहस्थानान्तरालेंऽशा भवन्ति। कविरविगुरुभौमानां सौम्यक्रान्तौ पर
क्रान्तौ २४ युक्तायां याम्यायां वियुक्तायां बलाभावस्थानादग्रिमाक्रान्तिर्भवति। लाभावस्थानादेतत्क्रान्तिभागान्त
रे खेटोऽस्तीति भावः। बुधस्य तु सौम्यायां याम्यायां च योजितायां भुज्यमानायनादेरग्रिमाक्रान्तिर्भवति। यदाष्टचत्वा
रिंशद्भागान्तरे ग्रहस्तदा संपूर्णं बलम्। अथानुपातः। यदि बलाभावस्थानान्तरेणाष्टाचत्वारिंशन्मितेन रूपं बलं त राम:
देष्टेन किमिति सर्वमुपपन्नम्। ननु सर्वत्र साध्यस्य परमत्वमभावश्च द्वाविमौ निर्णीयते तत्र चान्यस्यापि परमत्वाभा ३५

वैनिर्णीयतदन्यवशादन्तरेऽनुपातः क्रियते। यथा ग्रहफलाभावे गतिफलं परमं ग्रहफलपरमत्वे गतिफलाभा
वस्तत्र केन्द्रकोटिज्याया अपि परमत्वाभावो न तस्तदन्तरे केन्द्रकोटिज्यातोऽनुपातः क्रियते। प्रकृते च बुधस्यायन
द्वितयेपि बलस्योक्तत्वात्क्वाप्यभावस्य निर्णेतुमशक्यत्वात्त्रैराशिकं कथं प्रवर्तते इति चेत् सत्यम्। बुधस्य दक्षिणग
मनसमाप्तौ संपूर्णबलं ततो ह्रासक्रमेण सायनमेषादावर्द्धबलस्य ह्रासः। तत उत्तरदिक्क्रमात्परमोत्तरगमने संपूर्ण
बलं पुनर्ह्रासक्रमात्तुलादावर्द्धबलापचयः। यद्यत्र बलाभावशब्देन बलशून्यत्वं विवक्षितं तत्तु कथमपि न स्या
त्। अयनद्वयेपि संपूर्णबलाङ्गीकारात्। किंतु सायनमेषादौ तुलादौ च क्रान्त्यभावेन रूपबलस्यार्द्धतुल्यपरमह्रा
सात्त्रैराशिकप्रवृत्तेरन्यथानुपपत्त्या तदेव बलाभावस्थानमिति मन्तव्यम्। अथानुपातः। बलपरमापचयलक्ष
णाभावस्थानस्य बलपरमत्वस्थानस्य चान्तरे चतुर्विंशतिभागाः सन्तीति चतुर्विंशतिभागे रूपार्द्धं बल[illegible] यथा
स्थितग्रहक्रान्त्यंशैः किमिति। एवं च क्रान्तिभागाष्टाचत्वारिंशदंशोनिघ्नाः। अयं रूपार्द्धयोज्यस्तत्र मिथो[illegible]भ्या
मितानेन समच्छेदविधाने कृते सदा क्रान्तिभागैर्युताः सिद्धाः अष्टचत्वारिंशद्धृता बुधस्यायनबलं स्यादिति युक्त
म्। एवं सदायनबलानयनं पद्धतिप्रकाशे लाघवेन मयोक्तम्। याम्योत्तरैः स्वाद्रि-युता यमांशैर्युतायुताः पूर्णगुणाः

ग्री·मे· शनीन्द्वोः॥ व्यस्तं परेषामनिशं बुधस्य स्फुटताभवेदायनवीर्यमेतत्॥१॥ गणेशदामोदरसूर्यमुख्यैः स्पष्टाद्यमा स्वा
३६ धितमाल्पतन्वे॥ उपेक्षितत्वाद्गुरुकेशवाद्यैरयुक्तमेवेति सुधीभिरूह्यम्॥२॥ स्पष्टार्थाविमौ। अत्र वासना [illegible] दि
चतुर्विंशत्यंशैस्त्रिंशत्कलातुल्यं बलं तदेष्टक्रान्तिभागैः किमिति। अत्र गुणहरौ षड्भिरपवर्त्यजातौ गुणः [illegible] पञ्च
५ हरश्चत्वारः ४ यो राशिः पञ्चभिर्हन्यते चतुर्भिर्ह्रियते स स्वाङ्घ्रियुत एव भवतीति स्वाङ्घ्रियुतापमांशैः [illegible] कमा
णोपपत्तिः प्रतिपादितैव। स्पष्टापमाद्बलसाधनस्यायुक्तत्वमग्रेव दिष्यामः। प्रकारान्तरमपि तत्रैवोक्तम्। प्र
ह्यापक्रमसिद्धं २४ शं संस्कृतं रूपमर्द्धितम्। रूपाद्यमायनं वीर्यं स्याद्वेर्द्विगुणं कुरु॥३॥ दृष्टक्रान्तिसं
स्कृतापरक्रान्ति २४ गजाम्भोधिभक्तायनबलं स्यादिति प्रागुक्तम्। तत्र चतुर्विंशत्यापवर्ते कृते पक्रमसि
द्धं यसंस्कृतमित्यादि प्रकारो निष्पद्यते। नन्वेतदायनबलं स्पष्टक्रान्तित एव साधयितुं युज्यते न मध्यक्रान्ति
तः। तथाहि। अयनं गमनं तदुत्पन्नं बलमायनबलमिति तावत्प्रसिद्धम्। गमनं तु चन्द्रादीनां स्पष्टक्रान्तिवशे
नैव भवति। क्रान्तिर्नाम नाडीमण्डलात्क्रान्तिवृत्तावधि दक्षिणोत्तरगमनं क्रान्तिवृत्तादपि दक्षिणोत्तरमन्तरं श रामः
रः। तयोः संस्कारेण नाडिकामण्डलाद्ग्रहस्य स्पष्टं दक्षिणोत्तरगमनं सैव स्पष्टक्रान्तिरुच्यते चन्द्रादीनां परमश ३६

	चं	मं	बु	बृ	शु	श
रांशाः						
इमा	४	५	४	१	८	२
संस्क	३०	२८	००	३०	००	३०

एभिर्युताश्चतुर्विंशत्यंशाजाताश्चन्द्रादीनांपरमाःक्रान्त्यंशालिख्यते।

च	मे	बु	बृ	शु	श
२८	२९	२८	२५	३२	२६
३०	३८	००	३०	००	३०

परक्रान्तिंगृहीत्वायदिद्विगुणयारूपंबलंतदेष्टस्पष्टक्रान्तितपरक्रान्त्याकिमित्यनुपातेनायनवीर्यसाधनंयुक्तंजिनांशतुल्यायांपरक्रान्तौतुग्रहस्यविमण्डलस्थत्वेनपरमगमनाभावाज्जिनांशमितपरक्रान्तिवशतोयनबलनयनंनितरामयुक्तमेवेतिपूर्वःपक्षः॥ अत्रब्रूमः॥ किंभवताजिनांशमितक्रान्तिपठितशरयोगेनयास्पष्टक्रान्तिःसापरक्रान्तिशब्देनोच्यतेऽथवाप्रतिगोलमत्यधिकायास्पष्टक्रान्तिःसापरक्रान्तिशब्देनोच्यते। नाद्यःपक्षः।चन्द्रस्यबलसंपूर्णत्वाभावयोःसततंव्यभिचारात्कदाचिद्व्यभिचाराच्च।भौमादीनांवर्षशतैरनेकैःसंपूर्णबलालाभाच्च।तथाहि।यदाऽयनांशोननवराशिसमश्चन्द्रःपातस्त्वयनांशसमस्तत्रचन्द्रशरःपठितशरतुल्यःपरमः ४।३० क्रान्तिर्जिनांशमिता २४ एतत्संस्कारेजातापरक्रान्तिरष्टाविंशत्यंशाःसार्द्धाः २८।३०।अतस्तदैवसंपूर्णबलम्।यदातुदक्षिणगोलेसप्तविंशतितुल्यापरक्रान्तिश्चन्द्रस्यतदापिपरमगमनात्संपूर्णबलेनावश्यंभवितव्यम्।भवन्मतेसार्द्धगजाश्विमितक्रान्तिव्यतिरिक्तस्थलेसंपूर्णबलंनायातीतिदक्षिणगमने परमत्वे

ग्रै.म. पिसंपूर्णबलंनास्तीतिनितरामयुक्तः प्रथमपक्षः। नचतदानींपरमगमनमेवनास्तीतिवाच्यम्। नाडीमण्डलादु
३७ त्तरतोदक्षिणतोवागच्छतोग्रहस्यपुनर्नाडीमण्डलाभिमुखगमनप्रवृत्तिजक्रान्तेः परक्रान्तिशब्दवाच्यत्वात्। किं
च। भौमादीनांपातोयद्ययनांशसमः स्यात्तदा चन्द्रवत्तत्संपूर्णबलमपिकदाचित्स्यात्। अयनांशसाम्यंतु पातस्यम
न्दतरगतित्वादिहयुगेवर्षशतैरनेकैरपिनसंजाघटीतीतिभौमादीनांसंपूर्णबलंकथमपिनस्यादितिदूषणा
न्तरम्। नान्त्यः। तस्याद्विगुणत्वेनायुक्तत्वात्। तथाहि। एकस्मिन्नयनेयावतीपरक्रान्तिस्तावत्येवचेदन्यस्मिन्न
पिस्यात्तदातयोर्योगेकृतेद्विगुणैवपूर्वक्रान्तिर्भवतीतिद्विगुणयापरक्रान्त्येत्यादावनुपातः सार्थकः स्यात्। अन्यथाय
नेतु। परक्रान्तिर्विलक्षणैवभवतीतिद्विगुणपरक्रान्त्येत्यस्यानुपातस्यानर्थक्यात्। सत्यपक्षोद्वितीयोपि। नचायन
द्वयेपियेपरक्रान्तीतद्योगेनयद्द्विरूपंबलं तदेष्टस्पष्टक्रान्तिसंस्कृतपरक्रान्त्याकिमित्यनुपातोयुक्तइतिवाच्य
म्। अयनद्वितयजपरक्रान्तिज्ञानस्यदुर्गमत्वात्। अथवक्तव्यमत्रस्पष्टक्रान्तेः परमत्वंसोयनसन्धिरितिप्रसिद्धे
रयनांशोनितपातादित्यादिपाताधिकारोक्त्याचन्द्रादीनामयनसंधीसंसाध्यततस्ताभ्यांपरक्रान्तिज्ञानंसुलभमि राम
ति। पुनर्भवेदेवम्। यदिस्पष्टक्रान्तिवशादयनवीर्यानयनमार्षमूलकंस्यात्। आर्षमूलकत्वाभावादेवपरमलाघ ३७

विकेराचार्यैर्जिनांशमितक्रान्तिरेव परमायनस्थानमङ्गीकृतं तद्युक्तमेव। तथा च पराशरः। सायनांशग्रहभुजरा-
शीनिषुब्धि ४५ भिः सुरैः ३३॥ सूर्यैः १२ र्हृत्वा क्रमाद्राशिभागः स्यादनुपाततः॥ १॥ एवं राश्यादिके युञ्ज्यादर्कार्यो-
शनस्य च॥ राशित्रयमथो युञ्ज्यान्मेषादिस्थेषु तेषु च॥ २॥ तुलादिस्थेषु राश्यादौ त्रिराशिभ्यो विवर्जयेत्॥ चन्द्रा-
र्क्योर्विपरीतं स्यात्तद्वा युञ्ज्याद्बुधस्य तु॥ ३॥ भागीकृत्य त्रिभिर्भक्तं ग्रहाणामयनं बलम्। रवेर्द्विगुणमेवं स्यादिति।
अस्यायमर्थः। सायनांशग्रहभुजराशिप्रमितखण्डकैक्यं भोग्यखण्डाहतशेषांशत्रिंशदंशलब्धभागादियुक्तं
कार्यं तन्त्रिंशद्भक्तं राश्यादिकं स्यात्। एवं राश्यादिकेषु सायनेषु सूर्यभौमगुरुशुक्रेषु मेषादिस्थेषु सत्सु राशिस्थाने रा-
शित्रयं योज्यम्। तुलादिस्थेषु तु प्राप्तराश्यादिकं राशित्रयाद्विशोधयेत्। चन्द्रशन्योर्विपरीतम्। बुधस्य तु सर्वदा यो-
ज्यम्। ततस्तदंशानां त्र्यंशः षष्ट्यंशात्मकमायनं बलं स्यात्। सूर्यस्य द्विगुणं कार्यमिति। अत्रोपपत्तिः। क्रान्त्यभावे
ग्रहस्य रूपार्द्धं बलं तस्यानबलाभावस्थानान्तरे चतुर्विंशतिक्रान्तिभागात्मके त्रिमितायनराशयः सन्तीति जिनां-
शैस्त्रयो यनराशयस्तदेष्टक्रान्त्या किमित्यनुपातेनैष्यनराशयस्ते क्रान्त्यभावस्थानादागताः। अयं सिवांस्तु बलाभा-
वस्थानादिति सौम्यगोले सूर्यभौमगुरुशुक्राणामयनराशीनां त्र्यधिकत्वात्त्रिषु योज्या याम्येऽल्पत्वात्त्रिषु शुद्धयः।

ग्रौ.म शनीन्द्वोस्तु याम्ये योज्याः सौम्ये शोध्या बुधस्योभयतोऽप्युपचयात्त्रिषु योज्यास्ततो यदि षडयनराशिभीरूपं तदेष्टैः
३८ किमित्यायनं बलं स्यादिति युक्तम्। अत्र भगवता पराशरेण शिष्यानुकम्पया प्रतिग्रहमयनभागार्द्धं प्रसाध्य प्र
थमं द्वितीयाद्द्वितीयं तृतीयादपास्य त्रीणि खण्डान्युक्तानि। ततोऽनुपातेनायनभागसाधनं चोक्तमिति सर्वमनव
द्यम्। नहि निरवयवद्वादशांशमिताक्रान्तिरेकराशौ भवतीति किंचित्स्थूलमिदं कल्पान्तरत्वाद्दोषः। यदि षण्मि
तायनराश्यंशैः खाष्टेन्दुप्रमितैः षष्टिकलातुल्यं बलं तदेष्टैः किमित्यत्रापवर्तनेनायनराशिभागानां त्रिभागः षष्ठ्यं
शाद्यं बलमिति जातम्। अतो युक्तमुक्तं भागीकृत्य त्रिभिर्भक्तमिति। परक्रान्त्यात्र योऽयनराशयस्तदेष्टैः किमिति
प्राग्दर्शितेऽनुपाते त्रिभिरपवर्ते कृतेऽतिसूक्ष्मं प्रकारान्तरं पद्धतिप्रकाशे मयोक्तम्। क्रान्तिभागगज ८ भाप्तलब्ध
भाद्येन संस्कृतगुणाः षड्वृताः।। आयनं बलमिदं भवेन्मुनिस्त्वेवमेव हि पराशरो जगौ।। १।। पराशरोक्तप्रकारेण
जिनांशमितायामेव परक्रान्तौ संपूर्णबलमागच्छतीति स्पष्टक्रान्तिवशादायनवीर्यसाधनं सूर्यादिकृतं नितरामयु
क्तमिति सिद्धान्तः। किंच। एकत्र निर्णीतः शास्त्रार्थः सर्वत्रोपयुज्यत इति यायनबलवासनासैवायनवलनस्येत्याय रामः
नवलनानयने सिद्धान्तसुन्दरे त्वत्पित्राज्ञानराजेन स्पष्टक्रान्तिर्नादृताऽथ च टीकायां त्वत्सहजेन चिन्तामणिनापि ना ३८

दतातस्ताभ्यांसह विरोधोपिमहद्दूषणम्। तस्मात्कुरंसंस्कारोत्ययुक्त एव। अतएवायनवशेन वलनमायनव
लनमितिप्रसिद्धेरयनसंकेतस्योदेगपागयनेमृगकर्किणोरितिचकृतत्वाच्छरसंस्कारोनयुक्त एव। एवंजा
तकपद्धतावायनबलेपिबोध्यम्। एकत्रनिर्णीतः शास्त्रार्थः सर्वत्रोपयुज्यत इत्यायनशब्दस्यतत्रापिसत्वादि
तिवार्तिककृदुक्तिरपिसंगच्छते। क्रान्तिसाधनेनशिष्याः क्लिश्येरन्निति तांविनाप्यायनबलानयनंपद्धतिप्रका
शेमयोक्तम्। यन्यचायोः सायनभादिकस्यकोट्युत्क्रमज्याङ्घ्रि ४ तदूनषष्टिः॥ गोलक्रमाद्यस्तमथापरेषां
याम्येतुचान्द्रेः खरसस्युतंवा॥१॥ अत्रकोट्युत्क्रमज्यास्वार्क १२० त्रिज्याप्रमाणेनग्राह्येत्यभिसंधिः। शेषंस्पष्ट
म्। वासनातु। यदित्रिज्यातुल्ययासायनग्रहदोर्ज्ययाजिनज्यातुल्यापमज्यालभ्यतेतदेष्टयाकिमिति जाताक्रा
न्तिज्या। इयंयदिभक्ताक्रान्त्यंशाभवेयुःतेचपञ्चगुणाश्चतुर्भक्ताः फलंपूर्णगुणेषुसंस्कार्यंतदायनंभवतीति ४२
प्रागुक्तम्। अत्रगुणघातोगुणः २४३।४५ हरघातोहरः ९६० एतौगुणेनापवर्त्यस्वल्पान्तरत्वाद्धरेचतुरोगृहीत्वा
दोर्ज्याङ्घ्रिसंस्कृतास्त्रिंशदायनबलमितिपर्यवसितम्। तत्रशनीन्द्वोः सौम्यगोलेयोगोन्तरं तुल्यहरंशाक्ना
मित्युक्तेर्दोर्ज्याचतुर्थांशस्त्रिंशतुसमच्छेदविधानेनशोध्यः। समच्छेदंतुकृतस्वगुणस्थानेत्रिज्याजाता। ततोद्रो

भौम ज्यांशोधिता जाता कोट्युत्क्रमज्या। यतो भुजज्योना त्रिज्या कोट्युत्क्रमज्येति सिद्धान्ते प्रसिद्धतरम्। तस्मात् कोट्युत्क्र
३९ मज्या द्विघ्ना तुल्यं सौम्ये बलमिति युक्तम्। याम्ये तु दोर्ज्या द्विघ्ना त्रिज्या चतुर्थांशे योज्यस्तत्र दोर्ज्यायाः खण्डद्वयम्।
एकं कोट्युत्क्रमज्या तुल्यमृणगतम्। अपरं त्रिज्यातुल्यं तत्र त्रिज्याद्वययोगश्चतुर्भक्तो जाता त्रिष्टिः। अतः कोट्युत्क्रम
ज्याद्विघ्नूना षष्टिर्बलमित्युपपन्नम्। शेषं सुगमम्। प्रकृतमनुसरामः। अर्कस्य द्विघ्नमित्यत्रोपपत्तिः सारावल्याम्।
सूर्येन्दू पुनरुत्तरेण बलिनौ सत्योक्तचेष्टाबले। सूर्य उत्तरेणायनेन गमनेन चेष्टामूलकबलवान्। परमोत्तरगम
ने रवेरत्र विपुलतेजस्त्वलक्षणचेष्टाशालित्वात्तत्पूर्णबलम्। दक्षिणगमनसमाप्तौ विपुलमन्दतेजस्त्वलक्षण
चेष्टाभावशालित्वाद्बलाभावः। गमनक्रान्तिवशादेवेति क्रान्त्या अनुपातेन्यास्ये आयनवीर्यतुल्यमेवेदं चेष्टाबलं
जातमतो रवेरायनवीर्यं द्विघ्नं कृतं तद्युक्तमेव। अयनस्य गमनक्रियारूपस्य चेष्टाशब्दवाच्यत्वादिदमपि चेष्टाब
लमेव विज्ञेयम्। अथ भौमादीनां द्वितीयं चेष्टाबलं वृत्तार्द्धेनाह ॥ ॥ मध्यस्पष्टयुतेर्दलोनितचलं चेष्टाख्य
केन्द्रं कुजात्स्यात्तच्चेद्भगणाच्च्युतं षडधिकं षड्हृत्त्वचेष्टाबलम् ॥ ॥ मध्यस्पष्टग्रहयोर्योगार्द्धेनऊनि रामः
तं चलं शीघ्रोच्चं कुजमारभ्य चेष्टाकेन्द्रं स्यात्। तच्चेत्षड्राशिभ्योऽधिकं तदा द्वादशराशिभ्यो विशोध्यं ततः षड्भक्तं ३९

सच्चेष्टाबलं स्यादित्यर्थः। चशब्दोऽत्र तुङ्ग-वीर्यानयने यो भजनविधिः स एवावधार्य इति ज्ञापनार्थम्। मध्यस्पष्टवि
वृद्धिहानिदलभाङ्मध्योनशैघ्र्यकुजादिति पाठे व्याख्या। मध्यात्स्पष्टस्याविवृद्धिराधिक्यं हानिर्न्यूनता वा तयोर्दलं भ
जति स तथा स चासौ मध्यश्च तेन ऊनं शैघ्र्यमुच्चकुजाच्चेष्टाकेन्द्रं स्यात्। एतदुक्तं भवति। मध्यस्पष्टयोरन्तरं कार्यं त
दर्द्धं मध्ये संस्कार्यं यदि मध्यात्स्पष्टोऽधिकस्तदान्तरार्द्धं मध्ये देयमन्यथा हेयमिति। तादृशो मध्यमश्चलोच्चाच्छो
ध्यश्चेष्टाकेन्द्रं स्यात्। अस्मात्पाठात्प्राक्प्रदर्शित एव पाठो वरीयान् गणितलाघवात्सत्वरमर्थावबोधाच्च। आचा
र्येणापि स्वकृतटीकायां मध्यस्पष्टयुते दलोनितमिति पाठो लिखितोऽस्ति। अत्र मध्यस्पष्टयोगे द्वादशाधिके द्वाद
शभिस्तक्षणं न कार्यमिति बोध्यम्। अत्रोपपत्तिः बृहज्जातके। उदगयने रविशीतमयूखौ वक्रसमागमगाः परि
शेषाः॥ विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः॥ वक्रसमागमगाः समागमः संबन्धस्तेन व 39
क्रसंबन्धं प्राप्ता वक्रगा इति यावत्। परिशेषा भौमादयः पञ्च चेष्टाबलयुताः स्युरिति। विपुलकरा विपुलबिम्बा इति
यावत्। लघुजातके। वक्रेऽन्योन्यं स्निग्धविपुलाश्चेति। समागमपदं स्पष्टं नैवोक्तं तेन। वक्रगास्तथा समागमगाश्चन्द्र
सहिता बलिन इत्युत्पलव्याख्यानं साध्वी। अत्र विपुलकरा इति चेष्टितवीर्ययुता इति वचनादस्य बलस्यावस्था

चेष्टत्वमूलम्। सा च चेष्टा परमविपुलबिम्बता रूपा परमवक्रगतिस्थाने षड्राशितुल्ये चलकेन्द्रे शून्यसमे शीघ्रके
४० न्द्रे परमसूक्ष्मबिम्बतारूपश्चेष्टाभावः। अतः शीघ्रकेन्द्राण्येव चेष्टाकेन्द्राणि षड्राशितुल्ये शीघ्रकेन्द्रे रूपं संपूर्णं ब
लं शून्यतुल्ये बलाभावः। अन्तरा तु यदि षड्राशितुल्येन चेष्टाकेन्द्रेण रूपं बलं तदेष्टघडला चेष्टाकेन्द्रेण किमित्यनु
पातेन बलानयनं युक्तम्। अत्राचार्यैः शीघ्रकेन्द्राण्येव चेष्टाकेन्द्राणीति सुगमं विहाय मन्दफलद्वयार्द्धसंस्कृतम
ध्योनं चलोच्चं चेष्टाकेन्द्रं स्यादित्यङ्गीकृतं तत्रोपलब्धिरेव वासना। अथ फलद्वयार्द्धसंस्कृतमध्येनोनं चलोच्चं किल
चेष्टाकेन्द्रम्। तत्र प्रकृते फलद्वयमज्ञातं तत्साध्यते। मध्यस्फुटान्तरं फलद्वयम्। यतो मध्यः फलद्वयसंस्कृतः स्पष्टो
भवति। तदर्द्धेन संस्कृतो मध्यश्चलोच्चाच्छोध्यश्चेष्टाकेन्द्रं स्यात्। अतो मध्यस्पष्टविवृद्धिहानिदलभागित्याद्युपपन्न
म्। यद्वा। विपरीतफलद्वयार्द्धसंस्कृतचलोच्चादेव मध्यः शोध्यश्चेष्टाकेन्द्रं भवति। तथा च श्रीपतिः॥ मध्यस्पष्टद्युचरवि
वरार्द्धेन युक्ताच्चलोच्चान्मध्ये स्पष्टादधिकवपुषि न्यूनके वर्जिताच्च। जह्यान्मध्यग्रहमिति च भवेच्चेष्टाख्यकेन्द्र
मिति। अत्र जह्यात्स्पष्टग्रहमित्यपपाठः। बहूनामसंमतत्वात्। अत्राचार्यैः क्रियोपसंहारं कृत्वा मध्यस्पष्टद्युतेरिति रामः
पाठान्तरमुक्तं तत्र युक्तिर्मध्याधिके स्पष्टे तावदुच्यते। मध्योनः स्पष्टः फलद्वयं तदर्द्धं फलद्वयार्द्धं जातमेतम [illegible] ४०

न्मध्येसमच्छेदविधानेनयोजितंजातंमध्यस्पष्टयोगार्द्धम्।म॰स्प॰यो शुभतोमध्यस्पष्टयुतेर्दलमित्यनेनफलद्वया
र्धसंस्कृतोमध्यइतिसाधितंभवति।एवंमध्योनेस्पष्टेयोज्यम्।अनेनहीनंचलोच्चंचेष्टाकेन्द्रंस्यादत्रकिंचित्रम्।अतःसर्वमुपप
न्नम्॥ इदानींनिसर्गबलमाह ॥ ॥ स्यादेकोत्तररूपमद्रिविहृतंनैसर्गिकंस्याद्बलंमन्दारज्ञसुरेज्यशुक्र
शशभृत्तीक्ष्णद्युतीनांक्रमात् ॥ १० ॥ स्यादितिपूर्वेणान्वयः।एकोत्तरंरूपमद्रिविहृतंसप्तभक्तंसन्मन्दादीनां
क्रमान्नैसर्गिकंबलंस्यात्।एकउत्तरोऽधिकोयस्यतत्तथा।तच्चतद्रूपंचएकोत्तररूपम्।एकादिसप्तान्ताअङ्काःस
प्तभक्तानैसर्गिकंबलंस्यादितिनिष्कृष्टोऽर्थः।अत्रोपपत्तिर्बृहज्जातके।शकबुगुशुचराद्यार्कवृद्धितोवीर्यवन्तः।अत्र
शादिभिराद्याक्षरैरुपलक्षिताः शन्याद्याग्रहावृद्धितोबलिनःस्युः॥ अत्रसर्वापेक्षयारवेःसंपूर्णबलंसंपूर्णतारू 40
पात्मिकेतिरूपंबलम्।अतोरूपसप्तमांशः शनेर्बलमेवंसप्तांशोपचयाद्भौमस्यसप्तांशद्वयमेवंबुधादीनांनिसर्ग
बलमुपपन्नम्।एतद्बलंकदापिनक्षीयतेनाप्युपचीयतेसर्वदासममेवेतिनैसर्गिकबलमित्यस्यनामधृतंपरा
शराद्यैः।नैसर्गिकंस्वाभाविकमितियावत्।अत्रपुस्तकेतुस्यादेकोत्तररूपमित्यस्यार्द्धस्यशुद्धेबाणवियोगेऽह दि
त्यर्द्धस्याक्लिखनंलेखकभ्रमजंदृश्यम्।अन्यथासभेदस्यचेष्टाबलस्या[illegible]भिधानान्मध्यएव।निसर्गबलाभिध

ग्रै.म. नेऽर्थान्तरंस्यात्।यद्वायोद्धबलस्यकादाचित्कत्वाद्ग्रहयोरेवयोगेचेष्टाबलंतत्रभवतीतितस्यचोक्तत्वान्निसर्गब
४१ लमुक्तमितिवाकिंचिद्विरुद्धम्।अथयुद्धजबलाख्यंभौमादीनांतृतीयचेष्टाबलमाह॥ ॥ युद्धेबाणवियोगग्रह
त्वचरयोर्वीर्यैक्ययोरन्तरंस्वंसौम्यस्यबलेक्षयंचयमदिक्स्थस्यकुर्याद्बले॥ ॥ खचरयोस्ताराग्र
हयोर्युद्धेसतिवीर्यैक्ययोर्युद्धजबलातिरिक्तसर्वबलैक्ययोरन्तरंरूपादिबाणयोःकलात्मकंकदम्बाभिमुखश
रयोर्वियोगेनहृद्धक्तंसद्युद्धबलंस्यात्तत्सौम्यस्यसोत्तरदिक्स्थितग्रहस्यबलेस्वंधनंकुर्यात्।यमदिक्सं
स्थस्यबलेक्षयंमृणंकुर्यात्।गणकइतिशेषः।बाणान्तरंतुसमदिशोःशरयोरन्तरेणभिन्नदिशोर्योगेनभवति।
यस्योत्तरःशरःसउत्तरदिक्स्थोग्रहोदक्षिणशरोदक्षिणदिक्स्थः।दिक्साम्येयस्याल्पशरःसोऽन्यदिक्स्थइति
ज्ञेयम्।ननुकिंनामयुद्धंतच्चकेषांभवतीतिनजानीमइतिचेत्।उच्यते।समागमाभावेसतिस्पष्टग्रहयोराश्यंश
कलासाम्यमेवयुद्धम्।केवलंराश्यंशकलासाम्यमेवयुद्धमित्युक्तेसमागमेपिस्पष्टग्रहयोराश्यंशकलासाम्य
स्ययुद्धलक्षणमतिव्याप्तमतस्तद्वारणायसत्यन्तम्।भिन्नराशिस्थत्वेपिसमागमाभावाद्युद्धलक्षणंमाप्रसाङ्क्षी रामः
दितिराश्यंशकलासाम्यमित्युक्तम्।नन्विदंलक्षणमयुक्तम्।परमास्तमयेसमागमाभावेसतिस्पष्टग्रहयोश्चन्द्रा ४१

द्विगद्धान्यतरसूर्ययोराश्यंशकलासाम्यस्य सत्वेनातिव्याप्तेः। सूर्येणास्तमयः सहेति सूर्यसिद्धान्तोक्तिविरोधा
च्च। तस्मात्समागमपरमास्तमयाभावकालीनस्पष्टग्रहराश्यंशकलासाम्यमेव युद्धमिति वाच्यम्। तथा सति नक्षा
ऽव्यतिव्याप्तिः। न च घटसत्वेऽपि घटपटौ न स्त इति प्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकोऽभावोऽवश्यं स्वीकरणीयः।
तथा च समागमे समागमाभावाभावेऽपि समागमपरमास्तोभयाभावादेवं परमास्तमये परमास्तमयाभावाभावे
ऽपि समागमपरमास्तोभयाभावाद्राश्यंशकलासाम्यस्य युद्धलक्षणं तवाप्यतिव्याप्तमिति वाच्यम्। समागमस्य
परमास्तमयस्य च प्रतियोगिनः सत्वेन तत्र तदभावानभ्युपगमात्। तथा सति पूर्वलक्षणमसंगतमिति चेत्। मै
वं वोचः। स्पष्टग्रहयोरित्यत्र भौमादिपञ्चकान्यतमयोः स्पष्टग्रहयोरित्यर्थस्य विवक्षितत्वात्। परमास्तमये स
मागमस्य सिद्धान्तिद्विभ्यां निषेद्धुमशक्यत्वाच्च। समकलयोस्ताराग्रहयोः सूर्यसांनिध्यवशेनास्तमये युद्ध
शङ्काव्युदासार्थमस्ताभावकालीनमिति विशेषणं देयम्। केचिदायनदृक्कर्म ग्रहेषु देयमित्याहुस्तद्वारणाय वा
स्तवपदमपि देयम्। तथा च समागमास्ताभावकालीनं भौमादिपञ्चकान्यतमयोर्वास्तवस्पष्टग्रहयोराश्यंश
कलासाम्यमेव युद्धमिति फलितम्। ननु भेदयोगान्ययोगे दृक्कर्म देयमि[illegible]के दृक्कर्मदानमावश्यकं तथा स

प्रौ॰म॰ तिनदेयमितियदुक्तंतदयुक्तमितिचेन्न।यद्यकृतेपिदृक्कर्मणियुतिःसाध्यतेर।पिभवतीतिभाष्येभा[illegible]राचार्यै
४२ रुक्तत्वात्।परंसायुतिरायातिसाकदम्बाभिमुखीलोकेकदम्बप्रसिद्धतारयोरभावाद्दृष्टःप्रतीतिर्नो[illegible]तद्गति
तत्रदृक्कर्मदेयमेव।प्रकृतेतुबलान्नयनेदृष्टःप्रतीतेरनपेक्षितत्वाद्दृक्कर्मव्यर्थम्।अतएवाहुर्मिश्राः।बास्तवस्प
ष्टखेटानामिति।चन्द्रादीनांसूर्येणसंयोगोऽस्तमनसंज्ञः।भौमादीनांचन्द्रेणसंयोगःसमागमशब्दवाच्यः।भौमा
दीनांपरस्परसंयोगःकदाचित्समागमःकदाचिद्युद्धम्।तदुक्तंसूर्यसिद्धान्ते।ताराग्रहाणामन्योन्यंस्यातांयुद्ध
समागमौ॥समागमःशशाङ्केनसूर्येणास्तमयःसहेतिताराग्रहाणांताराकाराणांग्रहाणांभौमादीनांपञ्चानांयु
द्धंसमागमश्चद्वावेतौभवतः।तत्रयुद्धभेदाश्चत्वारः।तथाचवराहः।आसन्नक्रमयोगाद्भेदोल्लेखांशुमर्दनास
व्यैः॥युद्धंचतुःप्रकारंपराशराद्यैर्मुनिभिरुक्तम्।लक्षणानिसूर्यसिद्धान्ते॥उल्लेखस्तारकास्पर्शेभेदेभेदःप्रकी
र्त्यते॥युद्धमंशुविमर्दाख्यमंशुयोगेपरस्परम्॥१॥अंशादूनेपसव्याख्यंयुद्धमेकोत्रचेदणुरिति॥अंशादूनेन्तरेस्य
ताद्वावपिस्वल्पबिम्बौतदाकूटविग्रहाख्योभेदः।अयमपिभेदःपराशरेणापसव्याख्यभेदान्तर्गतएवकृतः।अं रामः
शादूनेऽन्तरेउभावपिपृथुबिम्बौतदासमागमएवापसव्याख्ययुद्धम्।अतएवतत्रोक्तम्।आसन्नावप्युभौदीप्तौ ४२

भवेतस्तौ समागमे इति॥ अंशाधिकेन्तरे यदा द्वावपि पृथुबिम्बौ तदा समागम एव न कूटविग्रहः॥ समागमांशादधि
के भवतश्चेद्दूलान्वितौ इति॥ अत्र बलशब्देन स्थानादिबलं न ग्राह्यं किंतु बिम्बस्थौल्यरूपं रूपबलमेव ग्राह्यमिति
ब्रह्मसिद्धान्ते उक्तम्। स्थानादिबलचिन्तात्र व्यर्थाकेनापि न स्मृता॥ प्रश्नत्रये यवाप्यस्मिन्स्थौल्यसौक्ष्म्यबलं स्मृतमि
ति। सूर्यसिद्धान्तटीकायां चोत्पलभट्टेनाप्येवमेव व्याख्यातम्। अंशादधिकेन्तरे यदा द्वावपि स्वल्पौ तदा कूटविग्र
ह एव न समागमः। अंशान्न्यूनेन्तरेपि यदा द्वावपि स्वल्पौ तदा कूटविग्रह एव। अत एवाविशेषेणोक्तम्। स्वल्पौ द्वाव
पि विध्वस्तौ भवेतां कूटविग्रहाविति फलितोऽयमर्थः। तारकास्पर्शनिमित्ते उल्लेखाख्यं युद्धं तारकाभेदनिमित्ते भे
दाख्यं युद्धम्। अंशुयोगनिमित्तेंऽशुविमर्दाख्यं युद्धम्। अंशादूनान्तरयोर्ग्रहयोरेकस्याणुत्वे निमित्ते ऽपसव्याख्यं यु 42
द्धं द्वयोरणुबिम्बत्वे कूटविग्रहाख्यं युद्धं द्वयोः पृथुबिम्बत्वे निमित्ते समागम एव न युद्धम्। अन्यथा युद्धसमाग
मसंकर इति भौमादिपरस्परयोगस्य सप्त भेदा भवन्तीत्याहुर्वासनावार्तिकप्रणेतारः [illegible]स्थितचरणा नृसिंहदैव
ज्ञाः॥ इदमत्रावधेयम्। ग्रहयोगवियोगात्मके ग्रहान्तरे मानैक्यखण्डतुल्ये तारकास्पर्शस्तन्न्यूने तारकाभेदो मा
नैक्यार्द्धादधिके ग्रहार्धान्न्यूनेंऽशुविमर्दः। आरादंशार्धमन्यूनं व्याप्तिरिति ब्रह्मसिद्धान्तोक्तेः। ग्रहान्तरेंऽश[illegible]दधिके ग्रा

ग्रै॰ भा॰ त्वे सत्येकस्याणुत्वे पसव्याख्यं युद्धं द्वयोरणुत्वे कूटविग्रहाख्यम्। अंशादूनेऽधिके वान्तरे द्वयोरणुत्वे वृ टविग्रहो
४२ द्वयोः पृथुबिम्बत्वे समागम एव। शीघ्रकर्णे त्रिज्याधिकेऽणुबिम्बत्वं त्रिज्याल्पे पृथुबिम्बत्वमिति। अत्र युद्धप्रदोपा
दानां समागमादीनामयं संस्कार इति बोध्यम्। एवं त्र्यादीनामपि युद्धे द्वयोर्द्वयोर्ग्रहसं[illegible] द्वबलव्यतिरिक्तसर्वबले
कयोरेवान्तराद्ग्रहान्तरेण फलमानीय यथोक्तबलसंस्कारः कार्यः। अत्र ग्रहे आयनदृक्कर्मशरेनति संस्कारस्तद्
नुपपत्त्याद्युत्तरविशिष्टत्वस्ताडितात्रिज्यया प्रदृत्त्वेन स्पष्टता च न कार्या। प्रयोजनाभावात्। अत्रोपपत्तिरुच्यते। बृ
हज्जातके। विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्या इति। परिशेषादित्यनु[illegible] रवीन्द्वोश्चेष्ट
बलस्योक्तत्वात् [illegible] शेषा भौमाद्या युद्धे उत्तरसंस्थाश्चेष्टाबलयुताः स्युः। यतो विपुलकराः। विपुलकरा इति चे
ष्टाबलहेतुभूत चेष्टोपन्यासः ग्रहयुतावुत्तरस्थस्य जयवशाच्चेष्टाधिक्यं दक्षिणस्थस्य पराजयवशाच्चेष्टाह्रासस्त
दिहोत्तरस्थस्य जयवशाद्बले यावदाधिक्यं तावानेव पराजयवशाद्दक्षिणस्थस्य बले ह्रास इति सिद्धम्। केचित्तु दक्षि
णस्थस्यापि जय उक्तस्तन्मतमत्र न गृहीतं। बृहज्जातके उत्तरसंस्था इति विशेषोक्तेः। अथ लोके समं [illegible] ग्रहः रामः
पराजयो नास्ति। तयोरेकस्य षष्ट्यंशमात्राधिक्ये स्थूलदृष्ट्या साम्येपि सूक्ष्मदृष्ट्या षष्ट्यंशमात्रो जयः पराजयश्चास्ति ४२

[illegible]बलान्तरतुल्योजयः पराजयश्चपर्यवसितः। बलंत्वत्रसामान्याकारेणसर्वमेवागतं परंतुबलान[illegible]योजय
पराजयविचारस्यप्राप्तत्वादितरेतराश्रयभीत्यैतदतिरिक्तसर्वबलैक्ययोरन्तरंबहुयुद्धेपिन्याय्यम्। यदत्रभगणेशे
नपूर्वंप्रदिष्टबलसंकलनंविदित्वेतिवदतानन्तरंप्रदिष्टंदृग्बलंनयोजितंतदतीवतुच्छमित्यवगच्छ। अत्रसर्वेषां
कलापर्यन्तमेवधारणात्कलातोऽल्पेग्रहान्तरेऽन्तराभावलक्षणंसाम्यमेवेतिमिश्राःप्राहुः। ततोत्रपद्धतौयत्रकलाव्य
वहारस्तत्रस्फुटग्रहयोःसाम्येशरसाम्येचैककलातोल्पेन्तरेसाम्यमेवेतिफलितम्। एवंसतिबलान्तरतुल्यःपरमो
जयःपराजयश्चयुद्धस्य[illegible]तर्षेपरमसांनिध्येशरयोरन्तराभावलक्षणेसाम्येसमुचित[illegible]शरयोरेक
कलातोऽल्पे[illegible]न्तरेयथोक्तान्तराभावलक्षणसाम्याद्याम्योदक्स्थत्वव्यवहाराभावेनज[illegible]वात्संस्काराभावएव। 43
ततःशरयोःकलामात्रान्तरेयाम्योदक्स्थताप्रवृत्तेस्तत्रबलान्तरतुल्योजययो[illegible]श्च। अ[illegible]पातः। यदिकलामात्रेण
ग्रहान्तरेणबलान्तरतुल्यंबलंप्राप्यतेतदैककलादिनाग्रहान्तरेणकिमिति। अत्रराशि[illegible]व्यापको[illegible]पादिच्छा
वृद्धौफलह्रासादितिव्यस्तत्रैराशिकेणबलान्तरस्यकलादिग्रहान्तरंहरः फलमुदक्स्थस्यजयोक्तेस्तस्यबल[illegible]युक्तं
णस्थस्यपराजयोक्तेस्तद्बलेहीनंकर्तव्यमितियुक्तम्॥ एवंसभेदंचेष्टाबलमत्रस्याप्येदानींदृग्बल

॥ ४ सदृक्ष्यपाङ्घ्रियुगुग्मदृष्टिचरणोनंखेटवीर्यंभवेत् ॥ ॥ प्रागानीतंवीर्यंसर्वांशुभग्रहाणां [illegible] ग्रह
ष्टीनसंहृ [illegible] णाचतुर्थांशेनरूपादिनायुक्युक्तंकार्यम्। उग्राणांपापानांदृष्टिचरणेनोनंकार्यम्। एवंकृते [illegible] तत्खेट
वीर्यंभवेत्। जातावेकवचनम्। तेनखेटवीर्याणिभवेयुरित्यर्थः। यद्वाशुभदृष्टि [illegible] पापदृष्टियोगचतुर्थां
शयोरन्तरं [illegible] ग्रवीर्यंस्यात्। शुभदृष्टियोगचतुर्थांशात्पापदृग्योगतुर्यां [illegible] शुद्धेशेषं [illegible] गातं दृग्बलमितरथ ॠ
णमितिवेद्यम्। ततः षष्ठां [illegible] नांयोगकृते षड्भिर्लब्धंतदेवात्रसर्वत्रबलशब्दे [illegible] ग्रवत्रियते। [illegible] पापैः। लघुजातके
बलवान्मित्रस्वगृहोच्चनवांशेष्वीक्षितःशुभैश्चापि॥ शुभैर्दृष्टोग्रहोबलवानर्थात्पापदृष्टोनिर्बलः [illegible] अत्रेन्दोः सर्वदै
वशुभत्वाद्बुधस्यचशुभत्वेचत्वारःशुभाःस्युःपापत्वेचत्वारःपापाः। यदिचत्वारःशुभाःपापावा [illegible] संपूर्णदृष्ट्याप
श्येयुस्तदारूपतुल्यं [illegible] बलंधनमृणंचक्रमेणोचितम्। अतोऽनुपातः। यदिचतूरूपमितयासर्वदृष्ट्यारूपंलभ्यते
तदृष्टियोगेनकिमितिशुभदृग्योगस्यपापदृग्योगस्यचचतुर्थांशः क्रमेणधनर्णंदृष्टिबलमितिनिष्पन्नम्॥ ॥ इदानीं
भावानांत्रिविधबलमाह॥ ॥ भावानांबलमीशजंचनृचतुष्पादादिकीटाम्बुजाः॥११॥ ऊ [illegible] खभो एमः
निताः खलुततोदिग्वीर्यंवचत्युतं सदृक्ष्यपाङ्घ्रियुगुग्मदृष्टिचरणोनंज्ञेज्यदृग्युक्पुनः ॥ ॥ अस्यार्थः तावत् ४४

योर्थः।भावानांस्वामिबलमेवबलमेकम्।चपुनर्नृचतुष्पादारव्यकीटाम्बुजाः।नरचतुष्पादकीटजलचरराशयोभ
वा[illegible]मचतुर्थतनुदशमभावेस्थिताः यदिषड्बाधिकास्तदाचक्रशुद्धाः १२ षड्बाल्पायथास्थिता[illegible]पा[illegible]ः फ
लंदिग्बलंद्वितीयम्।अनेनदिग्बलेनस्वामिबलंयुतंकार्यंसबलद्वयमयोभवेत्शुभग्रहदृष्टियोगचतुर्थांशपापदृ
गैक्यचतुर्थांशयोरन्तरप्राग्वदूनमृणंदृग्बलम्।तद्बुधस्यगुरोश्चसमग्रपादृशायुतंकार्यम्।यदिग्रहवलाधिकंदृ
ग्बलंधनगतंतदा[illegible]बुधगुरुदृष्टियोगोयोज्यः चेदृणंतदाबुधगुरुदृग्योगेनसहान्तरंकार्यंशेषम्[illegible]दृग्बलंस्यात्।
दृढंतु[illegible]वाणांयो[illegible]वस्यबलंस्पष्टंभवति।अत्रमतस्थानिप[illegible]दतिप्रकाशे।अथत्रिधा[illegible]यदामिस्वस्वा
मिवीर्यबलमुक्तमेकम्।नभोगवदृष्टिबलंद्वितीयंसमग्रचान्द्रोज्यदृगैक्य[illegible]कम्॥१॥धन[illegible]सा[illegible]दृगुग्नदृष्टि
क्रे पापि[illegible]वैक्यधनयोस्तुयोगः॥धनर्णयोरन्तरमेवयोगस्त्वेवंविदित्वायुतिर[illegible]कार्या॥[illegible]कीटपश्वम्बुचराणिभा
निजाद्यावेश्माम्बरभोनितानि॥यथाषड्बल्पानिलवीकृतानित्रिभिर्विभक्ता।[illegible]तानि॥२॥अत्रोपपत्तिः॥ 44
सारावल्यांमलग्नाधिपेनतुल्यंबलमिहचूडामणिर्वदति।लग्नमित्युपलक्षणं तेन[illegible]वशाबलमेवभाव[illegible]मित्य
र्थः अतोयुक्तमुक्तंभावानांबलमीशजमिति।नरचतुष्पदादिराशयः केतेचकस्यादिशिबलिनइतिम[illegible]गर्गे

प्रौ॰ म॰ योक्रमः।नृयुक्तुलाघटःकन्यापूर्वमर्द्धंचधन्विनः॥लग्नस्थाबलिनोनित्यमेतेहिनरराशयः।१।चतुर्थेकर्क[illegible]मीनो
४५ मकरार्द्धंचपश्चिमम्॥विज्ञेयाबलिनोनित्यमेतेहिजलराशयः।२।सप्तमेवृश्चिकः[illegible]नवा[illegible]कीर्तिताः॥धन्व
र्द्धार्द्धं[illegible]येसिंहाबलिनःखेचतुष्पदाः।३।इति।अत्रार्द्धशब्देनावशिष्टेमकरपूर्वार्द्धेबो[illegible]रचतुष्पदादिराशीनां
प्रोक्तदिशिसंपूर्णबलंततःसप्तमेबलाभावस्तदन्तरेऽनुपातेनबलानयनस्य[illegible]चरदिग्ब[illegible]शस्त्या।अत्रगणेश
नाम्नाकु[illegible]करार्द्धंमानुषंपूर्वार्द्धंचतुष्पदमित्युक्तम्।अन्येनतुसंपूर्णःकुम्भोजलचरइत्युक्त[illegible]यमपिगर्गप
राशरादिविरोधात्[illegible]कल्प्यम्।किंच।पराशरेणकर्कवृश्चिकौकीटावित्युक्तंतदपिनादरणीयं[illegible]नामसंमत
त्वात्।कर्कोजलचरोवृश्चिकःकीटइतिसर्वसंमतम्।अथशुभदृष्टोराशिर्बलवान्पापदृष्टोनबलवानितिशुभदृष्टेः
पापदृष्टेश्चतुर्थांशोयोज्योवियोज्यश्चक्रमेणेदंप्रागुपपादितमेव।बुधजीवनिरीक्षितोराशिर्बलवानितिलघुजात
कादौबुधजीवदृष्टेर्विशेषेणपुनरुपात्तत्वात्समग्रबुधदृष्टौसंपूर्णजीवदृष्टौचसंपूर्णरूपंबलमि[illegible]एव
तेजातेगणितागतयासकलयाबुधदृष्ट्याजीवदृष्ट्याचयुतंकार्यमितिसर्वंपरिच्छिन्नम्॥यत्तु।नरराशीनांगुरुशुक्र रामः
योस्त्रिकोणत्वंबुधस्यचगृहत्वमितिप्रत्यक्षसिद्धमेव।तस्तेषांरूपंबलंवृश्चिकराशौबलाभावः।पश्चीनीचत्वाच्च ४५

न्द्रस्य बलशून्यत्वमित्यादियुक्तिमेन्दानन्दकरीसूर्येण गर्गादिमुनिग्रन्थापटुनाम्नी पद्धतिपद्धतिवृत्तौ प्रतिपादितासा
नितरामयुक्तेतिबोध्यम्। वृश्चिके चन्द्रस्य बलाभावाल्लग्नस्यापि बलाभावेन भाव्यमिति यो ब्रूयात्स कर्थं? तदृहास्योनस्या
त्। यद्यत्र मम एव प्रमाणं तदा किमनेन वृथायुक्तिलिखनेन। अत्र शास्त्रे सर्वत्रागम एव प्रमाणं तथापि सद्युक्तिश्चे
त्स्फुरिता सा लेख्या। तस्मादार्षग्रन्थानभिज्ञानां यत्किंचिद्युक्तिं प्रतिपादयतां तत्प्रकरणव्यसनमायुष्मतां वृथैव॥ ॥
अथोत्तरार्द्धेन रवीन्द्वोश्चेष्टाबलसाधनमाह॥ ॥ त्र्यर्केन्दुस्त्रिभयुक्तसायनरविश्चेष्टाख्यकेन्द्रं तयोर्गोकष्टे
ष्टविधौ बले कुरुतत: प्राग्वन्नवीर्यायते॥१२॥ सूर्योनश्चन्द्रश्चन्द्रस्य चेष्टाकेन्द्रं स्यात् [illegible] येण यनांशैश्च 45
युतो रविः सूर्यस्य चेष्टाकेन्द्रम्। ताभ्यां केन्द्राभ्यां प्राग्वद्धोमादिचेष्टाबलवद्भगणाद्युतं षडधिकं षड्ह
दित्यादिना तयोः सूर्याचन्द्रमसोर्बले कुरु शिष्यनिमन्त्रणे लोट्। कस्मिन्विषये [illegible] गोकष्टेष्टवि
धाविति। गावो रश्मयः कष्टम् दृष्टं च प्रसिद्धम्। अनयोश्चेष्टाबलयो रश्मीष्टकष्टसाधने उपयोगो [illegible] र्थः। नवी
र्याय। बलैक्ये कर्तव्ये नोपयोग इत्यर्थः। अतएव बलसमाप्तावेतच्चेष्टाबलमभिहितम्। अत्रोपपत्तिः प्राग्भदाह
ते सारावलीवाक्ये रवेरुत्तरायणे चेष्टायाः प्रतिपादितत्वादुत्तरगमनारम्भे सायननवराश्यन्ते भूनचेष्टाकेन्द्र

मा।परमोत्तरगमनेसायनराशित्रयान्तेषड्राशिमितंचेष्टाकेन्द्रंतत्तुराशित्रययोगेनभवतीतितयोः म्।परमि
दंस्थूलम्।वस्तुतस्तुगमनस्यक्रान्त्यधीनत्वात्क्रान्त्यनुपातेनप्रागुक्तेनरविचेष्टाकेन्द्रसाधनंन्याय्यम्।तत्का
लेभागागतभागलब्धभाद्येनसंस्कृतगुणादृश्यनेनयद्दृष्टेराशिप्रभृतिफलमागच्छति।तदेव[illegible]चेष्टकेन्द्रंसाम्यम्।
स्थूलस्यास्यचेष्टाकेन्द्रस्यग्रहणेतुचेष्टागुणवैलक्षण्यात्द्व्यायुषिमासाद्यन्तरयाततस्थूलमिदंचेष्टाकेन्द्रमसदे
वेतिसुन्दरोक्तःपन्थानितान्तरमणीयःस्वीकरणीयः॥चन्द्रउत्तरेणबलीस्यादित्युत्तरस्य पमित्यादावुत्तरशब्दस्या
धिक्यार्थत्वादाधिक्येनचेष्टामूलकबलवान्।आधिक्यंतत्वर्यादृग्यपेक्षया।ततोरवेःषड्भाधिकेच रमविप्रकृष्टेपौ
र्णमास्यन्तेषड्भमितंचेष्टाकेन्द्रंतथामान्तेसूर्यसमेचन्द्रेआधिक्याभावाच्चेष्टाकेन्द्रंशून्यंतच्चव्यन्द्रुनैवभवतीति
तयोक्तम्।अतोनुपातेनावान्तरेसाधितंबलंशुक्लपक्षबलतुल्यमेवायातीतिपूर्वपक्षबलंद्विघ्नमुक्तम्।एतेनद्वि
गुणेअयनपक्षवीर्येचेष्टाबलेतिमकराद्ययोःस्तः॥इतीरितंश्रीपतिनानितान्तंनतन्मतंचारुविचारयुक्त्ये
तिरत्नावलीकारमतमपास्तम्।अतोरवीन्द्वोश्चेष्टाबलेप्रागेवयोजितत्वान्नवीर्यायभवतइतिसर्वंसुगमम्।इ
हज्ञानंकपि।उदग्गमनेरविशीतमयूखौचेष्टितवीर्ययुतौपरिकल्प्यौविलग्नचन्द्रपक्षेउदक्पदपर्यायोत्तरपद

वान्यत्वसंबन्धेनाधिक्यार्थेलक्षणास्वीकर्तव्या। सर्वेगत्यर्थाः प्राप्त्यर्थास्तदयनेप्राप्नादितियावत्। तेनोदगयनद्वय
स्याधिक्यप्राप्तावित्यर्थेसर्वमनवद्यम्॥ सवासनायासमकारिवृत्तिर्दिवाकरेणामलकेशवोक्तेः। मितव्यसंप्राप्तधि
यारवगानांश्रीयोधिकारःसमगात्समाप्तिम्॥ ॥ इतिश्रीसांवत्सरवरतरकेशवदैवज्ञकृतजातककर्मपद्धतेष्टी
कायांसवासनायांदिवाकरविरचितायांप्रौढमनोरमाभिधायांबलाध्यायस्तृतीयः॥ ॥ अथेष्टकष्टसाधनाध्यायो
व्याक्रियते। तत्रप्रथमंरवीन्दुचेष्टाबलंयोगीकष्टेष्टविधावुपयोगोस्तीत्युक्तं तत्रकोनामरश्मिः के चेष्टकष्टे इत्युप
स्थितौतदानयनंवृत्तेनैकेनाह॥ ॥ येचेष्टोच्चबलेरसैर्विनिहतेसैकेनिजारश्मयश्चेष्टास्तुङ्गबलाहतेः प 46
दमिहेष्टेस्याद्दलोनैकयोः। घातान्मूलमिदंहिकष्टमथतद्रूपंदशाप्ताः फलंवीर्येदक्षरथगिष्टकष्टगु
णितेद्वेष्टेष्टकष्टाह्वये॥ १२॥ येचेष्टाबलोच्चबलेसूर्यादीनांप्रागानीतेतेरसैः षड्भिर्विनिहतेगुणितेस्ततःसैके
ऊर्ध्वस्थानेरूपसंयुतेसतीनिजाःस्वकीयारश्मयोमरीचयःस्युः। चेष्टाबलाच्चेष्टारश्मयउच्चबलादुच्चरश्मयःस्युरि
त्यर्थः। अत्रोपपत्तिः। स्वोच्चस्थेग्रहेसप्तमरीचयःपरमनीचस्थेतुपरमाल्पारूपमितामरीचिरित्यागमएवप्रमाणम्। तत्रो
च्चनीचखगान्तरंपरमंषड्राशिसमंनीचेनीचग्रहान्तराभावः। अतोनीचग्रहान्तरतएवरश्मिसाधनंकर्तुंयुज्यते। ता

प्रौ·म· त्रानुपातः। यदि षड्राशितुल्येन नीचग्रहान्तरेण षण्मरीचयस्तदेष्टषट्तुल्यनीचग्रहान्तरेण किमिति। अत्र नीचग्रहा
४७ न्तरं षड्भिर्गुणनीयं षड्भिरेव भाज्यमिति जातं। तत्र षड्भक्तं नीचग्रहान्तरमुच्चबलं प्राक् प्रतिपादितमेव। अतस्तदेव ष
ड्भिर्गुणनीयं ततो रूपगुणमुच्चरश्मयो भवन्तीति निष्पन्नम्। एवं शून्ये चेष्टाकेन्द्रे पूर्ववदेको रश्मिः। षड्भमिते सप्त र
श्मयः। सत्त्वभावादिष्टकष्टार्थं चेष्टागुणार्थं च कल्पिता न तु वास्तवाः। शेषं सुगमम्। यद्वा। चेष्टोच्चकेन्द्रराशयः सैकाद्वि
गुणांशादियुतां चेष्टोच्चरश्मी भवतः। तथा च पराशरः। नीचोनं तु ग्रहं भार्द्धाधिकं चक्राद्विशोधयेत्। उच्चरश्मिर्भवे
द्राशिः सैको द्विघ्नांशसंयुतः। चेष्टाकेन्द्रं कुजादीनां पूर्वाध्याये समीरितम्। उच्चरश्मिवदानीय चेष्टारश्मिमिति पूर्वप्रद
र्शितेऽनुपाते षट्तुल्ययोर्गुणहरयोः सत्त्वात्सर्वमिदमुपपद्यते। चेष्टोच्चरश्म्योर्योगार्धं स्पष्टरश्मयो भवन्ति। तेषां योगो या
संख्या भवति ततः पञ्चेन्दुतो विंशतिरेव यावद्भस्तपस्ते मनुजं सुशीलमित्यादिजातकफलं निगाद्यम्। तदाह पराशरः
द्व्योर्युतेः। दलं तु शुभरश्मिः स्यादिति। अथेष्टकष्टसाधनमाह। चेष्टातुङ्ग· बलाहतेरिति॥ अत्र पदार्थः सुगम एव। तास्म
र्थस्तूच्यते। चेष्टाबलेनोच्चबलमुच्चबलेन चेष्टाबलं चोच्चावचजनप्रसिद्धयाखण्डगुणनात्मिकया गोमूत्रिकागु रा·म·
णनरीत्या गुणनीयम्। तस्य मूलमिष्टसंज्ञम्। चेष्टाबलोनरूपतुङ्ग· बलोनरूपयोर्घातस्य मूलं कष्टं स्यात्। अत्रेदं त ४७

त्वम्। बलघातस्य बलोनरूपघातस्य वा यस्य मूलं ग्रहीतुमिष्टं स त्रिष्ठोपि षष्टिवर्गे ३६०० णगुणनीयः। ततोधःस्थिता
ङ्कात्तत्कृत्याभागे लब्धमुपर्युपरि संयोज्यय दूर्ध्वस्थाने निष्पद्यते तस्मात्स्यत्कान्त्याद्विषमात्कृतिमित्यादि पाटीगणि
तोक्त्या मूलमानेयम्। पुनर्यच्छेषं ततो मूलावशेषकं सैकं षष्टिघ्नं विकलान्वितम्। द्विसंगुणाद्वियुक्तेन मूलेनाप्तं स्फुटं
भवेदित्याद्युपरिभाषया मूलं ग्राह्यम्। एवं लब्धं द्विष्ठपदं षष्टिभक्तं सत्रिष्ठं मूलमतिस्फुटं स्यात्। तथा च करणकण्ठी
रवे केशवार्कः। यत्षष्टिवर्गनिहतात्पदमभ्रषड्भिर्भक्तं स्फुटं तदिह मूलममूलदस्येति। अत्र बलघातो बलोनरूपघा
तश्च द्विवारं षष्ट्या सवर्णनीयः षष्टिवर्गनिहतघातसमो भवतीति सुगमोपायो वेद्यः। ऊर्ध्वाङ्कः षष्टिगुणोधःस्थाङ्केन 47
युतः पुनरप्येवमेव कार्यम्। एतदेव सवर्णनं त्रिष्ठाङ्कस्यैकस्थानस्थितत्वमिति यावत्॥ अत्रोपपत्तिः। उच्चस्थे ग्रहे
शुभफलं संपूर्णरूपमितमशुभफलाभावः। नीचे शुभफलाभावोऽशुभफलं संपूर्णरूपं मध्येनुपातेनोच्चबलतुल्यमे
वोच्चशुभफलं जातमुच्चबलोनरूपसममेवोच्चाशुभफलं जातम्। एवं षड्भमिते चेष्टाकेन्द्रे संपूर्णरूपं शुभफलमशुभ
फलाभावः। शून्ये चेष्टाकेन्द्रे शुभफलाभावोऽशुभफलं संपूर्णरूपम्। अन्तरा त्रैराशिकेन चेष्टाबलतुल्यमेव चेष्टोत्थं शु
भफलं चेष्टाबलोनरूपतुल्यमेव चेष्टाख्याशुभफलं जातम्। चेष्टोच्चफलयोरनयोः समुच्चयेन फलनिर्णये प्राप्ते संपूर्ण

ग्रै॰ भ॰ ४८ तायांरूपमितायाएवन्याय्यत्वेचोपपत्तिरनुपातद्वितयात्मकपञ्चराशिकेन। यदिरूपमितेसंपूर्णेउच्चफलेसंपूर्ण
चेष्टाफलेसंपूर्णरूपंफलंतदस्मिन्नुच्चफलेसिंद्धेष्टाफलेकिमित्यत्रपञ्चसप्तनवराशिकादिकेन्योन्यपक्षनयनंफल
च्छिदाम्।संविधायबहुराशिजेवधेस्वल्पराशिवधभाजितेफलमितिलीलावतीसूत्रेणचेष्टोच्चफलयोःशुभयोर्घातत
ष्टमशुभयोर्घातःकष्टंजातम्।अत्रोदाहरणम्।यत्रोच्चफलंरूपस्यपञ्चमांशश्चेष्टाफलंषष्ठांशस्तत्रपञ्चराशिकेन्या
सः फलच्छिदामन्योन्यपक्षनयनंविधायन्यासः अत्रफलपक्षोबहुराशिस्तत्रत्यबहुराशिजेघाते
स्मि न१अन्यपक्षीयस्वल्पराशिवधेनानेन ३० भक्तेजातंफलम् $\frac{1}{30}$ फलयोर्घातोप्ययमेवातश्चेष्टो
च्च बलतुल्यचेष्टोच्चशुभफलयोर्घातदृष्टंचेष्टोच्चबलोनरूपतुल्यचेष्टोच्चाशुभफलयोर्घातःक
ष्ट मितिसिद्धम्।अत्रघातरूपेदृष्टेचेदाधिक्यं तदातन्मूलेप्याधिक्यंकष्टेचेदाधिक्यंतदातन्मूले

$\frac{1}{5}$	$\frac{1}{1}$
$\frac{1}{6}$	$\frac{1}{1}$
१	०

$\frac{1}{1}$	$\frac{1}{5}$
$\frac{1}{1}$	$\frac{1}{6}$
$\frac{1}{0}$	१

प्याधिक्यमितिसत्यभावात्प्राचामाचार्याणांसंमतत्वादप्रमाणमपिमूलंगृहीतमाचार्येणेतिध्येयम्।मूलेमूलाभावा
देवाग्रेवर्गस्यशुभाशुभफलस्यवर्गेशुभाशुभफलस्यचघातरूपमेवेष्टमुक्तंनतुतन्मूलरूपम्।अन्यथायुक्तिसा रामः
म्यात्तत्रापिमूलमेवोक्तंस्यादितिश्रीपतिपद्धतिटीकायांसुन्दरमिश्राअप्याहुः।यदाफलद्वययोगेनरूपद्वयमितेन ४८

यदिरूपंसंपूर्णफलंतदेष्टचेष्टोच्चफलद्वययोगेनकिमिंत्स्वनुपातेनचेष्टोच्चशुभफलयोर्योगार्द्धमिष्टंस्यात्तद्रूपाच्छो
धितंकष्टंस्यात्।अयंप्रकारोभगवत्पराशरस्याप्यभिप्रेतः।तथाचपराशरः।उच्चचेष्टाकरैर्व्येकैर्दिग्भिर्हत्वातुयोजये
त्।दलयेदिष्टमन्यत्स्यात्षष्टिभ्योवर्जितंफलम्॥१॥अत्रोच्चचेष्टारश्मीरूपोनौयावद्दशगुणौक्रियेतेतावत्षष्ट्यंशाद्ये
तुङ्गाचेष्टाबलेएवभवतः।अतस्तद्योगार्द्धमिष्टंतदूनषष्टिमितंकष्टमिति।अत्रोपपत्तिः।षड्भस्वल्पंनीचग्रहान्तर
मुच्चकेन्द्रंभवति।चेष्टाकेन्द्रंतुमध्यस्पष्टयोगार्द्धचलोच्चयोःषड्भाल्पान्तरतुल्यंप्रसिद्धमेव।तदुच्चकेन्द्रंचेष्टाकेन्द्रं
चराशिस्थानेसैकंद्विघ्नांशादियुतंसदुच्चचेष्टारश्मीभवतइतितेनैवोक्तम्।अस्योपपत्तिःप्रागुक्तैव।अथरश्मि 48
तौवैपरीत्येनकेन्द्रेसाध्येते।रश्मीरूपोनावथोदलीकृतौकेन्द्रेस्यातांतेसावयवेदशगुणेअथोद्विगुणेचषष्ट्यंशा
द्येतुङ्गचेष्टाबलेभवतः।तस्माद्रूपोनरश्मीदशगुणौबलेभवतइत्युपपन्नम्।शेषोपपत्तिःप्रागुपपादितैव।त
स्माच्चेष्टोच्चबलयोर्घातदिष्टं बलोनरूपयोर्घातःकष्टम्।अथवाबलयोगार्द्धमिष्टं तदूनरूपंकष्टमितिनि[illegible]न्न
म्।मूलरूपेष्टकष्टंतुपराशरादिमुनिमतविरुद्धत्वादयुक्तत्वाच्चायुक्तमेवेतिबोध्यम्।तस्यदूषणान्तरमप्यग्रेवक्ष्य
ते॥साधितयोरिष्टकष्टयोःप्रयोजनमाह॥अथतद्रूपंदशायाःफलमिति॥अथशब्दआनन्तर्ये।दशायाःफलेशुभ

प्रे॰म॰ मशुभंचतद्रूपंस्यात् तद्रूपंतत्स्वरूपमिष्टकष्टतुल्यमितियावत्। एतदुक्तंभवति गणितागतमिष्टंसंपूर्णमर्द्धपा
४९ दोवायावद्भवतितत्तुल्यंशुभफलं कष्टेनतुल्यमशुभंफलम्। दृष्टकष्टयोःसाम्येशुभमशुभंचप्राप्तंफलंतत्पंद्वा
न्मिश्रफलमित्यर्थः। एतद्व्याख्यानंमूलरूपेष्टकष्टपक्षेतावदयुक्तम्। मूलेमानाभावात्। किंच। मिश्रफलस्थले
क्वापिसंपूर्णशुभफलस्यसंपूर्णाशुभफलस्यचावश्यकत्वेमूलरूपेतुमिश्रफलस्थलेऽर्द्धाधिकमिष्टंकष्टंचकदा
पिनस्यादितिदूषणान्तरम्। घातयोगार्द्धपक्षयोरप्येतद्दूषणम्। अपिच। तथात्वेविसदृशाभ्यांघातयोगार्द्धपक्षसा
धितेष्टकष्टाभ्यांशुभाशुभफलनिर्णयेकथमप्येकवाक्यतानस्यादिति। यद्वा। दृष्टेऽधिकेसामान्यतःशुभफलमधि
कं कष्टाधिकेत्वशुभफलमधिकं तत्साम्येमिश्रफलमिति। इदमप्ययुक्तम्। स्वल्पाधिक्यबह्वाधिक्यस्थलेसर्व
त्राधिक्यस्यसामान्यरूपेणकथनस्यानौचित्यात्। अतोन्यथाव्याक्रियते। दशायाःशुभमशुभंचफलमिष्टकष्टस्वरू
पंस्यात्। अयमभिसंधिः। दृष्टेऽधिकेकष्टाद्यावदधिकमिष्टंशुभफलमशुभफलात्तावदधिकंस्यादशुभंफलंशुभफ
लात्तावदूनंस्यात्। कष्टेऽधिकेदृष्टात्कष्टंयावदधिकंतावदशुभंफलंशुभफलादधिकंस्यात्। दृष्टकष्टयोःसाम्येशुभ रामः
मशुभंचफलंसमंस्यादितिसुन्दरमिश्रसंमतमेतद्युक्तिसुक्तंच। सुन्दरमिश्रवाक्यम्। कष्टेष्टयोर्विवरतुल्यमसत्स ४९

तोः स्यादत्रान्तरं द्विफलयोः समतासमत्वेद्विति। नन्विष्टकष्टान्तरतुल्यं शुभाशुभफलान्तरमित्युक्तं तन्न मृष्यामः।
घातरूपयोर्योगार्द्धरूपयोरिष्टकष्टयोर्विरोधादुभयोरपि प्रमाणसिद्धत्वेन विनिगमकाभावादन्यतरपक्षाश्रयण
स्य कर्तुमशक्यत्वादिति चेत्। सत्यम्। घातरूपयोर्योगार्द्धरूपयोरिष्टकष्टयोर्यद्यप्युक्तोऽविरोधोऽस्ति तथाप्यन्तरे
तयोरविरोध एव। अनन्तरोदीरितव्याख्यानेनान्तरस्यैवोपयुक्तत्वात्। मन्दप्रतीत्यर्थमत्रोदाहरणम्। पूर्वमुदाहृते
उच्चचेष्टाशुभफले [illegible] एतदूनं रूपं क्रमादशुभं फलं [illegible] शुभफलघात इष्टम्। १/३० अशुभफलघातः कष्टम्। ३/१०
अनयोरन्तरम्। १९/३० एवं शुभफलयोगार्द्धमिष्टम्। ११/१० अशुभफलयोगार्द्धं कष्टम्। ४९/९० अनयोरन्तरमिदम्। ३९/९० द्वा 49
भ्यामपवर्तितं जातम् १९/३० सममेव ततः सर्वमवदातम्। भावस्यानालोकयोगोद्भवं यत्तत्सर्वं तस्य योज्यं दशाया
मित्यभिहितत्वात्सर्वेणापि ग्रहफलेन दशायामेव भवितव्यमिति दशायाः फलमिति युक्तमुक्तम्। वक्ष्यमाणेनेष्ट
कष्टेन केवलं सप्तवर्गफलमेव चिन्तनीयं तदतिरिक्तं सर्वफलमनेनैवेष्टकष्टेन विचारणीयम्। तथा चाहुः। सप्तव
र्गफलादन्यत्सर्वमेतेन चिन्तयेत्॥ सप्तवर्गफलं वाच्यं वक्ष्यमाणेन केवलमिति। अतो दशायाः फलमित्यत्र सामा
न्यशब्दस्य विशेषपरत्वाद्दशायाः फलं सप्तवर्गफलातिरिक्तमिति व्याख्येयम्। ननु सर्वफलं दशायां योज्यमित्युक्ते

 र्दशायाः फलंतद्रूपमित्यनेनैवसप्तवर्गजफलनिर्णये प्राप्ते किमर्थंगुरुतरमाचार्येणपुनरिष्टकष्टानयनंकृतमिति।
 शृणुतर्हि। यदिदमुक्तमिष्टकष्टसाधनंतत्पराशरादिसंमतम्। वक्ष्यमाणंतुयवनसंमतमिति। प्रकारद्वयंस्वस्वम
तेभिन्नमेवास्ति। तथासत्यंशायुर्दायादीनांचतुर्णांस्वस्वमतभिन्नत्वेपियथापूर्वैरंशोद्भवंलग्नबलात्त्रसाध्यमित्या
दिव्यवस्थाकृतातथेदानींतनैः सप्तवर्गोत्पन्नत्वाद्वक्ष्यमाणेष्टकष्टस्यातस्तेनसप्तवर्गफलनिर्णयस्तदितरफलनि
र्णयश्चेष्टोच्चबलोत्पन्नेनेष्टकष्टेनेतिव्यवस्थाकृतेतिनकश्चिद्दोषः। नचसप्तवर्गजेष्टकष्टंयवनोक्तत्वादप्रमाणमि
तिवाच्यम्। ब्रह्मविष्णुरुद्रमुखनिर्गतशापेनयवनतामधिगतेनभगवत्सूर्येणैवयवनशास्त्रप्रणयनात्। तथाचो
क्तमपावनंयावनशास्त्रंकथंविप्रैः पठितव्यमित्याशङ्कायांपूर्वैः॥ केशविष्णुमुखनिर्गतशापान्म्लेच्छताधिगततिग्म
मरीचेः॥ रोमकेनपुरिलब्धमशेषंतद्द्विजादिभिरतोऽध्ययनीयम्॥१॥ म्लेच्छताधिगततिग्ममरीचेरितिपञ्चम्येक
वचनम्। पुरिरोमकपत्तने। अशेषंसमग्रं लब्धंशास्त्रमितिशेषः। अन्यत्स्पष्टम्। अत्रायंविशेषः। ग्रहस्ययन्नवांश
संबन्धिदृष्टिफलंतद्वर्गोत्तमस्वपरगेषुशुभंयदुक्तमित्यादिवक्ष्यमाणविशेषवाक्येनैवविचिन्त्यम्। लग्नस्यसप्तव
र्गजंशुभाशुभफलंतुलग्नहोरादिस्वामिनश्चेष्टोच्चफलोत्पन्नेष्टकष्टेनचिन्त्यमिति॥ ॥अथेष्टकष्टबलदशोरानयन

माह॥ वीर्यंदृक्पृथगिष्टकष्टगुणितेद्वेचेष्टकष्टाह्वयेइति॥ ग्रहस्यवीर्यंषड्बलैक्यंपृथक्स्थानद्वयेस्थाप्यम्। एकत्रे
ष्टगुणमिष्टबलमपरत्रकष्टगुणंकष्टबलंस्यात्। दृगित्यत्रजात्येकवचनम्। तथाचग्रहंप्रतिदृष्टयः पूर्वमानीतास्ताः
ग्रहेष्टेनकष्टेनचगुण्याःक्रमेणेष्टदृष्टयःकष्टदृष्टयश्चभवेयुः। केचित्तु। ग्रहंप्रतियादृष्टयोयेषांग्रहाणामानीतास्ता
स्तत्तद्ग्रहेष्टकष्टाभ्यांगुणनीयाइत्याहुः। अस्यप्रयोजनंग्रहस्यशुभफलंशुभबलवशाद्योज्यमशुभबलवशादशुभ
फलंयोज्यम्। एवंदृष्टिशुभाशुभफलमिष्टदृष्टिकष्टदृष्टिवशाद्योज्यमितिप्राञ्चः। मिश्रास्तु। बलदृग्गुणनमिष्टकष्टेन
व्यर्थमेवेत्यूचुस्तदेवयुक्तमुत्पश्यामः। तथाहि। इष्टेचेदाधिक्यंतदातद्गुणबलदृष्ट्योरप्याधिक्यंकष्टेचेदाधिक्यंत
दातद्गुणितबलदृष्ट्योरप्याधिक्यम्। यावदाधिक्यपक्षेपीष्टकष्टयोःसंपूर्णरूपान्तरस्थलेग्रहस्ययावद्बलमस्ति 60
तावदेवान्तरमिष्टबलयोरेवंयावतीदृगस्तितावदेवान्तरमिष्टदृष्टिकष्टदृष्ट्योश्चभवतिपश्चात्तद्बलेनतयादृशाच
संपूर्णपादषष्ट्यंशकल्पनायामिष्टकष्टयोर्यावदन्तरंतावदेवेष्टकष्टबलयोरिष्टकष्टदृशोश्चान्तरमतोबलदृशो
रिष्टकष्टगुणनंव्यर्थमेव। जातकेयत्रोक्तमस्मिन्ग्रहेबलवतीदंफलंस्यात्तत्रसंपूर्णबलेषड्रूपाधिकेसंपूर्णंफलंमध्य
बलेषड्रूपाल्पेमध्यंहीनबलेत्रिरूपाल्पेहीनंफलंयुद्धवशात्शून्यबलेचात्फलाभावइतिसंपूर्णबलमध्याद्यन्यत

ग्रै॰भ॰ मेनशुभाशुभंफलंसमंनिर्णीयपश्चादिष्टेयावदाधिक्यंशुभंफलंतावदधिकंकष्टेयावदाधिक्यंतावदशुभफलमधि
५१ कंसाम्येसमम्।एवंगणितागतदृष्ट्यासंपूर्णपादषष्ट्यंशादिनाशुभाशुभंसमंनिर्णीयपश्चादमुकग्रहदृष्टेयंग्रहएत
त्फलदइतिदृश्यस्यैवफलदातृत्वाद्दृश्यस्येष्टेयावदाधिक्यंतावच्छुभफलमधिकमित्यादीष्टकष्टान्तरतुल्यंतार
तम्यमितिबलेनदशाचेष्टकष्टस्यसमुच्चयोनतुबाध्यबाधकभावइत्यप्याहुः॥ अथसप्तवर्गशुभाशुभनिश्चयायसप्त
प्तवर्गेष्टकष्टसाधनंवृत्तद्वयेनाह॥ ॥ स्वोच्चेरूपंत्रिकोणेचरणविरहितंस्वर्क्षगेर्द्धंत्र्यंशोंशाशाधीहृत्से
द्दृष्टसृद्भुजिचचरणःस्यात्समर्क्षेष्टमांशः॥ भूपांशोवैरिगेहेध्यरिभयुजिरदांशश्चनीचेखमीशादिष्टंगे
हेतदूनैकमस्तदथदलंषट्सुकार्यंतदैक्यं॥१४॥ पङ्क्त्योःसप्तसुकोष्ठयोःप्रथमयोरिष्टस्यदैक्यंकृता
प्तेस्याप्येभदलादिषट्सुचतद्द्वैवर्गपानांपृथक्॥ कृत्वोक्त्यासदसद्युतीनिजनिजेतन्निघ्नदृष्टाशुभे
वर्गेट्टतत्स्वखगोजसोःसदसतोर्योगात्पदघ्नेस्फुटे॥१५॥ प्रथमपद्यंव्याख्यातचरमेवतथापिकिंचिद्व्या
ख्यायते।स्वोच्चमूलत्रिकोणादिवर्तिनिग्रहेरूपचरणोनरूपप्रभृतिगेहेग्रहस्थानेईशाद्गृहाधीशवशादिष्टंस्यात्।अथ राम:
मभिसंधिःग्रहोयस्मिन्गृहेस्तितद्गृहस्वामीयदिस्वयमेवतदारूपार्द्धबलंयदपिमित्रंतदात्र्यंशोंशादिति।अत्रेशप ५१

द्रस्यस्वाधिमित्राद्यावन्वयोनतुस्वोच्चत्रिकोणनीचराशिषु।अत्रगृहेशेस्वोच्चादिगामिनिरूपप्रभृतिकंशुभंफलमिति
केषांचिद्व्याख्यानंप्रागवत्रत्याख्येयम्।तस्यायुक्तत्वंदर्शितंदर्शयिष्येच।तेनेष्टेनर्ऊनमेकमसत्कष्टंगेहेस्यात्।अथा
नंतरंषट्सुहोरादिवर्गेषुदलंस्थाप्यंतत्रगृहवदागतशुभाशुभयोर्दलमितिकेशवसांवत्सराणांव्याख्यानम्।अत्रोदा
हरणम्।कश्चनग्रहोमित्रहोरायामास्तेतेनगृहवत्प्राप्तंशुभंचरणप्रमितम् १५ एतदूनंरूपंजातंगृहवदशुभंच·
४५ अनयोरर्द्धेजातेहोरास्थानस्यक्रमेणशुभाशुभे ७।३०॥ २२।३० मिश्रास्तुयथाभदलादिकेषुवर्गेषुतस्यार्द्धम
तोनिधेयमित्यत्राश्रयगुणाकरिष्टभङ्ग·दशाबलविषयेचगृहस्यस्यैवार्द्धंहोरादौसमंस्थाप्यतेतद्वदत्रापिगृ
हएवस्थापितस्यशुभस्याशुभस्यचार्द्धंहोरादौसममेवस्थाप्यमित्यूचिरे।तत्रकेशवदैवज्ञानामयमाशयः।
अस्मिन्स्थलेसर्वैरपिशुभपापफलार्द्धमितिसामान्येनोक्तत्वाद्गृहवदागतशुभाशुभयोरेवदलंस्थाप्यम्।भद 51
लादिकेषुवर्गेष्वित्यादौरिष्टभङ्ग·बलादौचतच्छब्दस्यपठितत्वात्तेनचपूर्वपरामर्शाद्गृहेस्थापितस्यैवार्द्धंस्थाप्य
म्।तथाचरिष्टभङ्गे·श्रीपतिपद्धतौ।तद्दलंभवतिशेषवर्गजमिति।आश्रयगुणकेचहोरादिवर्गगुणकस्तुभवेत्त
दर्द्धमिति।दशाशुभाशुभयोरेवहोरादौदलमिति॥ ॥अहंतुब्रवीमि॥स्वोच्चेमूलत्रिकोणेचस्वर्क्षेधिसुहृद्दिक्ष

प्रौ. म. मात्। मित्रर्क्षे च समर्क्षे च पान्तु भे वाधिपान्तुभे॥१॥ नीचे च षाष्टैरिपुक्षिः स्वामिः करकरास्तिथिः॥ नागो वेदाः कुरौ शून्यं
५२ शुभमेतत्फलं विदुः॥२॥ षष्टिभ्यो वर्जिताश्चैते शिष्टं स्यादशुभं फलम्॥ तदर्द्धं तु फलं प्रोक्तमन्यवर्गे शुभाशुभम्॥
॥३॥ इति पद्यत्रयेण तच्छब्दस्य प्रयोगाद्युक्तिसूक्तत्वाच्च गृहफलस्यैवार्द्धं समं स्थाप्यम्॥ ॥ कार्यं वदैक्यमिति॥ सप्तस्था
नस्थफलानां शुभानामैक्यमशुभानां चैक्यं कार्यमित्यर्थः॥ पङ्क्त्योरिति। सप्तसु कोष्ठेषु पङ्क्त्योः कृतयोर्द्वयोः सदै
क्ये स्थाप्ये इति योजना। सप्त शोभनाः कोष्ठा ययोस्ते तथा पङ्क्त्योः शुभाशुभपङ्क्त्योः। सप्तमीद्विवचनमेतत्। इष्टं
च अस्तं च इष्टास्ते तयोरैक्ययोगौ। इष्टैक्यं प्रागानीतं चतुर्भक्तं शुभपङ्क्तौ स्थाप्यं कष्टैक्यमशुभपङ्क्तौ चतुर्भक्तं
स्थाप्यमित्यर्थः। ननु सप्तकोष्ठानां सत्वाद्विनिगमकाभावेन कस्मिन्स्थाप्यमित्याशङ्क्याह। प्रथमयोरिति। प्रथमयो
रर्थात्कोष्ठयोः। गृहकोष्ठकयोरिति यावत्। इदमपि सप्तमीद्विवचनम्। होरादिवर्गेषु तु गृहे स्थापितफलस्यैवार्द्धं
समं स्थाप्यम्। वर्गपानामिति। गृहादिसप्तवर्गस्वामिनां पृथक् प्रत्येकं निजनिजे स्वीये स्वीये सदसद्युती शुभैक्या
शुभैक्ये उक्त्या पूर्वोक्तप्रकारेण कृत्वानन्तरं ताभ्यां नियुक्ते इष्टाशुभे ये पङ्क्त्योः सप्तसु कोष्ठयोरित्यादिना स्थापि राम
ते ते कार्ये उक्तेत्यनेन स्वोच्चे रूपमित्यादिना स्थापितयोरेव शुभाशुभयोरैक्यकार्यं न त्वनन्तरं स्थापितयोरिति ध्व ५२

नितम्। अत्रे दूदे हि वचनं [illegible] गृह्यमिति प्रगृह्यत्वात्प्लुत प्रगृह्या अचि नित्यमित्यनेन प्रकृतिभावस्तस्मात्तन्निघ्ने इष्टाशु
भे इति पाठेन भाव्यम्। एवं न छन्दोभङ्गो दुर्वारः अतस्तत्त्वं गुणेष्टाशुभे इति कृतसमासः पाठो रमणीयः॥ ननु कार्यं तदे
क्ये इत्यनेन प्राग्योगमभि[illegible]य पुनर्यदाचार्येण योगः कार्य इत्युक्तं तदयुक्तमिव प्रतिभाति पुनरुक्तिदोषादिति चे
त्। सत्यम्। यदि प्राक्साधित एव योगो ऽनष्टः स्यात्तदा पुनर्योगसाधनं व्यर्थमेव। तथापि यदि प्राक्साधितयोग
स्य चतुर्भागं गृहीत्वा नाशः क्रियते तदा पुनर्योगकरणं सार्थकमेवेत्यनुशयेनाचार्यैरुक्तमिति न कोपि दोषः। यद्वा। ग्र
न्थे इति कर्तव्यतायां च लाघवं प्रतिपादयताचार्येण यत्पुनर्योगसाधनमभिहितं तत्रेदमाकूतम्। प्राग्योगसाधनं व्य
र्थमेव। किंतु स्वोच्चे रूपमित्यादिना गृहस्यापि तस्यैव शुभाशुभस्य चतुर्थांशः स्यादिति। यद्येवमभिमतं तर्हि योग च 52
तुर्भागः स्यादिति किमर्थमुक्तमिति नाशङ्कनीयम्। दामोदरादिग्रन्थाभ्यासवशादुक्तमिति वक्तुं शक्यत्वात्। अत्र
श्रीपतिभिरपि। ये खेटभोच्चादिफलेशुभाशुभे सरूपवर्गार्द्धविभाजिते इति गृहशुभाशुभस्यैव चतुर्थांशः स्थापितो
न तु योगस्य। यद्यत्र योगोभिमतः स्यात्तदा तदीयमुत्स्ये स्यग्रिमग्रन्थवदुक्तः स्यात्। अतः पङ्क्त्योः सप्तसु कोष्ठयोः प्र
शस्तयोरिष्टास तीते कृता प्रस्यादिति पाठः पाठ्यः। यद्वा। शब्दक्रमादर्थक्रमो बलीयानिति न्यायात् वर्गणानाष्टयस्तु

प्रै॰नं॰ त्वयापूर्वप्रकारेणयेनिजनिजेसदसद्युतीतन्निघ्नेदृष्टाशुभेकृत्वानन्तरंवक्ष्यमाणंकर्मकार्यमितिव्याख्येयम्।कलित
५३ केशवमतैरेतदेवाभ्युपेयम्।अमुनाप्रकारेणसाधितेयेदृष्टाशुभेतेवर्गेट्तत्स्यस्ववर्गौजसोःसदसतोर्घातात्पदघ्नेस
तौस्फुटेभवतः।वर्गेट्वर्गस्वामी।तत्स्थःस्ववर्गोवर्गस्थग्रहः।ओजसोःबलयोः सदसतोरिष्टगुणितयोः।शेषंस्पष्टम्।अत्रे
ष्टकष्टबलयोर्घातःश्रीपतिसुन्दरादिविरुद्धः।किंतुकेवलयोरेवबलयोर्घातःकार्यः।अतोत्रैवंपठितव्यम्।वर्गेट्त
त्स्यस्ववर्गौजसोःसदसतोर्घातात्पदघ्नेस्फुटेइति॥अथोपपत्तिः सारावल्याम्।राशिपतौबलयुक्तेराशौचबलान्वितेत
थाचन्द्रे॥राशिफलंवत्सकलंनीचोच्चादिविधिनाचसंचिन्त्यम्।अत्रराशिबलस्वामिबलयोगेनराशौबलवतीदंव्यर्थ
मितिप्रागुक्त्याराशिपतौबलयुक्तेतथाचन्द्रेबलयुक्तेतद्राशिफलंसकलंसंपूर्णंसंचिन्त्यं नीचोच्चादिविधिनाचसंचि
न्त्यं।नीचोच्चादिविधौचकारेणराशिपतिचन्द्रयोःसमुच्चयः।तथासतिचन्द्रस्यनीचोच्चत्रिकोणस्वगृहादिस्थानवशेन
चन्द्राधिष्ठितराशेःस्वामिनश्चनीचोच्चत्रिकोणस्वगृहादिस्थानवशेनचन्द्रस्यराशिफलंचिन्त्यम्।अर्थादेवंहोरादिफ
लेपि।होरादिपतौबलयुक्तेतथाचन्द्रेबलयुक्तेचन्द्रस्यतदधिष्ठितहोरादिपतेश्चनीचोच्चत्रिकोणस्वगृहादिस्थानवशे राम:
नचन्द्रस्यहोरादिफलंचिन्त्यम्।पश्चादस्यवाक्यस्यस्वोच्चस्थितःशुभफलमित्यादिवाक्यद्वयेनसहैकवाक्यतयास्व ५३

च्चत्रिकोणस्वगृहादिस्थानजशुभाशुभफलस्यसंकोचेनसप्तवर्गफलेविषम्येसिद्धेचन्द्रःस्वोच्चस्थःस्वसप्तवर्गफलंशुभंसं
पूर्णमशुभंशून्यंकरोतिमूलत्रिकोणस्थःशुभंपादत्रयमशुभंपादंकरोतीत्यादिनाचन्द्रस्यस्वोच्चत्रिकोणस्वगेहादिस्थानजशु
भाशुभफलंसप्तवर्गेपिसमानंसिद्धम्।गृहहोरादिपतेभ्यनीचोच्चादिविधौतारतम्येनशुभाशुभफलस्याकाङ्क्षायामविशे
षात्स्वोच्चेस्थितःशुभफलमित्यादिसिद्धंतारतम्यमेवलभ्यम्।एवंसतिचन्द्राधिष्ठितराशिहोरादिस्वामीस्वोच्चस्थश्चन्द्रस्यराशि
होरादिफलंशुभंसंपूर्णमशुभंशून्यंकरोतीत्यादिनातत्तद्वर्गेतत्तद्वर्गेशस्यस्वोच्चादिस्थानजशुभाशुभफलमन्यदपिसिद्धम्। त
थाचायंनिष्कृष्टोर्थः।चन्द्रस्यस्वोच्चत्रिकोणादिस्थानजशुभाशुभफलेनचन्द्राधिष्ठितराशिहोरादिपतेश्चस्वोच्चत्रिकोणादिस्थान
जशुभाशुभफलेनसमुच्चयेनचन्द्रस्य राशिराशित्र्यंशादिफलनिर्णयः।एवंचन्द्रपदस्थानेभौमादिपदक्षेपेकृतेभौमादिसप्तवर्गे 53
प्यर्थसिद्धिः।कार्याशयितक्तोन्येपक्षेपरिचिन्त्यादृतिवराहेण।अथवर्गस्यवर्गेशयोःस्वोच्चादिस्थानजशुभफलंतदूनंरूप
मशुभफलमितिसिद्धेवर्गस्यस्वोच्चाद्यन्यतमस्थानजशुभाशुभफलयोःसप्तवर्गेपिसमयोस्तत्तद्वर्गेशस्यस्वोच्चाद्यन्यतम
स्थानजशुभाशुभफलयोस्तत्तद्वर्गेविलक्षणयोश्चसमुच्चयेनवर्गस्यस्वराशिहोरादिसप्तवर्गफलस्यनिर्णयेप्राप्तेसंपूर्ण
तायारूपमितायान्यासम्भवेप्राग्वदुपपत्तिरनुपातद्वयात्मकपञ्चराशिकेन।यदिरूपोन्मितेसंपूर्णेवर्गस्थलेसंपूर्णे

श्री-म वर्गेशफलेसंपूर्णरूपंफलंतदास्मिन्वर्गस्यफलेस्मिन्वर्गेशफलेकिमितिपूर्ववद्वर्गस्यवर्गेशयोः शुभफलघातद्दृष्टम
५४ शुभफलघातःकष्टंजातम्।किंच।वर्गस्यवर्गेशयोरूपद्वयमितेनपरमफलयोगेनसंपूर्णरूपंयदिफलंतदानेनवर्ग
स्यवर्गेशफलयोगेनकिमितित्रैराशिकेनवर्गस्यवर्गेशयोः शुभफलयोगाद्वृद्धमिष्टमशुभफलयो
गाद्वृद्धकष्टंसिद्धम्।प्रमाणसिद्धयोरनयोरैक्यंपुराप्रदर्शितमेव।अतःसम्यगुक्तंसकलजातकशास्त्रतत्त्ववेदिभिःश्रीम
त्सुन्दरमिश्रैः।वर्गस्यभप्राप्तशुभाशुभेयेवर्गेशगेहोक्तशुभाशुभाभ्याम्।युतेर्द्धितेसंगुणितेथवातेराश्यादिवर्गस्यशुभा
शुभानीति।अथप्रकृतेस्वोच्चेरूपमित्यादितदूनैकमसदित्यन्तंसर्वंप्रतिपादितवासनमेव।प्रधानताराशिफलस्यनूनं
होरादिवर्गाद्द्विगुणंगृहंयदितियवनवाक्येनहोराद्यपेक्षयाराशेर्द्विगुणयलाभेनराशेयत्स्यापितंतस्याद्धहोरादिषुस
मस्याप्यमतउपपन्नंदलंषट्स्विति।अग्रेवर्गेशस्यशुभयोगेनाशुभयोगेनचगुणनीयमस्त्यतःकार्यैतदैक्यद्वितिसर्वं
साधु॥अथवर्गस्यस्वशुभाशुभफलंवर्गेशशुभाशुभफलेनगुणनीयं तत्रकेवलयोर्गुण्यगुणकयोर्घातेयावत्फलेता
वदेवगुण्यगुणकयोरेकस्मिन्समेनकेनचिद्भक्तेनगुणितेपरस्मिन्भक्तेपश्चात्तयोर्घातेकृतेसतिस्यादितिप्रसिद्धम्।य राम:
थागुण्यः४गुणकः१० अनयोर्घातेजातंगुणनेफलम् ४० अथवागुण्योद्विभक्तः२गुणकोद्विगुणितः२० अनयोरपि ५४

घातेजातंतदेव ४०। द्विभक्तगुणकेन ५। द्विगुणितगुण्ये ८०ं हृतेवातदेवजातम्। ४०। एवमत्राचार्येणवर्गस्यशुभाशुभफ
लंगुण्यंचतुर्भिर्भक्तंकृतमतः पङ्क्त्योः सप्तकोष्ठयोः प्रथमयोरिष्टासतीतेकृताशेस्याप्येइतिसुष्टूक्तम्। एकेइतिसं
पातायातम्। अत्रापिहोराद्यपेक्षयाराशेर्द्वैगुण्येनराशिफलस्यैवार्द्धहोरादौसमंस्थाप्यमतोभद्रलादिषट्सुचतदर्द्ध
इतिशोभनमभिहितम्। एवंवर्गेशस्यग्रहोक्तशुभाशुभफलरूपोगुणकश्चतुर्गुणितोजातंवर्गेशस्यसप्तवर्गजशु
भैक्याशुभैक्यतुल्यम्। यतोग्रहफलस्यार्द्धहोरादौस्थापितमस्तिवर्गयोगेग्रहफलंत्रिगुणंभवतितत्रग्रहफले
योजितेचतुर्गुणंग्रहफलमेवभवतीतिग्रहफलेचतुर्गुणेसतिसप्तवर्गजफलयोगएवभवतीतिपर्यवसित
म्। असावेवगुणकः। अनेनगुणकेनचतुर्भक्तवर्गस्थग्रहफलरूपोगुण्योगुण्योतोवर्गपानांएष्यकृतलो
त्यास्तदसत्तुतानिजनिजेतदंशगुणेशाशुभेइतिसर्वमवदातम्। अन्येतुग्रहस्वामिनिस्वोच्चमूलत्रिकोणादि ५४
स्थेरूपपादोनरूपप्रभृतिकंशुभंफलंतदूनरूपतुल्यमशुभंचफलंस्थाप्यंहोरादौतुग्रहवद्रागतशुभयोर्दलंस्था
प्यंनग्रहस्थितफलस्यतथासप्तवर्गजशुभयोगाशुभयोगयोःचतुर्थांशः पङ्क्त्योःस्थाप्यो। नकेवलंग्रहस्यशुभा
शुभफलयोरित्याहुः। तत्रग्रहस्वामिनिस्वोच्चत्रिकोणादिस्थेरूपचरणोनरूपादिशुभंतदूनेकमशुभंफलमिति

श्री.म. वावदप्युक्तम्। यतस्तथा सति वर्गस्य स्ववर्गेश   स्य च स्वोच्चाद्यन्यतरस्थानजशुभाशुभफलाभ्यां समुच्चयेन वर्ग
५५ स्यस्य शुभाशुभफलनिश्चयं द्वयोः र्यैः पर्यवस्यति। वराहकल्याणवर्मादिग्रन्थावलोकनेन तु वर्गस्य वर्गेश्वर
योः स्वोच्चादिस्थानवशेन वर्गस्य शुभाशुभनिर्णयो यमर्थः प्रतीयते। अतस्तदसदित्यवधेयम्। होरादौ गृहवद्
गतयोः शुभाशुभयोर्दलं स्यात्। तथा सप्तवर्गजशुभाशुभैक्ये चतुर्भक्ते षड्‌क्तयोः स्यादित्यपि वासनाभून्नतया
नितरामयुक्तमिति बोद्धव्यम्। अन्यथा त्रैरूपाधिकस्यापीष्टकष्टस्य संभवात्सर्वत्र संपूर्णतारूपात्मिकेति पद
तिक्तं गर्गपराशरादीनां सिद्धान्तो व्याकुप्येत। भावदृग्बलादौ सर्वत्र परमतात्परूपमितायाः कल्पितत्वाद
त्रैकस्मिन्नेव रूपाधिकपरमतास्वीकारे नन्वगमोपि तद्दूषणम्। एतदनुगममभिप्रेत्यैव प्रागिष्टकष्टैस्त्रैराशिक द
यात्मकपञ्चराशिकेनोपपत्तिमुपकल्प्य चेष्टोच्चशुभफलघातः कष्टमित्युक्तं सर्वाचार्यैः। तस्मादिष्टकष्टविषयेऽसु
न्दरोक्तिरेव सुन्दरेति दिक्। अथ वर्गेऽतत्स्वस्ववर्गोजसौरित्यत्र युक्तिः। राशिपतौ बलयुक्ते इति पूर्वं प्रदर्शिते सा रा
वलौ वाक्ये वर्गेशे बलयुक्ते वर्गस्थे च बलोपेते तत्फलं सकलमित्युक्तम्। तथा वर्गेशयोः स्वोच्चादिस्थानवशेन रामः
फलनिर्णय इति चोक्तम्। एवं सति संपूर्णतायारूपमिताया एवन्याय्यत्वेन सर्वेषां समुच्चयेन फलनिर्णये प्राप्ते ५५

उपपत्तिस्त्रैराशिकत्रयात्मकेनसप्तत्रैराशिकेनयदिसंपूर्णवर्गस्यबलेसंपूर्णेवर्गे१ बलेसंपूर्णवर्गस्यवर्गे१शुभ
शुभफलघातरूपेकल्पितेष्टकष्टेच संपूर्णरूपंफलंतदास्मिन्वर्गस्यबलेस्मिन्वर्गे१बलेस्मिन्वर्गे१वर्गस्यफल
घातरूपेकल्पितेष्टकष्टेचकिमिति। पञ्चसप्तनवराशिकादिकमित्यनेनवर्गस्यवर्गे१बलकल्पितेष्टकष्टघातोरूपे
णभाज्यइतिनिष्पद्यते। तत्राचार्येणबलघातएवपूर्वंकृतः पश्चात्तेनप्रोक्तेष्टकष्टंगुणनीयमित्युक्तम्। बलघात
स्यमूलंतुप्रागिष्टकष्टेचेष्टोत्थफलघातस्यैवसत्त्वभावादूहीतमपूर्वंयथाचेष्टोत्थफलयोःसमुच्चयेघातमूलमुक्तं य
थाचवर्गस्यवर्गे१फलयोःसमुच्चयेघातउक्तस्तथात्रापिघातमूलंघातश्चकिमितिनोक्तइत्येतद्ग्रन्थपरिशीलनव
तांशङ्कास्यात्तस्यानिवारणार्थंसत्त्वभावाच्चवर्गस्यवर्गे१बलयोःसमुच्चयेघातमूलमुक्तंतेनचेष्टकष्टसमुच्चयेगुण
नमुक्तमितिमिश्राःप्रयोजनमाहुः। वस्तुतस्तुदृष्टेचेत्सामान्यतआधिक्यंवर्गस्यवर्गे१बलघातमूलेनगुणनेपित 55
स्मिन्नेवाधिक्यंकष्टेचेदाधिक्यंतदातस्मिन्नेव। यावदाधिक्यपक्षेपीष्टकष्टयोःसंपूर्णरूपान्तरस्थलेवर्गस्यवर्गे
१बलघातमूलस्यतुल्यमन्तरंभवति। ततोघातमूलेनसंपूर्णपादषष्ठ्यंशकल्पनायांपूर्ववदेतयोर्नकोपिविशेष
तोबलघातमूलेनगुणनान्यथा॥ एवंसत्यपियेचेष्टकष्टगुणितबलघातमूलेनगुणनमाहुस्तदेतीवव्यर्थम्॥ १

प्रौ·म· वमेस्य गुणनस्यासमर्थत्वेपि प्राग्वत्प्रयोजनमूह्यः। यत्तु प्रागुक्तमिष्टकष्टान्तरतुल्यं शुभाशुभफलान्तरमिति तदुदाह
५६ रणं प्रदर्श्यते। बृहज्जातके शनिक्षेत्रस्य शुक्रफलम्। रविजर्क्षगते ऽमरारिपूज्ये सुभगः स्त्रीविजितो रतः कुनार्यामि
ति। वर्गेस्य शुक्रोवर्गोत्तमः शनिश्चाथ षड्रूपाधिकवीर्यस्ते नेदं शुभमशुभं च फलं संपूर्णं पश्चात्संपूर्णतायामेव सुभग
इति शुभफलात् स्त्रीविजितः कुनार्यां रत इत्यशुभफलमेतावदधिकम्। ५/४६ इष्टकष्टान्तरे कृते कष्टस्यैतत्तुल्यस्यैवाव
सीयमानत्वात्। एवं च बुधस्य तत्रैव स्वत्रिंशांशफलम्॥ मेधाकलाकपटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताः श
शिजेति मान्याः॥ बुधस्य त्रिंशांशको ऽष्टके इष्टं १/४ कष्टम् १/२ एतदन्तरम्। १/२ अत्र वर्गस्यो वर्गेश्वरश्च बुध एव स च मध्यब
लस्तदिदं शुभमपि मध्यम। पश्चात्तत्रैव कपटयुतात्मकादशुभफलाच्छुभफलं मेधाकलाकाव्यविवादशिल्पशास्त्रार्थ
साहसयुतादिकमेतावदधिकम्। १/२ एवं सर्वत्र फलानां विचारो विधेय इत्यलमति चापल्येन। सवासनायां समकारि
रुचिर्दिवाकरेण मत्तकेशवोक्तेः॥ तत्रेष्टकष्टानयनाधिकारः समग्रस्सारः समगात्समाप्तिम्॥१॥ इति श्रीकेशवसांवत्स
रिकजातककर्मपद्धतेष्टीकायां दिवाकरविरचितायां प्रौढमनोरमाभिधायां सवासनायामिष्टकष्टाध्यायश्चतुर्थः॥ अ रामः
थभावस्थानालोकयोगो द्रष्टव्यः तत्र सर्वतस्य योज्यं दशायामिति बृहज्जातकोक्तेः सर्वेणापि फलेन दशास्वेव भवितव्यम्। ५६

दशान्तानंत्वायुर्दायाधीनमेवंक्रमेणंयदायुर्ज्ञानंजातकफलेप्रयोजकमतआयुर्दायाध्यायआरभ्यते॥तत्रायुर्द्विविधं,यो
गजंगणितागतंच।योगजमपिचतुर्द्धा।रिष्टजंपरमंनियतममितंच।तत्ररिष्टजस्योदाहरणम्।सिंहालिकुम्भस्थितसैं
हिकेयोविलोकितःक्रूरखगैर्यदिस्यात्॥वर्षाणिसप्तैवतदीयमायुःप्रकीर्तितंजातकशास्त्रविद्भिः॥परमायुषश्च,अनि
मिषपरमांशकेविलग्नेशशितनयेगविपञ्चवर्गलिप्ते।भवतिहिपरमायुषःप्रमाणंयदिसहिताःसकलाःस्वतुङ्गभेषु॥
नियतस्य। लग्नाष्टमारीन्दुयुतानचेत्स्युःक्रूराःस्वभस्थायदिखेचरौद्वौ॥बलान्वितावम्बरगौभवेतांजातःशतायुःकथि
तोमुनीन्द्रैः॥अमितस्यापि।गुरुशशिसहितेकुलीरलग्नेशशितनयेभृगुजेचकेन्द्रयाते॥भवरिपुसहजोपगैश्चशेषै
रमितमिहायुरनुक्रमाद्विनास्यादिति॥गणितागतमपिपञ्चविधम्।अंशजंपिण्डजंनैसर्गिकंजीवशर्मोदितंमिश्रंच
एतन्मिश्रमपिचतुर्द्धा॥एवंद्वादशप्रकारमायुरितिप्रवर्णयन्त्याचार्याः।तथाचहोरामकरन्दे॥आयुर्मुनीन्द्रैर्द्विविधंप्र 56
दिष्टंयोगोद्भवंचानियतास्यमेव॥आद्यंचतुर्भेदविभिन्नमाहुरन्यत्तथापञ्चभिरत्रभेदैः॥१॥रिष्टंपरंनियतमत्रत
थामितंचभेदाश्चतुरितियोगसमुद्भवस्य॥पैण्डंतथांशजनितंचनिसर्गमन्यत्सार्धांशमिश्रमितिचानियतस्यभेदाः॥
२॥चन्द्रार्कयोश्चन्द्रविलग्नयोश्चलग्नेनयोःसूर्यविधूदयानाम्॥साम्येबलानामितिमिश्रभेदाश्चतुर्भवेद्वादशधै

श्री.म. वमस्येति॥ २॥ तत्र योगजायुर्दायभेदस्यामितायुर्दायस्योदाहरणं तावद्वृत्तार्द्धेनाह॥ ॥ कर्कीन्दुजीव्ययुतोदये बु
५७ धसितौ केन्द्रेष्वरीशेतरैरायुर्विद्ध्यमितं हि योगजमिदं ह्यन्यत्रोच्यते योन्मितम्॥ ॥ कर्की कर्कराशिः इ
न्दुश्चन्द्रः। इज्यो बृहस्पतिः। एभिर्युतस्तस्मासावुदयश्च सतस्य। तस्मिन्कर्कीन्दुजीव्ययुतोदये। कर्कलग्ने चन्द्रगुरुसहित
इत्यर्थः। केन्द्रे लग्नचतुर्थसप्तमदशमस्थानरूपे यदि बुधसितौ मिलितौ पृथग्वा भवतः। त्र्यश्च अरयश्च ईशा
श्च त्र्यरीशाः त्र्यस्तृतीयस्थानम्। अरयः षष्ठम्। ईशा एकादशम्। एषु स्थानेषु इतरैः सूर्यभौममन्दैः इहास्मिन्यो
गे अमितमायुर्विद्धि। जानीहीत्यन्वयः। क्रियाबलादृणकेत्यध्याहारः। अन्यत्र ग्रन्थान्तरे योगजमायुर्विद्धि। अत्र
तु ग्रन्थे उन्मितं गणितागतमायुरुच्यते। मयेति शेषः। योगजमित्यत्र सामान्यशब्दो विशेषपर इत्यमितायुर्दाया
तिरिक्तं योगजमिति व्याख्येयम्। एतदर्थोपलम्भायैव हि शब्दो दत्त इति बोध्यम्। अन्यथा मितायुर्दायस्य योगजा
युर्दायाद्बहिर्भूतत्वमापद्येत। तथा सति योगजमायुश्चतुर्द्धा। रिष्टपरनियतामितभेदादिति हीरिकोक्तं दत्तजला
ञ्जलि स्यात्। योगजमिवान्यत्रोच्यते इति पाठे अस्मिन्योगे अमितमायुर्विद्धि। किमिव अन्यत्र ग्रन्थान्तरे योगजमिव। रामः
योगजमित्यत्र प्राग्वद्विशेषपरता। तथा च ग्रन्थान्तरादमितायुर्दायव्यतिरिक्तं योगजमायुर्जानीहि। तद्वदेवात्र यो ५७

गेमितमायुर्जीनीहीतिभावः।अत्रामितायुर्दायस्ययोगजायुर्दायोपसंज्ञानोक्तैव.यद्वात्रयोगेमितमायुरिवग्रन्था
न्तरेयोगजमायुर्विद्धीतिद्वशब्दस्यभिन्नक्रमयोजनार्थःसाधीयान्।अथगणितागतायुरानयनंविवक्षुस्तावत्तदृद्
स्यांशायुर्दायस्योपयोगिभूतान्चेष्टागुणोच्चगुणस्पष्टगुणान्वृत्तोत्तरार्द्धेनाह॥ ॥ अल्पाश्चेत्किरणाःसरूप
किरणाङ्घ्रिश्चेत्त्र्यंशोर्ध्वाविभूगोर्द्धैचैष्टिकतुङ्गसंभवगुणौतद्घातमूलंस्फुटः॥१६॥ स्पष्टोऽर्थः॥घातमू
लप्रक्रियापूर्वाधिकारोक्ताबोध्या॥अत्रोपपत्तिः॥लघुजातके। शत्रुक्षेत्रे त्र्यंश नीचेर्द्धंसूर्येलुप्तकिरणाश्च॥
सप्तपन्तिस्वाद्धायान्नास्तंयातौरविजशुक्रौ॥त्र्यंशायुषिपरमोच्चेत्रितयगुणःपरमनीचेर्द्धहानिः।दर्शितरीत्याचेष्टापर
योर्वक्रास्तपदयोर्द्धयोरपिसत्वादत्रपरमचेष्टाह्रासेशून्येचेष्टाकेन्द्रेऽर्द्धहानिः।षड्भमितेत्रयंगुणः।ततोर्द्धहानिमार
भ्यहान्यभावपर्यन्तमेकंत्रैराशिकंततोगुणोपचयेनत्रिमितगुणपर्यन्तंद्वितीयम्।अत्रैकेनगुणनेहान्यभावेचतदे 57
वायुस्तिष्ठतीत्येकगुणस्थानंहान्यभावस्थानेचैकमेव।तत्रशून्यचेष्टाकेन्द्रान्नीचोच्चषड्भान्तरेत्रिमितगुणस्थानमतः
कारणादर्धादेकगुणस्थानंराशिद्वयान्तरे॥हानिरपिपरिणामेगुणात्मिकैवेतिशून्यचेष्टाकेन्द्रेनीचेचार्द्धगुणाः।अ
त्रशून्यचेष्टाकेन्द्रेनीचेचैकोरश्मिस्ततोऽग्रतोरश्मिद्वयोपचयेनार्द्धगुणोपचयस्तत्रोऽनुपातः।यदिरश्मिद्वयेनरूपा

प्रेम० ङ्गुणस्तदाविरूपकिरणतुल्यैः शून्यवेष्टाकेन्दुनीचाग्निमरश्मिभिः किमितिविरूपकिरणाङ्घ्रिगुणइतिजातस्व
५८ रू १/४ र १। अयंरूपार्द्धमितगुणेसमच्छेदविधिनायोज्यस्तत्रसमच्छेदौ। रू १/४ र १। रू ३/४। अत्ररश्मिपदद्वयंयोज्यम्। ए
कःशोध्यो ऽतःसरूपकिरणाङ्घ्रिगुणइत्युपपन्नम्। इदंसाधनंरूपत्रयाल्पराशिषुज्ञेयम्। अथान्योऽनुपातः। यदिरश्मि
त्रयाधिकरश्मिभिस्तुर्मितेद्विमितोगुणस्तदेष्टैरूपत्रयोनरश्मिभिः किमिति। अत्रगुणहरौद्वाभ्यामपवर्त्यजातम्।
रू ३/२ रू १ अत्रैकगुणःसमच्छेदविधानेनयोज्यस्तत्रसमच्छेदौ रू ३/२ रू १। रू २। अथरश्मिपदद्वयंयोज्यंत्रयंहेयम्।
तत्रानयोरन्तरेरूपमेवर्णमवशिष्टमतोविरूपकिरणार्द्धगुणइत्यपियुक्तम्। अथस्फुटगुणोपपत्तिः॥ गर्गः॥ ध्रुवा
ग्रहानिः कर्तव्याततोन्यासुबहुष्वपि॥ प्राप्तास्वेकैवकर्तव्या यास्यात्तासुमहत्तरा॥१॥ ततोपिगुणनाकार्याप्येकैवमह
तीसकृत्॥ द्वाभ्यांवर्गोत्तमेस्वांशेस्वद्रेष्काणेस्वकेगृहे॥२॥ त्रिभिर्वक्रगतस्याथस्वोच्चराशिगतस्यच॥ समगुणस्यत्वेए
कान्यतरैवगुणनाकार्या। विषमगुणस्यलेमहतीसकृद्गुणनाकार्येतदेतदर्थलाभायैवसकृत्पदंपुनरुपात्तम्। अत्र
त्रिगुणाएवमहद्गुणस्तत्रिगुणमितिविहायमहत्पदोपादानस्यनिर्बन्धेनाचार्यकत्वंतुबहुघ्नतायामेकंतुयद्भूरितदे राम:
वकार्यमितिवराहवाक्येभूरिपदग्रहणस्यचेदंतात्पर्यम्। यत्त्रिगुणत्वेनोनाग्रहः किंतुयुक्तिसिद्धमेकंभूरिगुणनंका ५८

र्यम्। युक्तिसिद्धं तु मूलेन गुणनम्। विषमगुणस्थले च स्वल्पादन्यतरस्मान्मूलमपि भूरि भवत्येव। लघुजातके। वर्गोत्तम
स्वराशिद्रेष्काणनवांशके सकृद्द्विगुणम्। वक्रोच्चयोस्त्रिगुणितं द्वित्रिगुणत्वे सकृत्त्रिगुणम्॥ अस्यार्थो मिश्रोक्तः वर्गोत्तमादिवशाद्ब
हुवारं द्विगुणत्वप्राप्तौ सकृदेकवारं द्विगुणं कार्यम्। वक्रवशेनोच्चवशेन च त्रिगुणत्वे प्राप्ते सकृत्त्रिगुणितं कर्तव्यम्। अ
त्रान्यगुणप्राप्तावेतयोरेव प्राप्तावन्यतरगुणनियमनावश्यकत्वे सकृत्पदानुषङ्ग आवश्यकः। वर्गोत्तमेत्याद्युक्ते स
कृद्द्विगुणे व्यवहारार्थमाद्यगुणेति धृतसंज्ञे प्राप्ते वक्रोच्चयोरित्याद्युक्ते सकृत्त्रिगुणे स्फुटगुणकसंज्ञे च प्राप्ते सकृ
त्त्रिगुणे भूरिगुणं कर्तव्यमिति। अत्र वक्रोच्चगे सामान्यतस्त्रयाणां वर्गेण गुणने प्राप्तेऽन्यतरस्मिंस्त्रिमिते गुणके नियमि
तेषां मूलेन गुणनमुक्तं पदस्य वर्गस्य न्यायमूलम्। किंच। प्रकृते त्रयाणां वर्गेण सामान्येन गुणने प्रसक्तेऽन्यतरस्मिंस्त्रिमित 58
गुणनियमनलक्षणो विशेष उक्तः। विशेषे च सामान्यसंबन्धस्यावश्यमपेक्षेति विशेषलक्षणेऽन्यतरत्रिमितगुणे सा
मान्यवर्गस्य तन्मूलत्वमेव संबन्धः। तथा सति तन्मूलत्वपुरस्कारेणैव गुणने प्रसक्ते तन्मूलेनैव गुणनं तात्पर्यतः सिद्ध
म्। त्रिप्रमं ह्युपपादितेऽपि करणीरूपो वर्ग एव भवतीति द्वित्रिगुणत्वे स्फुटगुणाद्यगुणघातस्थलेऽपि मूलेनैव गुणनं प्राग
नम्। यत्तु बहुताडनसंप्राप्तौ याकरोत्येकवर्गणाम्। वराहमिहराचार्यस्तानदृष्टप्रसतैरिति सारावलीवाक्यस्वरसः

प्रेम- इत्येतन्मतं दूषयता केशवार्केण पृथगपि द्विगुणे त्रिगुणे सकृत्त्रिगुणमित्यबद्धोक्तिरियं यत इति विवाहवृन्दावने ऽसि
५९ धायि तद्दुर्गादिमुनिग्रन्थविरोधादसदेवेति बोध्यम्। अथाश्रयगुणकमाह ॥ ॥ यः स्वाधीशसुहृत्समार्यधिरिपो
र्वर्गे धृतिश्चेषिला विश्वाङ्कैः स्युगुणा गृहे द्विगुणिता योगाः क्रमात्तं हरेत्॥ तद्वेषड्वसुगोस्रुमद्धतिजिनैः
षड्घ्नैश्च वर्गोत्तमस्वांशके ऽंशागतेसदा रसगुणैः स्यादाश्रयाख्यो गुण इति॥ १७॥ यो ग्रहः स्वाधीश
सुहृत्समार्यधिरिपोर्वर्गे गृहादिसप्तवर्गे स्यात्तस्य धृतिरिषिलादित्यादयो ऽङ्काः क्रमात्स्थाप्याः। चकारेण वर्गे इत्यनु
षङ्गः स्वादीनां यस्मिन् गृहाद्येवर्गे ग्रहः स्यात्तत्रवर्गे धृत्याद्यो ऽङ्काः क्रमात्स्थाप्या इत्यर्थः। स्वश्च अधीशश्च सुहृच्च सम
श्च अरिश्च अधिरिपुश्च एषां द्वन्द्वैकत्वं क्लीबताच। उक्तपुंस्कत्वात्पुंवद्रूपम्। धृतिरष्टादश। इषिलाः पञ्चदश। इश
भूवा अस्तु रायस्तु स्यादिति शान्तेषु पाठादिफान्त एवेश शब्दो न तु लान्त इति कश्चित्। तन्मन्दम्। अस्ति बलान्तो ऽपीलाशब्दः
भूगोवाचस्त्विडा इला इति त्रिकाण्डीस्मरणात्। इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि चेति मेदिनीकोशाच्च। प्रहृष्ट
पुष्टाखिलगोकुलामिलामिति भास्करोक्तिरप्यनुकूला। विश्वे त्रयोदश। अङ्का नव। इषवः पञ्च। गुणास्त्रय इति। गृहे राम:
गृहवर्गे धृत्याद्यो द्विगुणिताः स्थाप्याः। यथा स्वगृहे षट्त्रिंशदधिमित्रगृहे त्रिंशदित्यादि तेषां सप्तसु वर्गेषु स्थापितानां ५९

मङ्कानां योगः कार्यः। तं योगं तद्धतेषां स्वाधीष्टादीनां भेरा शौ ग्रहे सति क्रमात्सद्भुस्त्वित्यादिभिरङ्कैः षड्घ्नैः षड्गुणितैः हरे
त्। भजेत्। गणक इति शेषः। षट् प्रसिद्धाः वसवोऽष्टौ गावो नव अंशुमन्तो द्वादश धृतयोऽष्टादश जिनाश्चतुर्विंशतिः ए
भिः षड्घ्नैरङ्कैस्तं योगं भजेदित्यर्थः। क्रमादिति काकाक्षिगोलकन्यायादुभयत्र संबध्यते। वर्गोत्तमस्वांशत्र्यंशगते ग्रहे
सदा रसगुणैः षट्त्रिंशता तं योगं हरेत्। अंशाश्च त्र्यंशाश्च अंशत्र्यंशाः। स्वस्य अंशत्र्यंशाः स्वांशत्र्यंशाः वर्गोत्तमाश्च स्वां
शत्र्यंशाश्च वर्गोत्तमस्वांशत्र्यंशाः। यत्र राशौ ग्रहस्तस्यैव राशेर्नवमांशे चेद्भवेत्तदा स नवमांशो वर्गोत्तमांशः। तदुक्तम्। रा
शिर्यः स्यात्सोऽपि नन्दांशकश्चेदुक्तस्तस्मिन्नेव वर्गोत्तमांश इति। स चकस्मिन् राशौ कतमो भवति। तदुक्तं बृहज्जातके।
वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्तगाः शुभफला नवभागसंज्ञा इति। स्वांशः स्वराशिनवमांशः स्वत्र्यंशः स्वराशि
द्रेष्काणः तेषु वर्गोत्तमादिषु गते वर्तमाने ग्रहे षट्त्रिंशता भजेत् न तु प्रोक्तहरेणेत्यर्थः। एवं हरेण भजने यल्लभ्यते रूपा
दिस आश्रयनामा गुणो भवेत्॥ अथैवंसिद्धस्याश्रयगुणकस्य कदाचित्संस्कारमाह॥ ॥ चेद्वर्गोत्तमपूर्वगोऽध्यरिसु
हृद्द्वेत द्दृहाद्भान्त्रिषड्लब्ध्यो नोग्रु गरिष्टभेध्विनवकाख्यास्वेसमे केवलः॥ कार्यस्त्वाश्रयकः सः ॥ ॥
चेद्धहो वर्गोत्तमपूर्वगः वर्गोत्तमनवमांशस्वनवमांशस्वद्रेष्काणान्यतरस्मिन्वर्तमानः सन् अध्यरिसुहृद्द्वे अधिरिपोरधि

प्री॰ म॰ मित्रस्यवागृहेभवेत्।तत्तदागृहाङ्कात्पूर्वंगृहवर्गस्थापितादङ्कात्त्रिषड्भिर्लब्ध्याप्राप्तफलेनसआश्रयकः ऊनोयुक्तःका
६० र्यः।आश्रयएवआश्रयकःस्वार्थेकप्रत्ययः।आश्रयगुणकइत्यर्थः।चेद्गौतमपूर्वगःसन्नरिष्टभेशत्रुराशौमित्रराशौ
वास्यात्तदागृहाङ्काद्भिन्नवकैस्त्रिभिर्नवत्याआप्याल्लब्धेनऊनयुक्कार्यः।एतदुक्तंभवति।मित्राधिमित्रगेहयोर्गृहाङ्का
त्स्वहरेणफलंप्रानीताश्रयगुणेयुक्तंकार्यम्।अधिशत्रुशत्रुगृहयोस्तुहीनंकार्यमिति।अत्रोपपत्तिः।वर्गोत्तमस्वरा
शिद्रेष्काणनवांशकेसकृद्द्विगुणमितिलघुजातकोक्तेर्वर्गोत्तमादौद्विगुणइत्युपपन्नम्।रिपुराशौत्रिभागोनमि
तिसारावल्यामभिहितत्वाच्छत्रुराशौत्र्यंशहानिः।छेदघ्नरूपेषुलवाधनर्णमेकस्यभागाअधिकोनकाश्चेदितिपाटी
सूत्रेणतलस्थहारेणेत्यादिनावासमच्छेदसूत्रेणवासिद्धेनत्र्यंशोनरूपगुणेनत्र्यंशहानिरेवभवतीति।त्र्यंशोनंरूपं
$\frac{2}{3}$ गुणः।अधिशत्रुराशौअर्द्धशत्रुत्वस्याधिक्यात्त्वार्द्धसहिततृतीयांशस्यप्रागुक्तसूत्रैःसिद्धस्यार्द्धात्मकस्यह्रासः।अ
धिरूपाच्च्युतोजातोधिशत्रुराशावर्द्धमितोगुणः $\frac{1}{2}$ एवंमित्रराशौयुक्त्यातृतीयांशस्यवृद्धिः।तलस्थहारेणेत्यादिनासि
द्धेनत्र्यंशाधिकरूपेणगुणेनत्र्यंशोपचयएवभवतीतिसत्र्यंशंरूपं $\frac{4}{3}$ गुणः।एवमधिमित्रतायाआधिक्यात्त्वार्द्धयुत रामः
त्र्यंशस्यपूर्वसूत्रेणसिद्धस्यार्द्धात्मकस्यवृद्धिः।इयंरूपान्विताजातोधिमित्रराशौगुणः $\frac{3}{2}$ समगृहेसमोऽर्द्धमित्रमर्द्धश ६०

ग्रभ्रेति पक्षेऽर्द्धमित्रत्वाद्यावती वृद्धिरर्द्धशत्रुत्वात्तावती हानिरिति हानिवृद्ध्योरभावाद्रूपं गुणः १ समो न मित्रं न शत्रुरिति
५क्षेपि न वृद्धिर्नापि हानिः। अतो रूपमेव गुण इति युक्तम्। लघुजातके सा सवल्या मध्यंशा सुषि शत्रुराशौ वक्रं विहाय ग्रह
निः स्यादिति नोक्तम्। क्वचिदुक्तमप्यस्ति। तन्मतेभेदेत्र पूर्वमतमेवाङ्गीकृतमिति प्राञ्चः। अथ शत्रुमित्रादिराशौ स्वनवांशे
स्वद्रेष्काणे वा स्थिते स्वराशौ शत्रुमित्रादीनां नवांशे द्रेष्काणे वा स्थिते ग्रहे सामान्यप्राप्ते गुणे राशिनवांशद्रेष्काणकृततार
तम्ये लक्षणं युक्तमेवं होरादितारतम्यादपि। समग्र एव गुणे सप्तवर्गकृततारतम्यविधिस्वीकारे त्वनन्ता युक्ता बहुव
र्गेषु स्यात् ततः कारणाद्विभक्ते एकस्मिन्गुणे राश्यादिस्थानेषु विभागेनावस्थानमागतम्। इह होरादयः षट् समा एव रा
शेस्तु होरादिवर्गाद्द्विगुणं ग्रहमिति यवनवाक्ये द्विगुणत्वमस्तीत्यष्टौ वर्गास्तेनाष्टभक्तो गुणो होरादिवर्गेषु। अयमष्टभक्तो 6
द्विगुणश्चतुर्भक्तगुणात्मको गुणो राशिस्थाने स्यादिति सिद्धम्। अतः सम्यगुक्तं श्रीपतिभिः। वर्गोत्तमे स्वभवने स्वनवां
शके च स्वत्र्यंशके च गुणको द्वितयं निरुक्तः॥ अध्यर्द्धरूपमधिमित्रगृहे सुहृद्भे सत्र्यंशकं समगृहे खलु रूपमेव॥१॥
ंशोनितं रिपुगृहे ध्यरिभे दलं स्यादेभ्यो गुणो भवति यः खलु कश्चिदेकः॥ वेदोद्धृतः सभगुणो गणकैर्निरुक्तो होरादिव
गुणकस्तु भवेत्तदर्द्धमिति॥२॥ अथाधिमित्रस्वस्वमित्राभ्यां क्रमादर्द्धन्यूनत्वाद्द्व्यधिकत्वमिति पूर्वयुक्त्या स्वगृहमित्र

श्रीम॰ ग्रहगुणयोरनयो २/४ रन्तरं ३/१ स्मिन् १ स्वगृहगुणाद्दूने मित्रगृहगुणे वा युक्ते जातो ऽधिमित्रसंबन्धिनि सप्तवर्गे गुणः
६१ ५/३ मित्रसंबन्धिवृद्धिर्निजाद् ३/१ रहिता ऽधिमित्रसंबन्धिवृद्धिरत्र विलोमविधिना तृतीयांशोनाधिमित्रसंबंधिवृद्धिर्मित्रसं
बंधिवृद्धिर्भवतीत्यधिमित्रसंबन्धिवृद्धिरियं ३/२ स्वतृतीयांशेनानेन २/१ ऊना जाता मित्रसंबन्धिवृद्धि ५/६ रनयोः प्राग्वद्गु
णोयं १/६ मित्रसंबन्धिनि सप्तवर्गे समसंबन्धिनि तु रूपमेव। मित्राधिमित्रयोर्यावती वृद्धिस्तावत्येवामित्राध्यमित्रयो
र्हानिरिति जातौ शत्रुसंबन्धिनि अधिशत्रुसंबन्धिनि सप्तवर्गे क्रमाद्गुणौ ५/६ १/३। स्वसंबन्धिनि द्वितयं गुणोस्त्येव। एवं स्थि
ते राश्यादिसप्तस्थानस्य गुणा एभिर्गुणकैर्गुणनीया इत्युपपन्नम्। अत एवोक्तम्। गृहादिके वर्गगणे स्वकीये द्विको गु
णस्त्र्यंशविवर्जितः सः॥ अधीष्टभे मित्रगृहे नवांशाविष्वे च रूपं च समस्य गेहे॥१॥ नवांशकाः पञ्च विरोधिराशौ गुणांश
काः स्यादधिवैरिणो भे॥ पूर्वं भपूर्वा गुणका य उक्ता वर्गेषु सप्तस्विह गुण्यसंज्ञाः॥२॥ गुण्या गुणैः स्वैरधिकारलब्धैरु
क्तैर्गुणैः स्याद्यमिश्रितैस्तैः। स्युतो बुधैरायसंज्ञितोयमिति॥ यत्र वर्गोत्तमस्वनवमांशस्वद्रेष्काणान्यतस्वशास्त्युस्थ्योद्द्वि
गुणः प्राप्तस्तत्र शत्रुक्षेत्रे त्र्यंशमित्यादिना जातकवाक्येन शत्रुभे हानिः परिणामेन गुणात्मिकार्थान्मित्रभादिषु वृद्धिरपि प्रा रामः
प्तात दन्त्रैकाग्न्यगुणासिद्धार्थसंपूर्णद्विमितगुणे यथा प्राप्तां हानिं वृद्धिं वा विधाय पश्चादस्य राश्यादिसप्तस्थानस्थापना॥ ६१

द्विविधिरितिप्राप्तौसत्यामुच्यते। इयंहानिर्वृद्धिर्वापरिणामेनगुणात्मिकास्तीतिराशिवशाद्वर्गोत्तमादित्रिकान्यत
मवशादत्रगुणद्वयेप्राप्तेआचार्यकल्पंतुबहुघ्नवायामेकंतुयद्भूरितदेवकार्यमितिवाक्येनपुनःसकृद्गुणकस्यनि
यमनाद्धानिवृद्ध्यात्मकगुणकस्यबाधःप्राप्तःजातकेहानिवृद्धित्वपुरस्कारेणोक्तत्वादबाधोपियुक्तस्तदबाधेबा
धश्चयथास्यात्तथाप्राप्तेत्रराशिवशाद्धानिवृद्धिःप्राप्तास्तीतिराशिस्थानस्थराशिगुणमात्रेनियोज्या।राशिवशाद्धानि
वृद्धिस्तुराशिस्थानस्थराशिगुणमात्रेहोरादिवशाद्धोरादिस्थानस्थहोरादिगुणेषुतारतम्यसिद्धसंपन्नवर्गगुणाकल
स्वणान्नियुक्तेवास्ति।एवमबाधःसार्थकः।बाधस्तुराशिगुणातिरिक्तहोरादिस्थगुणेषुसार्थकः।ततोगुणत्वेनप
रिणतयाहानिवृद्ध्याराशिस्थराशिगुणंगुणयित्वापुनरावश्यकत्वेनतारतम्यप्राप्तसार्वदिकगुणैर्गुणनमितिसिद्ध
म्।स्वराशिस्थेवर्गोत्तमादित्रिकान्यतमस्थेचग्रहेराशिवशाद्वर्गोत्तमादिवशादपिद्विमितगुणप्राप्तौसकृद्गुणनमि 61
तिवाक्येनैकस्यैवगुणकस्यनियमनात्परद्विगुणस्यसर्वथाबाधएवतदिहनैवपुनर्गुणनमितिबोध्यम्।अथैके
राशिस्थात्रस्थगुणमात्रेपुनरधिमित्रादिगुणकापेक्षायांप्रथमगुणकैरपरगुणकैर्वागुणनीयमितिसंदेहादेकतर
पक्षानवलम्बेयुक्त्यागुणकान्तराणिसाध्यन्ते।यथाप्रथमोधिमित्रगुणः ३ द्वितीयः ५ अत्रयद्विगुणयोरनयोरेका

नी॰ सं॰ कारत्नाभ्विष्णुत्तदान्यतरेणैवचरितार्थताजातास्यादिदानींत्वनयोरेकाकारतायुक्त्यायोगार्द्धविभाज्येतिक्रमिकयोरन
६२ योर्योगार्द्धे १६/१२ गुणोयुक्तः।अन्यच्च।प्रथममित्रगुणास्वयमोऽधिमित्रगुणःसिद्धोद्वितीयसिद्धौजातायामधिमित्रसं
बन्धिवृद्धिस्तृतीयांशेनामित्रसंबन्धिवृद्धिरित्यधिमित्रवृद्धेस्तृतीयांशेमित्रगुणेयोजितेसत्यधिमित्रगुणोभवतीतिसु
त्वयाधिमित्रसंबंधिवृद्धेरस्या ३ स्तृतीयांशो ३ यद्यधिमित्रगुणानपेक्षेप्रथममित्रगुणेस्मिन्नेव ५ योज्यतेतदप्यम
प्यपरोऽधिमित्रगुणोयुज्यते १४।एवंपुनरपिगुणद्वयेसंदेहहतादवस्थादनयो १६/१२।१४/६ योगार्द्धसदृशोप्येकोऽधिमित्रगुणः
सिद्धः।अत्र १५/३ हारांशयोर्द्विसप्ततिसप्तमांशेन ७२ अपवर्तितेकृतेलब्धाहरस्थानेसप्त ७ अंशस्थानेस्वल्पान्तरमुपे
क्ष्यप्राप्ताएकादश।एवमयंगुणोऽधिमित्रराशौ ११ अस्यवृद्ध्या ४ स्वत्र्यंशोनया २/१ प्राग्वदयंमित्रगुणः २०।२१ सम
गुणोरूपमेव १ मित्राधिमित्रयोर्यावतीवृद्धिस्तावत्येवामित्राध्यमित्रयोर्हानिरितिशत्रुगृहगुणा १३/२१ धिशत्रुगुणो
३ अतःसत्कृत्ं श्रीपत्याचार्यैः।नगांशकारुद्रमिताअधीष्टराशौसुहृद्गृहस्थनिमूर्छनांशाः।नवाश्विनोरूपमुदासराशौ
कुद्वंशकाविश्वमिताद्विषद्भे॥त्रयोनगांशाह्यधिशत्रुराशावितेभसंख्यानिजराशिवर्जम्॥वर्गोत्तमात्मीयनवांशदृक्काणस्थि राम:
तिग्रहेतुद्वितयंगुणःस्यात्॥एतैरधीष्टादिगुणैर्निहन्याद्दृष्टीरितंराशिगुणंपुनस्तमिति॥इत्याद्यगुणोपपत्तिःसुन्दरमि ६२

श्चोदिता॥ प्रकृतमनुसरामः॥ स्वगृहे गुणकः २ खेटोद्भवः सभगुणो गणकैर्निरुक्तो होरादिवर्गगुणकस्तु भवेत्तदर्द्धमित्यु
केः समष्टभक्तो १/४ जातः अयमनन्तरताडकेन द्विकेन गुणितो जातः स्वसबन्धिनि होरादिषड्वर्गगुणः १/२ अत्रांशहारावष्टा
दशभिर्गुणितौ १८/३६ जातोयं स्वहोरादिषड्वर्गगुणः। एवमधिमित्रगृहे गुणः ३/२ अष्टभक्तः ३/१६ अनन्तरताडकेन ५/३ गु
णितो जातो १५/४८ धिमित्रसंबन्धिहोरादिषड्गुणः। एवं मित्रगेहगुणो ४/३ ष्टभक्तो १/६ नन्तरगुणेन १३/९ गुणितो जातो मि
त्रसंबन्धिनि होरादिषड्वर्गगुणः १३/५४ एवं समगृहगुणोष्टभक्तो नन्तरताडकेन गुणितो जातः १/८ एतस्य हरांशयोर्नवभि
र्गुणने जातो गु[illegible] एवं शत्रुगृहे गुणो ३/४ ष्टभक्तो ३/३२ नन्तरताडकेन ५/[illegible] गुणितो जातः शत्रुसंबन्धिहोरादिवर्गगुणः
५/१०८ एवमधिशत्रुगृहगुणो १/२ ष्टभक्तो १/१६ नन्तरताडकेन १/३ गुणितो जातः १/४८। अत्रांशहरयोस्त्रिभिर्गुणने जातोधि
शत्रुसंबन्धिनि होरादिषड्वर्गगुणः ३/१४४। एवमेते गुणाः स्वाधिमित्रादिगृहस्थे ग्रहे सति स्वाधिमित्रादिसंबन्धिहोरादिस्थानीया भा
गत्वाः। एवमन्यराशावन्यहोरादिस्थे ग्रहे तत्तद्गुणकाः स्थाप्याः। राशिगुणस्थाने होरादिगुण इति राशिस्थाने तु द्विगुणाः स्थाप्याः।
पश्चात्तं योगे कृते आश्रयगुणको भवतीत्युपपन्नम्। दर्शनम्।
योयेन [illegible] माधिवैरिसंबन्धिहोरादिगुणानामेव हारांशाः क्रमेण।

स्व·	अधि	मि·	स·	श·	अ·
१८/३६	१५/४८	१३/५४	९/७२	५/१०८	३/१४४

ननु नन्वस्तिराजन्ति[illegible] एतदर्शनं त्रिभिर्गुणा

62

श्री·म नीयाअ ॥ ...तुनहन्तव्यांदितस्मादष्टादशादिभिर्गुणनंव्यर्थम्। नचयावानेवाष्टादशानांषड्विंशांशस्तावदेवरूपस्य
६३ र्दुमित्रादिफलेविशेषाभावादष्टादशादिभिः स्वादिगुणहारांशगुणनंसार्थकमेवेतिवाच्यम्। गुणान्तरेऽपिसमाङ्केन
हारांशगुणनेफलावैचित्र्यदर्शनादुक्तदोषतादवस्थ्यात्। तस्मादष्टादशादिभिः स्वादिगुणहारांशगुणानांहारां
शगुणनंगौरवान्निष्प्रयोजनत्वाच्चव्यर्थमेव। अस्तुवास्वसमाधिशत्रुगुणकानामेवसमाङ्केनहारांशगुणनम्। परंतु
अष्टादशादिभिरेवहरांशाहन्तव्यादितैर्नहन्तव्यादिदमपिशिष्यबन्धनमात्रम्। किंचमित्रराशौमित्रहोरास्थेग्रहे
यावान्होरास्थानीयोगुण १३/५४ स्तावानेवशत्रुराशावपिमित्रहोरास्थेग्रहेगुणःस्यादित्युक्तंतदप्यसंगतम्। यत
स्तत्रशत्रुराशिमित्रहोराजन्येनगुणान्तरेणभाव्यम्। अन्यथामित्राधिमित्रादिगुणसाधनप्रयासवैयर्थ्यापत्तिः। अपि
च। सप्तवर्गस्यापितानांसर्वेषांगुणकानांयोगः कार्यइत्युक्तं तत्रपृच्छ्यते। किंसर्वेगुणकाःसदृशच्छेदाविसदृश
च्छेदावा। आद्येकिंसार्वत्रिकाःकादाचित्कावा। नाद्यः। सर्वत्रसर्वगुणकानांसमच्छेदत्वस्यबाधितत्वात्। नापरः।
भौमादीनांहोराधिपत्याभावात्सुष्यवतोस्त्रिंशांशाधिपत्याभावाच्चकादाचित्कस्यापिसमच्छेदत्वस्यासंभवात्। नापिच राम:
रमः। असमच्छेदानांयोगस्यायुक्तत्वात्। अन्यथायोगोत्तरंतुल्यहरांशकानामितिसिद्धान्तोव्याहन्येत। तस्मात्सप्त ६३

वर्गस्य गुणानामैक्यं कार्यमित्युक्तम्॥ अत्र केचित्। न द्विर्यं सप्तवर्गस्य गुणकानां समच्छेदत्वं ब्रूमो येन भवदुक्तो दोषः प्रसज्येत। किंतु विसदृशहरा एव गुणास्तेषां समच्छेदान्विधाय योगः कार्य इति वदामस्तेन सर्वं समञ्जसमेवेति। स्यादेतत् समच्छेदविधानेन योगः कार्य इत्याचार्येण प्रयुक्तं स्यात्। तस्मात्कथमेतदिति दुस्तरजातकार्णवसंदेहतरङ्ग-सङ्ग-भङ्गि तहृदया होरिका मिथः परिभाषन्ते। अत्र ब्रूमः॥ यस्य राशौ ग्रहस्तस्यैव चेद्धोराद्रेष्काणान्यतमवर्गो स्यात्तदा तत्रापि तावानेव गुणकोऽयं तद्गुणकराशिगुणकयोः समच्छेदत्वाद्योगोऽपि युक्त एवेत्यत्र न कोऽपि विवादः। होरास्य गुणा[illegible]स्याभगुणकस्यांशमात्रे द्वैगुण्येऽपि सदृशच्छेदत्वमव्याहतमेवेति हृदयम्। अथान्यराशावन्यहोरादिस्थे ग्रहे त्रैराशिकेन गुणान्तराणि यावत्साध्यन्ते तावत्त एव समानराशिहोराद्युक्तगुणा उत्पद्यन्ते किंतु राशिगुणहरतुल्यहरा अतस्त एव गुणकाः स्थाप्याः समच्छेदत्वाद्योज्याश्चेति सर्वमुपपन्नम्। सप्तवर्गगुणानां समच्छेदत्वे सिद्धे सर्वैर्गुणकांशयोग एकेनैव हरेण भाज्य इति लाघवाद्गुणकांशा एव स्थापिताः पश्चात्तेषां योगो राशिगुणस्य हरेणैव भाज्य इति सम्यगुक्तमाचार्यवर्यैः॥ ॥अत्रोदाहरणम्॥ रवेः सप्तवर्गस्वामिचक्रं सप्तवर्गस्य गुणकचक्रं च

अथ

गृ	हो	द्रे	स	न	द्वा	त्रिं
बुधः	चन्द्रः	बुधः	भौमः	गुरुः	भौमः	बुधः
शत्रु	समः	शत्रुः	अमि	सम	अमिः	शत्रु

शत्रुसंबन्धिहोरादिस्थोऽयं गुणो $\frac{५}{१८}$ द्विगुणो जातो[illegible]

प्रो॰म॰ हरसंबन्धिगुणः १०/१०८। अत्रांशस्थाने दशसन्तीतितेस्थापिताः पश्चात्सद्गुण धृतिभि
६४ र्भास्याद्रविसुखैक्तद्रेष्काणत्रिंशांश योरपिशत्रुसंबन्धित्वात्तत्रापिसएवगुणकः

ग	हो	द्रे	स	न	द्वा	त्रि
१०	९	५	१५	९	१५	५

५/१०८। समच्छेदत्वात्तद्योगोपियुक्तएवेतिनकिंचिद्विरुद्धम्। अथहोरास्थानस्यगुणःसाध्यते। तत्रसमराशिस्थेसति
समहोरास्थोगुणः। ६/३। अपेक्षितस्तुशत्रुराशौसमहोरायां गुणइतिशत्रुराशिपरिणामोस्यगुणस्यान्याय्यः। तत्रत्रैरा
शिकम्। यदिरूपचतुर्थांशमितेसमगृहगुणेयंहोरास्थानस्यगुणो ६/२ लभ्यतेतदारूपषडंशमितेशत्रुगृहगुणके
कियानिति। अत्रच्छेदंलवंचपरिवर्त्येत्यादिनाजातोयंगुणःशत्रुराशौसमहोरायाम् ६/१०८। अत्रांशस्थानेनवातोन्यरा
शावपिसमहोरायांनैवस्थाप्यादित्युपपन्नम्। हरोपिराशिगुणस्यहरेणतुल्यइतिसमच्छेदत्वाद्योगोपियुक्तएव। किं
चयदिपूर्वंसमसंबन्धिहोरास्थोगुणकोनवभिर्नगुण्यतेतदाशत्रुराशौसमहोरायांगुणः। १/१२। अस्यपुनाराशिगुणेन
साकंयोगेक्रियमाणेमिथोहराभ्यामित्यनेनसमच्छेदत्वकरणमावश्यकम्। तत्रद्वादशभिरष्टोत्तरशतेपवर्तितेनव
लब्धास्तेरूपद्वादशांशमितगुणकस्यहारांशगुणनेजातःसएवगुणः ६/१०८। एवमग्रेसमच्छेदत्वकरणावसरेसमगृ राम॰
हगुणोनवगुणोभविष्यतीतिपूर्वमेवमहामतिभिराचार्यैर्नवगुणःप्रोक्तइतिनकोपिदोषइत्यवगच्छ। एवंसाधि ६४

वैरिगुणकयोरपिधृतित्रयाभ्यांगुणनंनानर्थकमित्युदाहरणेन बोध्यम्। अथशत्रुराशावधिमित्रसप्तमांशेगुणोनुपातेन। यद्येतावति ३/२ अधिमित्रगृहगुणेयमधिमित्रसप्तांशगुण १५/४ स्तदाशत्रुगृहगुणेस्मिन् १/६ कियानितिच्छेदंलवंचप रिवर्त्येत्यादिनाजातः १५/१२ सएवगुणकोराशिगुणस्यहरतुल्यहरोतस्तएवगुणकाःस्थाप्याः पश्चाद्राशिगुणस्यैवह रेणहरणीयाइतिसर्वंपरिच्छिन्नम्। अथवर्गोत्तमस्वांशत्र्यंशगतेग्रहेगुणोद्विमितोवेदोद्धृतोजातोभगुणकोर्द्धमि तः १/२। यदितत्तद्गृहेगुणेतच्चद्धोराशिगुणकोलभ्यतेतदास्मिन्नर्द्धमितेवर्गोत्तमादिगुणेकिमितित्रैराशिकेनगुणान्त राणिसाध्यन्तेतावेत्तएवगुणाः षड्विंशत्तुल्यहराउत्पद्यन्ते। गृहस्थानेपिपूर्वप्रकारेणयोगुणकस्तद्धरस्थानेयावत्स ड्विंशत्स्थाप्यन्तेतावद्वर्गोत्तमान्यतरवशाप्तगुणकानन्तरवाङ्कघाततुल्यएवगुणकउत्पद्यते। अतस्तत्राङ्कयोगं षड्विंशतैवभजेन्नतुप्रोक्तहरेणेत्यपिसाधु। अथवर्गोत्तमादित्रिकान्यतमस्थोग्रहोयद्यधिशत्रुगेहेभवतितदागृहगु णकस्यास्य १/६ त्र्योनगांशाद्यधिशत्रुराशावित्युक्तेरयंगुणः। ३/४ तत्रगुणनंखण्डाभ्यामपिसंभवतीत्येतस्यखण्डद्व 64
यंकृत्वातत्रैकम् ३/४। अपरंच ४/३। तत्रप्रथमखण्डेनगुणनेगुणहरयोस्तुल्यत्वान्नाशेकृतेपूर्वानीतआश्रयगुणको लब्धः। द्वितीयखण्डेनतुराशिगुणेंशाहतिस्छेदवधेनभक्तेतिभिन्नगुणनरीत्यागुणितेचतुर्भिरपवर्तितेचगृहाङ्कःस्ये

ग्रै॰म॰ श्चाधनखण्डगुणितत्वादृणगतस्यत्रिषष्टितमोभागोभवतीतिग्रहाङ्कःत्रिषष्टिभागोनःपूर्वानीताश्मयगुणकोवास्तव
६५ आश्मयगुणोभवतीत्युपपन्नम्। एवमपिमित्रगृहेगुणः। ११। अस्यापिखण्डद्वयंविधायगुणनेगृहाङ्कःत्रिषष्ट्यंशयु
वभवतीतिसिद्धोक्तम्। परमियांस्तुविशेषः। अत्रसप्तचतुर्मितएकादशानांधनखण्डेकृते —— त्रिषष्टिभागोयोज्य
इति। अथशत्रुगृहेगुणः ११/४३ अयमीदृशः कल्पितः। ३१/३२। अनेनपुरानीताश्मयगुणेनगुणनेगुणकभाजकयोः सम
त्वादपंगमेकृतेसएवजातः :। गुणकांशस्यानेष्टावधिकागृहीताद्त्यष्टानामेकविंशत्यंशेनगुणितराशिगुणा १०/३६
लब्धंपुरानीताश्मयगुणाच्छोध्यंतत्रषट्त्रिंशदेकविंशतितुल्यहरयोर्घातस्यास्य ७५६ मानत्वे ८ रपवर्तकृतेल
ब्धासाध्रुवचतुर्नवतिः ९४। ३० स्वल्पान्तरत्वाच्चतुर्नवतिमेवगृहीत्वागृहाङ्कःचतुर्नवतिभागोनःपूर्वानीताश्मयगुणकःका
र्यइत्युपपन्नम्। अथवर्गोत्तमादित्रिकान्यतरस्थोग्रहोयदिमित्रगृहेभवतितदायंगुणकः। ३९/२१। अस्यापिधन
खण्डेकृत्वागृहाङ्कःचतुर्नवतिभागान्वितःपूर्वाश्मयगुणोवास्तवोभवतीतिनिष्पन्नम्। वासनाबोद्धारस्त्वधिरिपु
सुहृद्गृहेत्रिषड्लब्धोनोमित्रारिभेतुचतुर्नवत्यंशयुतोगृहाङ्कःकार्यइतिवदन्तितदतीवतुच्छमित्यवगच्छ। स ग्र॰म॰
मगृहेतुरूपसदासराशावित्युक्तत्वाद्रूपेणगुणनेविकृतत्वाद्यथास्थितएवगुणकः। स्वराशिस्थेवर्गोत्तमादित्रिका ६५

न्यतमस्यैवग्रहेराशिवशाद्गोत्तमादिवशादपिद्विमितगुणकप्राप्तौसकृद्गुणमितिवाक्येनैकस्यैवगुणकस्यनियम
नादपरद्विगुणस्सर्वथाबाधएवातःसम्यगुक्तंस्वेसमेकेवलइति॥इत्याश्रयगुणकोपपत्तिः॥कर्मयोग्यगुणकमा
ह॥ ॥ तत्स्फुटहतेर्मूलंसयोग्योगुणः॥ ॥ स्पष्टम्।उपपत्तिःप्रागुक्तैव॥अंशायुर्दायोपयोगिदायांशाना
ह॥ ॥ खेटानांचतनोर्लवाःस्वयुगहृच्छेषाद्हृतांशायुषः॥१८॥ ग्रहाणांलग्नस्यचलवाश्चत्वारिंशद्भक्त
शेषाःसन्तोंशायुषोलवाभवन्ति॥अत्रोपपत्तिः॥ग्रहभुक्तनवांशराशितुल्यंबहुसाम्यसमुपैतिसत्यवाक्यमित्युक्ते
मेषनवमांशस्थेग्रहेएकंवर्षमायुर्वृषांशस्थेद्वेवर्षेएवंक्रमेणमीनांशेद्वादशवर्षाणीतिनिर्णीतम्।तत्रमेषादेश्च
त्वारिंशदंशान्तैर्मीनांशान्तोभवतीतिचत्वारिंशदंशैरेकःपरिवर्त्तोलभ्यतेतदेष्टैर्ग्रहलग्नांशैःकतीतिचत्वारिंशद्भ 65
क्ताग्रहलग्नांशागतपरिवर्ताःस्युःशेषोवर्तमानपरिवर्तस्यगतंभवति।कलानांद्विशत्यै २०० कोनवांशस्ततुल्या
न्येववर्षाणीतिद्विशतकलाभिरेकंवर्षंतदादायांशापरपर्यायशेषांशकलाभिःकिमिति।वर्षाद्यमंशायुर्भवति।अत
एवलक्ष्यते।दायांशोत्थकलाःखयोग्यगुणकघ्नाःखाभ्रनेत्रोद्धृताइति।अतःसर्वंसयुक्तिकमेव॥अथचक्रार्द्धहानिमा
ह॥ ॥ षड्भाल्पेसतिखेचरोनउदयेस्यांशोद्धृतैःखाग्निभिस्त्वेकाल्पेस्यचखाग्निभाजितलवैःसोंश्यो

ग्रै.म. नितेखर्द्धितैः। ऊनाभूर्गुणः एकभे द्विबहुषु त्वेकस्य बह्वोजसः कार्यास्तद्गुणिताः स्वदायअलवाश्चक्रार्द्धहा
९९ निस्त्रियम्॥१९॥ खेचरो न उदये षड्भाल्पे सति अस्यांशोद्धृतैः खाग्निभिरूनाभूर्गुणः स्यादित्यन्वयः। अयमर्थः। ग्रहो
लग्नाच्छोध्यः शेषं यदि षड्भाधिकं तदा नैवाहानिः। यदि च षड्भाद्य्ल्पं तर्हि अस्य षड्भाल्पस्य खेचरोनोदयस्य राशयस्त्रिं
शता गुण्या अधःस्थांशयुक्ता अंशा भवेयुस्ते त्रिंशद्भाज्या लब्धेन भूरेकः हीनः कार्यो गुणकः स्यात्। तु विशेषे। एकाल्पे
खेचरोनोदये अंशस्य खेचरोनोदयस्य खाग्निभिस्त्रिंशताभाजितलवैरूनाभूर्गुणः स्यात्। तु विशेषे। सौम्यानि ते उदये शुभ
ग्रहो नेलग्ने कृते सति अर्द्धितैरंशोद्धृतैः खाग्निभिरर्द्धितैः खाग्निभाजितलवैर्वा ऊनाभूर्गुणः स्यात्। तु विशेषे। एकभे द्विब
हुषु द्वित्र्यादिषु ग्रहेषु सत्सु बह्वोजसः एकस्यैव गुणः कार्यः बहु ओजो वीर्यं यस्येति बह्वोजास्तस्य। एकराशिस्थानां म
ध्ये यो रूपषष्ट्यंशाधिकबली तस्यैव गुणः कार्य इत्यर्थः॥ यदा तु रूपषष्ट्यंशादिबलसाम्यं स्यात्तदा सर्वेषामपि गुणः
कार्य इति मिश्राः प्राहुः। वस्तुतस्तु नैसर्गिकबलमेतद्बलसाम्ये स्यात् अधिकचिन्तेति लघुजातकसारावल्याद्युक्तेरेकस्थे
कर्क्षगेष्वेक इति गर्गोक्तेश्च यस्य निसर्गबलमधिकं तस्यैव गुणः साध्य इति अत्र विषष्ट्यंशस्यातिसूक्ष्मत्वाद्रूपषष्ट्यंश रामः
पर्यन्तं चक्रार्द्धहानिर्भवेत्। गुणकेन दायांशगुणने परिणामे हानिरेव भवतीति भावः॥ चक्रार्द्धहानिर्नाम च क्रूरघाताद्धे ९९

हानिः।पातोविपरीतस्तद्विपरीतत्वसंबन्धेनपातशब्दस्यविपरीताभिधेयेलक्षणाचक्रस्ययद्विपरीतार्द्धंतत्संबन्धिनी
हानिरित्यर्थइतिमिश्राः॥अत्रोपपत्तिः॥बृहज्जातके॥सर्वार्द्धत्रिचरणपञ्चषष्ठभागाःक्षीयन्तेव्ययभवनादसत्सुवाम
म्॥सत्त्वर्द्धंह्रसतितथैकराशिगानामेकोंऽशंहरतिबलात्तथाहसत्यः॥लग्नाद्द्वादशेराशौपापग्रहेसंपूर्णायुर्हानिरेकाद
शेऽर्द्धा युर्हानिर्दशमेतृतीयांशस्यनवमेचतुर्थांशस्याष्टमेपञ्चमांशस्यसप्तमेराशौआशुभः षष्ठांशस्यहानिः॥शुभग्र
हेतुलग्नाद्द्वादशराशौस्थितेऽर्द्धहानिरेकादशेचरणस्यदशमेषष्ठांशस्येत्यादि।द्वादशेसर्वत्रसंपूर्णहानिर्नयुक्ताऽक
विदेकत्रयुक्तात्तस्माद्यावतिमेषादिभागेलग्नंलग्नाद्द्वादशेपितावत्येवमेषादिभागस्थितेग्रहे हसर्गसिद्धयुक्त्या 66
लकसाम्याद्द्वादशस्यमेषादिसंख्याव्यावहारिकराशेरवश्यंभावाच्चोक्तवदेकादशराश्यन्तरेलग्नार्वाचीनैकराश्यन्त
रात्मकेसर्वोभागोहीयते।सर्वंतुजातकतन्त्रेतुभागपर्यायपदपर्यन्तधावनात्सर्वोपिभागएकरूपहरेणायातीत्ये
करूपंहरः।एवंदशराश्यन्तरेलग्नार्वाचीनद्विराश्यन्तरात्मकेऽर्द्धभागःक्षीयतेऽर्द्धभागोपिद्विरूपहरेणागच्छतीतिरू
पद्रूपंहरः।एवंक्रमिकनवभान्तरेऽर्वाचीनत्रिभान्तरेत्रिरूपंहरः।अष्टभान्तरेऽर्वाचीनचतुर्भान्तरेचतूरूपंहरः।सप्तभा
न्तरेऽर्वाचीनपञ्चभान्तरेपञ्चकंहरः। लग्नात्षड्भान्तरेषड्रूपंपरमोहरः।अर्थादन्तराभावेह्रासाभावः।तस्माल्लग्नार्वाची

नैकरांशपुपचयादेकदरोपचयइतिसिद्धम्।अथानुपातः।यदित्रिंशदंशैरेकरूपं१ हरस्तदेष्टखेचरोनोदयराश्यं
शतुल्यैर्लग्नार्वांशैःप्रस्यंशैः किमिति खेचरोनोदयांशत्रिंशदंशोहरः इतिनिष्पन्नम्।अनेनेनसच्छेदे नहरेणायुर्ले
वाभाज्यात्लब्धमायुर्लवेभ्यःशोध्यमितितत्रछेदं लवं चपरिवर्त्यहरस्यशेषः कार्योथभागहरणेगुणनाविधिमेतिसूत्रे
णहरभक्तायुर्लवा जातम्।आ॰ल ३० अत्रायुर्लवास्त्रिंशतागुणनीयाः खेचरोनोदयांशैर्भाज्याश्चवाखेचरोनो
दयांशभक्तत्रिंशतागुणनीयाइतिनिष्पन्नम्। तत्रखेचरोनोदयांशभक्तत्रिंशद्गुणाआयुर्लवाआयुर्लवेभ्यःशो
ध्याःखेचरोनोदयांशभक्तत्रिंशदूनरूपगुणायुर्लवावाफलंसममेव। तद्यथा।आयुर्लवाः१० खेचरोनोदयांशाः
६० खेचरोनोदयांश ६० भक्तत्रिंशता ३० आयुर्लवागुणितालब्धमायुर्लवेभ्यःशोधितंजातम् ५।यद्वाखेचरोनो
दयांशभक्तत्रिंशदूनंरूपेणानेन० ३० आयुर्लवागुणिताःफलंसममेवजातम्।५।अतःषड्भाल्पेसतिखेचरोनउद
येस्यांशोद्धतैः खाग्निभिरूनाभूर्गुणः स्यादितियुक्तमुक्तम्।एकाल्पेतुखेचरोनोदयेत्रिंशद्गुणायुर्लवेभ्यस्त्रिंशद
ल्पखेचरोनोदयांशैर्भागेह्रियमाणे फलमायुर्लवाधिकमायुर्लवेभ्योनशुध्यतीतिव्यस्तत्रैराशिकंकर्तुमुचितंमतः
खाग्निभाजितलवैरूनाभूर्गुणइत्यपिसुष्ठूक्तम्।सत्त्वर्द्धेहृसतीत्युक्तेःसौम्योनितेलग्नाद्धितैःखेचरोनोदयां

शभक्तत्रिंशद्भिः खाग्निभाजितलवैर्वा नाभूर्गुणः स्यादिदमपि नितान्तकान्तम्। अनेन गुणेनायुरंशा गुणनीया अतस्त
द्गुणिताः स्वदायजलवादत्युपपन्नम्। अत्र केचिद्द्वादशांशचक्रार्द्धहानिं कथयन्ति स्म तन्मतमाचा
र्येण न स्वीकृतम्। गर्गसत्याचार्यैर्वराहकल्याणवर्मादिभी राशिपर्यायपर्यन्तं धावनात्। अतो मदुक्तं तत्सर्वं निरवद्य
म्। पद्धतिप्रकाशे। चक्रार्द्धहानिगुणः प्रकारान्तरेण मयोक्तः॥ एकाल्पके भद्विगुणांशतुल्यं रसाल्पके तद्धतरूप
तुल्यम्। शेषाद्यंतरेनैकाप्तो गुणः स्याच्छुभोनिते शोध्यदलेन युग्वा॥१॥ खगोनलग्नदलमनुष्टुभः॥ शेषं स्फुटम्। आचा
र्योक्तप्रकारे त्रिंशतां पत्रं नैकत्वात् सोपपत्तिस्ताभ्रिकेरूह्या। विस्तरभयादस्माकमनुद्योगः॥ श्रीपति पद्धतौ शुभग्र
हस्य रूपाल[illegible]रेत्स्ततोऽर्द्धहृत सतीति शहज्जातकोक्ते हरार्द्धरूपाद्बोध्यम्। यथास्थितहरोनरूपं ह[illegible]द्धृयुक्तं वा गुणो 67
भवतीति द्रष्टव्यम् [illegible] रामेदरः। रूपाल्पकोद्विते हारस्ततो रूपाद्विशोधयेदिति। हरखण्डेन संयुक्तो गु
णकः स्याद्गुणोऽन्यथैव [illegible]। आदिशर्मणा तज्जातहानिकर्मणा लग्ने शुभोनिते हारगुणो द्विनिघ्नाविति वदता हरोनरूपं
द्विगुणं गुणो भवतीति स्वीकृतं तदसत्। लग्नराश्यादिसमे पापे सौम्ये वान्तराभावाद्धान्यभावद तिहालिकोऽपि प्रति
पद्येत तत्र पापस्य हरः शून्यमिति रूपं गुणस्तेन दायांशानां गुणने दायांशा एव भवन्तीति न कापि हानिः। शुभस्य रू

द्विनिघ्न इति रूपद्वयं गुणास्तेन दायांशगुणने द्वैगुण्यं भवतीति यत्किंचिदेतत्। हानिगुणकेन गुणने हानिरेव भवितु
मर्हति न वृद्धिरिति [illegible] ऽपि जानाति। एवमन्यत्रापि व्यभिचरतीति परिहार्योऽयं पन्थाः। यदप्यायुष्मतां खगो नलग्नेष
ड्लांल्पं कुह दं ह्यसो भ [illegible] उक्तं तदसमन्त्। तत्र राशयो भोऽद्विघ्नलवादिना युक्ता हरो भवतीति ध्येयम्। यदप्यंशगणेश
नाम्ना द्विघ्नहरोऽनेकरूपगुणः स्यादित्यभिहितं तदपि तुच्छम्। कदाचिद्द्विघ्नहरस्य रूपादप्याधिक्य लाभेन रूपाल्पत्वसं
भवात्। रूपमेव तस्माच्छोद्ध्यमिति यदि तथापि व्यभिचरतीति धूलीकर्मणा प्रदर्शनीयम्। यत्तु भाव [illegible] ादादिशर्मणा
चक्रार्द्धहानिः खेटकस्य दत्तादिति प्राचोक्तं तदप्यसङ्गतम्। तद्भूम्येतेन तथा नङ्गीकारात्। सूर्येण क्षीणचन्द्रोऽत्र पाप
इत्युक्तं तदपि पद्धतिकारविरोधादयुक्तम्। प्रकृतमनुसरामः॥ अथांशायुर्दायसाधनमाह॥ ॥ दायांशोऽस्य क
लाः स्वयोग्यगुणकघ्नाः स्वाभ्रनेत्रोद्धृता अंशायुर्द्युसदां समादि तु तनोर्दायांशकास्माहताः॥ दिग्भक्ताश्च
समादिवेत्तु बलवल्लग्नं तदा लग्नभैस्तुल्याब्दैस्सहितं द्विनिघ्नशरहृद्भागादितो मासयुक्॥ २०॥ यथाप्रा
प्तचक्रार्द्धहानिसंस्कृतदायांशानां कलाः स्वकीयकर्मयोग्यगुणकेन गुणिता द्विशत्याभक्ताः फलमंशायुर्वर्षादि भ
वति। अयमभिसन्धिः। दायांशकला द्विशत्याभक्ता लब्धं वर्षाणि स्युः। शेषं सविकलं द्वादशभिः संगुणय्य विकलास्थाने

स्वषष्ट्यांशं कलासु संयोज्य द्विशत्या भक्ते मासाः। पुनः शेषं सावयवं त्रिंशता गुणयित्वा विकलातः षष्टिलब्धमुपरि प्र
क्षिप्य शतद्वयेन भागे गृहीते दिनानि स्युः। पुनः शेषं षष्ट्या निहत्याधःस्थाङ्कयुतं द्विशत्या भजेल्लब्धं घटिका भवेयुरेव
मग्रेऽपि। लग्नस्य दायांशास्त्रिगुणाः प्रोक्तरीत्या दशभिर्भाज्या वर्षाद्यं लग्नायुर्भवेत्। यदि तु षड्रूपाधिकबलं लग्नं तदा
लग्नराशितुल्यवर्षैर्युक्तं कार्यम्। लग्नभागादेर्द्विगुणात्पञ्चभिराप्तेन मासादिफलेन मासादौ चेद्युक्तं कार्यं तल्लग्नायुः
स्पष्टं भवति। यदा लग्नबलं षड्रूपाल्पं तदानीं दायांशास्त्रिगुणा दशभक्ता एव लग्नायुः स्यादिति तात्पर्यार्थः। बलस्वल्प
क्षणं त्वल्पे हीनबलो बली षडधिक इत्यग्रे वक्ष्यते। ग्रहायुःसाधनवासनायां त्वेकनवांशकलाभिर्द्विशतमिताभिः २००
रेकं वर्षं तदेष्टदायांशकलाभिः किमित्यनुपातेन सुगमा। दशभिरंशैस्त्रयो नवांशास्तत्तुल्यान्येव वर्षाणीति त्रीणि वर्षा
णि भवन्ति। अथानुपातः। यदि दशभिरंशैस्त्रीणि वर्षाणि तदेष्टलग्नदायांशैः कानीत्यत उक्तं तेन दायांशकास्त्र्याहता दि
ग्भक्ता इति वीर्यान्वितराशिसमं च होरेति बृहज्जातकोक्ते लग्नभैस्तुल्याब्दैः सहितमित्युपपन्नम्। ततोऽनुपातः। यदि
त्रिंशदंशैर्द्वादश मासास्तदेष्टलग्नभागैः किमिति। अत्र गुणहरौ षड्भिरपवर्त्य लब्धं गुणो द्वौ २ हरः पञ्च ५ अतो द्विनिघ्न
राशिर्हृदित्याद्युपपन्नम्॥ ॥अथ पिण्डनिसर्गजीवशर्मीयदायोपयोगिभूतान् दायांशान् साधयति॥ ॥ स्वोच्चो

ग्री.म युचरोद्ध: ...त्समधिको ग्राह्योल्पकोनार्कभं१२तद्भागाद्युचरोरिभे यदि गुणांशोना विना वक्रगमं॥छा
९९ प्ता अस्तमिते विनाप्यनिसिते हानिद्वयेनाधिकौ कार्यो पिण्डनिसर्गजीवगा इति चक्रार्द्धहानिर्भवेत् ॥
२१॥ स्वोच्चेनोनो ग्रहो यदि षड्राशिभ्योऽधिकस्तदा स्वभागाः कार्याः। यदि षड्राल्पस्तदा तं द्वादशभ्यो विशोध्य भा
गाः कार्याः। ... नीचस्थभावेन वक्रगतिं प्राप्तं ग्रहं भौमादिपञ्चकान्यतमं विहाय यद्यरिभे स्वाभाविकशत्रुराशौ
ग्रहः स्यात्तर्हि तेतदीयाभागा निजचतुर्थांशेन हीनाः कार्याः वक्री ग्रहः शत्रुराशावपि त्र्यंशं नापहरतीत्यर्थः। अत्र के
चित् टिप्पणीकाराः अरोवक्रः क्रूरवक्रावनेयद्दत्यभिधानाद्धित्वा वक्रं रिपुगृहगते हीयते स्वत्रिभाग इति वराहोक्तौ व
क्रशब्देन भौमं व्याख्याय तत्स्वरसाद्वक्रगमित्यत्रापि भौमं व्याचक्षते तद्बहूनामसंमतत्वादुपेक्ष्यम्। ज्ञानराजसुतस्
यापि। आरो वक्रो वक्रचारो महीज इति भौमनामानि स्वेच्छया प्रकल्प्य वक्रचारग इति श्रीपत्युक्तौ वक्रचारगो भौम इ
ति व्याख्यातवान्। तदपि स्वच्छन्दं प्रवर्तमानस्यैकदेशिनो मतमुपेक्ष्यमेव। बृहज्जातकटीकायां हित्वा वक्रमित्यस्य
व्याख्यावसरे भट्टोत्पलेनाप्युक्तम्। वक्रं विपरीतगतिं हित्वा वर्जयित्वा यो ग्रहो रिपुगृहगतः शत्रुक्षेत्रगतो भवति तेन राम:
स्वात् स्वत्रिभागो हीयते। एतद्बहूनां मतम्। आचार्यस्य पुनरेष एव पक्षोऽभिमतः। अन्यथा हित्वा भौममित्याचक्षीत। ९९

अतएवत्यज्यते यथावक्रगोग्रहआयुर्दायंसबलत्वात्त्रिगुणंददातितथात्रापिनापहरतीतिनिश्चयइति।कथंपुन
र्वक्रिणंविहायेतिपक्षस्यबहुसंमतत्वमितिचेत्।पश्य।श्रीधरः।वक्रचारंविनात्र्यंशंशत्रुराशौहरेद्ग्रहइति।श्रीपतिर
पि।त्र्यंशकंहरतिशत्रुभेग्रहःस्वायुषोत्रनतुवक्रचारगः॥दामोदरोपि।विनावक्रगतिंहरेच्च।निजायुषस्त्र्यंशमरेर्गृह
इति।होरामकरन्दे।त्र्यंशंहरन्त्यकुटिलारिपुराशिसंस्थाइति।बृहज्जातकेपि।हित्वावक्रमित्यत्रवक्रमस्यास्तीति
वक्रः अर्थआदिमो।च वक्रिणंहित्वेतिव्याख्येयम्।प्रामाणिकैःश्रीधरादिभिराचार्यैर्गर्गपराशरबादरायणदेवला
दिपद्धतयस्तज्जातकानिचसंपूर्णानिदृष्टान्यासन्नतस्तैर्यदुक्तंतत्सर्वंसमूलमेव।यत्तुबृहज्जातकटीकायांनचा
वनिसुतस्त्र्यंशंशत्रुक्षेत्रगतस्तथेतिगर्गवाक्यंयदपिचभूम्याःपुत्रंवर्जयित्वारिभस्थाहरेयुःस्वात्स्वादायुषस्तेत्रि 69
भागमितिबादरायणवाक्यंतदुभयमप्यंशायुःप्रकरणेऽभिहितत्वाद्दशायुर्विषयमेवेतिबोध्यम्।पराशरेणशत्रुक्षे
त्रगतस्त्र्यंशमितिवदताभौमंविहायेतिनोक्तम्।तथालघुजातकसारावल्यादावपिनोक्तमेवंमतभेदेपराशरमत
मेवबहुसंमतत्वाद्दशायुष्याहृतमाचार्यैरित्यपिध्येयम्।अस्तम् इतेप्राप्तेग्रहेतेदायांशाद्विभक्ताःकार्याः।शनिशु
क्रावस्तंगतावप्यर्द्धंनापहरतः।अत्रत्र्यंशार्द्धहानिद्वयेप्राप्तेऽधिकार्द्धहानिरेवकार्यानहानिद्वयम्।अनेनहानिद्वये

 पिद्वितयंविधेयमित्यद्यतनोक्तंपरास्तम्।गर्गः।ध्रुवायहानिःकर्तव्याततोन्यासुबहुष्वपि॥प्राप्तास्वेकैवकर्तव्या
 यास्यासांसुमहत्तरा।यवनः।खेचरोजायतेयोऽर्द्धत्र्यंशयोरपहारकः॥आयुषःसंहरेदर्द्धंत्र्यंशंशुक्रशनैश्चरौ।ननुध्रु
वायहानिःकर्तव्येत्यादिगर्गवाक्यस्यांशायुःप्रकरणेपठितत्वादनेनांशायुष्येवसकृद्धानिरुक्तानपिण्डाद्यायुषि।
किंचानिष्कृष्टार्थप्रतिपादकैर्वराहश्रीधरश्रीपत्यादिभिराचार्यैःपिण्डाद्यायुर्दायेषुसकृद्धानिर्नाभिहिता।तस्माद्द्वितो
र्हानिद्वयेप्राप्तेऽधिकैकाहानिःस्यादितियदुक्तंतदयुक्तम्।नचाचार्यैकत्वंतुबहुघ्नतायामेकंतुयद्भूरितदेवकार्यमित्य
स्यास्यावसरेशत्रुक्षेत्रस्थोनीचस्थश्चयदाग्रहोभवत्यस्तंगतोवातदासकृदेवायहानिःकार्यानीचेतोऽर्द्धह्रसतीत्य
त्राप्यनुवर्तनीयम्।इतिभट्टोत्पलोक्तेःसकृद्गुणननियमनौपम्येनसकृद्धानिरपिस्वीक्रियतामितिवाच्यम्।त
थासतिनीचस्थेग्रहेशत्रुक्षेत्रगते स्तमितेवासकृदर्द्धहानिरेवस्यान्नत्र्यंश हानिर्नापिद्वितीयार्द्धहानिरितिप्र
सज्येत।तत्रयथाभवद्भिर्द्वीयांशसाधनेनैवनीचस्थत्वनिबन्धनामर्द्धहानिंविधायपश्चाच्छत्रुराशिस्थत्र्यंशहानि
रस्तङ्गतेऽर्द्धहानिर्वाक्रियतेतद्वदिहापित्र्यंशार्द्धहानिद्वितयेप्राप्ते विनिगमनाविरहाद्धानिद्वितयमपिस्यादि
तिसुन्दरोक्तएवपन्थानितान्तसुन्दरइतिप्रतिभाति॥अत्रवयंतुब्रूमः।खेचरोजायतइत्यादियवनमुनिवाक्येवि

शिष्यत्वं शहान्यस्तंगतत्वनिबन्धनार्द्धहान्योर्निर्णयस्योक्तत्वात्तद्धानिद्वयेप्राप्तेऽधिकार्द्धहानिरेवस्यान्नहानिद्वय
म्।नीचस्थत्वनिबन्धनार्द्धहानौप्राप्तायांतथारिभस्थितत्ववशात्तत्त्रैलिप्त किरणत्वाद्वापरहानौचप्राप्तायांसत्क
ह्वानिनिष्पापकत्वस्वाभावाद्धानिद्वयेनकिंचिद्बाधकम्।अतोहानिद्वयेत्राधिकैकेतिसर्वमवदातम्।खेचरोजा
यतद्वत्सपिवचनमंशायुर्विषयकमितिप्राञ्चः।तन्नचतुरस्रंप्रमाणाभावात्।केशवतःपरमप्राचीनेनभट्टोत्पले
ननेदंयवनवचनंदृष्टमतःकेशवदृष्टमिदंवचनंशककालप्राचीनयवनस्यनभवतीत्यप्याहुः।तदयुक्तम्।भट्टो
त्पलेनपराशरजातकंनदृष्टमस्माभिस्तुकिंचित्पराशरजातकंदृश्यतेतत्रभट्टोत्पलादृष्टत्वादिदंपराशरीयजात
कमेवनभवतीतिवक्तुंनशक्यम्।तस्मात्प्रामाणिकैःश्रीकेशवसांवत्सरैर्दृष्टंयवनवचनंभवत्येव।अथविति। अ 70
थोद्वृत्यानन्तर्ये। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः॥चक्रार्द्धहानिर्भवेत्।पूर्वानीतस्वकीयचक्रार्द्ध
हानिगुणेनदायांशायुर्गुणनीयादित्यर्थः॥अथादितउपपत्तिः॥बृहज्जातके।मययवनमणित्थशक्तिपूर्वैर्दिवसकरा
दिषुवत्सराःप्रदिष्टाः॥नवतिथिविषयाश्विभूतरुद्रादशसहितादशभिःस्वतुङ्गभेषु॥१॥नीचेतोऽर्द्धंह्रसतिहितत
श्चान्तरस्थेनुपातइति।उच्चेपठितमायुर्नीचेपठितमर्द्धमायुस्तस्मान्नीचादग्रतोवीगापिषड्राशिभिःपठितवर्षार्द्धस्यो

पच योभवतीतिनीचादग्निमाअर्वाचीनाश्चराशयः पठितवर्षार्द्धगुणाः षड्भक्ता अथवापठितवर्षगुणाद्द्वादशभक्ता:
फलं पठितवर्षार्द्धे योज्यं पिण्डायुःस्यात्। तत्रस्वोच्चोनेषड्भाधिके षड्भं संशोध्य शेषं नीचादग्निमराश्यादि तत्पठितवर्ष
गुणं द्वादशभक्तं फलं पठितवर्षगुणितषड्भस्य द्वादशभागात्मके पठितवर्षार्द्धे योज्यमितिनीचादग्निमराश्यादौ प्रा
गेवषड्भाशियोगायथास्थितं स्वोच्चोनमुच्चं षड्भाधिकं गृहीत्वायुः साधनेन कोपि विशेष इति बालोपि जानाति। अत:
स्वोच्चोनोच्चरोर्द्धभात्मकमधिको ग्राह्य इत्युपपन्नम्। षड्भात्से तु स्वोच्चोने तं षड्भाद्विशोध्य शेषं नीचादर्वाचीनराश्यादि
प्राग्वदिहापि प्रागेव षड्भयोगात्षड्भाल्पं द्वादशराशिभ्यो विशोध्य ग्राह्यमित्यपि युक्तम्। अस्य स्वोच्चोन षड्भाधिकग्र
हस्य राश्यादि पठितवर्षगुणं द्वादशभक्तं कार्यं तन्नाचार्येणां शाएवकृता अतस्तद्भागाः पठितवर्षगुणाभगणांशैर्भा
ज्या इत्युपपन्नम्। अत एव वक्ष्यते। दायांशाः स्वगुणैर्हताहि भगणांशा ३६० प्ताः समादि पिण्डायुरिति। त्र्यंशार्द्धहानि
वासनाहोरागममूलेव। अंशायुषि वक्रगतिग्रहस्य सबलत्वेनायुषस्त्रिगुणितत्वादिहापि सबलत्वान्नत्र्यंशहानि
रुचिता। अतो विनावक्रगमितिसाधु। सूर्येण यन्नुणास्तमितयोरपि शनिशुक्रयोर्वैराभिनिवेशेननैवायुर्हानिरित्य
पिसुष्ठूक्तम्। पूर्वोक्तं चिन्तयेत्सर्वमिति सारावल्यामुक्तत्वाच्चक्रार्द्धहानिः कार्येत्यपि सुष्ठूक्तम्। अत्रारिभ इति सामा

न्यतो निर्देशात्स्वाभाविकशत्रुरेव ग्राह्यो न तात्कालिकशत्रुः। यतस्तथा सति कदाचिदधिशत्रुरपि संभवति। तद्वशाव
पि प्राग्वद्धानिविशेषेण भाव्यं। हानिस्तु नाभिहिता तो यद्व्याख्यातं स्वाभाविकशत्रुभ इति तत्सर्वं समीचीनमेव। न चा
धिशत्रुरपि शत्रुर्भवत्येवेति तद्गृहेऽपि त्र्यंशहानिरिति वाच्यम्। अप्रयोजकत्वाद्बहूनामसंमतत्वाच्च॥ ॥अथ लग्ने क्रू
रे हानिमाह॥ ॥ दायांशाद्युसदां पृथक्तनुलवाद्विघ्नाः खषट्कस्तुद्धृता आप्त्योनास्तनुगे खले च यदि स
द्दृष्टेऽर्द्धं यापापरे॥ निघ्नो ग्रो दयभावजेन तनुगो ग्रै चेद्बलिष्ठस्य तत्साम्ये पुष्टफलेन नेति तनुपेऽस्मिन्नां
शजे सौक्रिया॥२२॥ द्युसदां ग्रहाणां दायांशा अनन्तरानीता यथाप्राप्तचक्रार्द्धहानिगुणितास्ते पृथक्स्थाप्याः। त
तो लग्नस्य राशीनपहायांशादिना गुण्याः षष्ट्यधिकशतत्रयेण भाज्याः आप्ता लब्धेनांशादिना पृथक्स्था हीनाः कार्याः। 7/
तनुगे लग्नगे खले क्रूरग्रहे सति। अत्र क्रूराः सूर्यभौमशनय एव। यत आह बादरायणः। सूर्याङ्गारशनीनामेकस्मिं
ल्लग्ने भवति हानिः। विधिना त्वनेन सौम्ये सितेऽदलं पातयेल्लब्धात्॥ लब्धाद्दलं लब्धस्यार्द्धं पातयेदित्यर्थः। आयुः पि
ण्डमिति शेषः। यदा शुभः क्रूरश्च द्वावेतौ लग्ने भवतस्तदापि क्रूराक्रान्तत्वनिबन्धना हानिः स्यादेव। यदाह पराशरः।
तिष्ठतः शुभपापौ चेत्पापोदयविधिः स्मृत इति। एतदर्थलाभार्थमेव चशब्दोपादानमत्रेति बोध्यम्। यदि लग्नस्य खलः

प्रे.म. सतश्शुभग्रहेणदृष्टस्तर्हिअर्द्धयाआघ्याउनाःकार्याः।अत्रशुभाश्चन्द्रबुधगुरुशुक्राः।अथापरइति।अथशब्दोम
७२ तान्तरसूचनार्थः।ग्रहाणांदायांशाउग्रोदयभावजेननिघ्नाआघ्याऊनाःकार्याः।उदयोलग्नंतदुदयभावात्तनु
भावात्स्थापसेतदुदयभावजमर्थात्फलम् ग्रस्योदयभावजंतेन लग्नवर्तिक्रूरस्यलग्नोत्पन्नारोहावरोहफ
लेनाप्तिर्गुणनीयेत्यर्थः।सौम्यदृष्टेतुलग्नगेक्रूरेउग्रोदयभावजेननिघ्नाईयाआघ्योनाःकार्याः।ननुयदिद्वित्राः
पापग्रहालग्नेस्युस्तदाकस्यभावफलेनगुणनीयेत्यतआह।तनुगोगनौवेद्बलिष्ठस्येति।षष्ठ्यंशमात्रबलेनाप्य
धिकबलशालिनइत्यर्थः तनौलग्नेगकृतस्तौतथातौचतावुग्नौचतनुगोगौ।अत्रद्वित्वंत्रित्वोपलक्षकं।बलसा
म्येविनिगमकाभावाद्द्व्यादिफलप्राप्तगुणनंनिषेधति।तत्साम्येपुष्टफलेनेत्यनेन।तत्साम्येपुष्टफलेनाधिका
रोहावरोहफलेनबलफलसाम्येतुद्व्यादिफलगुणनमर्थात्सिद्धम्।अपरेह्यानुगिरामकृत्सादय इतिवदन्ति।
त्यध्याहारः।एवमेकदेशिमतमनूद्यदूषयति।नेतीति।इतिउक्तंयत्परमतंतन्नरमणीयंनेत्यर्थः।लग्नगेक्रूरेल
ग्नेशेदृष्टेहानिःकार्यानवेत्याकाङ्क्षायामाह॥तनुपेस्मिन्निति।अस्मिन्लग्नगेक्रूरेतनुपेलग्नेशेसतिअसौहानिरू राम:
पाक्रियाकार्या।अन्यंविशेषमाह॥नांशजेसौक्रियेति।स्पष्टम्।असौक्रियेतिकाकाक्षिगोलकन्यायेनोभयत्रसंब ७२

ध्यते।यद्वा।नेतितनुपेस्मिन्नित्यत्रअस्मिन्लग्नगेक्रूरेतनुपेसतिअसौहानिर्नकार्येत्स्यपरेवदन्ती।विम्बास्त्वेय
म्।अत्रोपपत्तिः।बृहज्जातके।सार्द्धोदितोदितनवांशहतात्समस्ताद्भागोष्टयुक्तेयतसंख्यउपैतिनाशम्।क्रूरेविल
ग्नसहितेविधिनात्वनेनसौम्येक्षितेदलमतःप्रलयंप्रयाति।अर्द्धशब्दःखण्डवाचकस्ततोर्द्धेनखण्डेनोदितोर्द्धो
दितस्तेनसहवर्तमानाःसार्द्धोदिताःसावयवादित्यर्थः।सार्द्धोदिताउदिताश्चतेनवांशाश्चतेहेतात्।अत्रलग्नन
वांशेतित्यक्त्वोदितनवांशत्वमुपादानंलग्नस्यराशीन्विहायशेषभागानांकलाःशतद्वयेनभाज्यालब्धंसावयवनवां 72
शाइत्येतदर्थम्।उत्पलस्तु·लग्नराश्यादिकंलिप्तापिण्डीकृत्यशतद्वयेनभागमपहृत्याप्तंभचक्रस्यतावन्तो
नवांशाउदिताः।यश्चार्द्धोदितनवांशःसतत्रोदितनवांशसमूहेयोज्यः।एवंकृतेसार्द्धोदितोदितनवांशसमूहोभ
वतीतिभावस्यैव।तंन्यश्चैदेयम्।यस्मान्नारायणः।लग्नांशलिप्तिकाभिर्हतासुभोजिचक्रलिप्ताभिः।कल्याणवर्मा।ल
ग्नांशलिप्तिकाहतेत्यादि।श्रीधरः।लिप्तीकृतैर्लग्नभागैर्दायान्हन्यादिति।गुणाकरोपि।लग्नस्यखलखेचरैस्तनुल
वाश्चमौकसामिति।दामोदरः।क्रूरापहानिश्चततोत्रराशीन्विहायलग्नस्यलवादिकेनेति।आदित्यशर्मा·एषकस्य
खेटायुस्तनुलवहतमिति।विश्वनाथोपि।तनुगखलेखेटदाया·एषकन्वंशादिघ्नाइत्यादि।अत्रस[illegible]पर्यायप

ग्रो॰म॰ द्पर्यन्तधावनस्यलग्नराशीन्विहायांशाग्राह्याइत्यत्रैवतात्पर्यम्।अन्यथालग्नलिप्तिकाअपिहेलेत्याद्युक्तंस्यात्।अत
७२ एवक्तेनोक्तमन्येत्वेवंमाचस्वइत्यादिनेतदपिसमूलमित्यन्तेन।यत्तु।कुम्भलग्नस्याद्यांशकउदयेआदित्यचन्द्रशु
क्राःपरमोच्चेबुधजीवशनैश्चराःपरमनीचेभौमश्चकुम्भेष्टाविंशतिभागइत्यस्मिन्नुदाहरणेलग्नस्यभुक्तनवांशभू
यस्त्वेनपापग्रहभौमसंबन्धनिबन्धनहान्यभावेपियदृच्छयाहानिर्ग्रहाणामुदीयेष्वुक्तत्वात्सार्द्धपञ्चदशवर्षतुल्यम
शाभ्यऊर्ध्वंविंशतेरधस्तादायुरानीयचविंशतेरधस्तादायुर्नस्यादितिवराहोक्तमयुक्तमित्युक्तं तदप्ययुक्तमितिबोध्य
म्।चक्रस्योदितनवांशाग्राह्याइत्यस्मिन्पक्षेपिलग्नस्यदशराशयइतिनवतिनवांशाभुक्तास्तस्मादेकनवतिनवां
शाभुक्ताइत्युक्तंतदप्यसंगतम्।लग्नगतनवमांशस्यभुक्तत्वात्।तस्मान्नायुर्विंशतेःस्यादधस्तादितियुक्तमुक्तंवरा
हमिहिराचार्यैः।यद्वा।विंशतेरधस्तादायुरुदाहरणान्तरेभवतुनास्माकमत्राग्रहस्तथापिभट्टोत्पलप्रदर्शितविंशत्य
ल्पायुर्दायोदाहरणमसदेवेतिब्रूमः।किंच।वक्रितःपुनःशत्रुक्षेत्रगतोपिनापहरति।एतद्बहूनांमतमितिपूर्वमुक्तंप
श्चादङ्गारकस्यशत्रुक्षेत्रगतस्यापिनपततीत्यभिहितमतःपूर्वापरग्रन्थविरोधोपिदूषणम्।यदपिचोक्तम्।परमोच्च रामः
गतानांपरमनीचगतानांचशत्रुक्षेत्रस्थत्वात्र्यंशोस्तगतानामर्द्धंचनपात्यते।यतोनिमिषपरमांशकेविलग्नइत्यत्र ७२

षस्थस्य चन्द्रस्य शत्रुक्षेत्रस्थत्वेन त्र्यंशहानौ कृतायां परमायुर्न प्राप्नोतीति। तदपि मन्दम्। यवनमतेन शुक्रस्य चन्द्र
शत्रुत्वेऽपि सत्यादिमते न स्वाभाविकतत्कालमित्रामित्रप्रकाराभ्यां सममित्रत्वोपलम्भेन त्र्यंशहानेरप्राप्तत्वेन तन्निषे
धस्यान्याय्यत्वात्॥ किंच तत्कालजशत्रुगेहे त्र्यंशहानिवादिमते शुक्रस्य यवनप्रकारेण चन्द्रस्वाभाविकशत्रुत्वेन तत्का
लमित्रत्वेन च समत्वात् त्र्यंशहानिकथनमयुक्तम्। ननु सत्ययवनमतयोर्विरोधे किं ज्यायः। उच्यते। बहुसंमतत्वा
त्सत्याचार्यमतमेव प्रमाणमिति। एवमादि भट्टोत्पलेनासङ्गतमुक्तमित्यास्तां तावत्॥ ॥ प्रकृतमनुसरामः॥ ॥ ल
ग्नप्रान्ते ग्रहायुर्द्वादशांशतुल्या परमा हानिर्लग्नादौ तु हान्यभावस्तत्र नवांशानामपि परमत्वाभावादतो नवांशे
भ्यः साधनमुचितं हान्याः। तत्र नवांशानयनार्थमनुपातः। यदि कलानां द्विशत्या २०० एकोनवमांशस्तदेष्टविरा
शिलग्नकलाभिः किमिति। अन्योऽप्यनुपातः। यदि नवभिर्नवमांशैरायुर्द्वादशांशतुल्योपचयस्तदेष्टनवांशैः कि 70
मिति। अनन्तरोदीरितत्रैराशिके द्वादशनवघातं हरं १०८ कृत्वाष्टयुक्तशतसंख्यो भागो हीयत इति सम्यगुक्तम
त्र भगवद्वराहमिहिराचार्यैः। एनमपि हरं १०८ द्विशत्या संगुण्य निष्पन्नचक्रकलातुल्यहरेण २१६०० युर्दी
पं लग्नांशकलाहतं भजेदिति बादरायणकल्याणवर्मश्रीपत्यादिभिरपि युक्तमुक्तम्। श्रीकेशवसंवत्सरे स्तु

प्री·म· नूनेरेकलास्थानेंशागृहीतास्तथाचक्रकलास्थानेचक्रांशागृहीताअतोयदुक्तंतत्सम्यगेव। श्रीपत्यादिभि
७४ र्दायांशजनितवर्षाणामुपचयएषह्रासोभिहितोत्रतुतद्देतोरितिन्यायेनदायांशानामेवह्रासोविहितइतियुक्तमु
त्पश्यामः। अंशह्रासोदायांशेभ्योविशोध्यास्तआस्तेनान्नतिसाधु। सद्दृष्टेद्दूयेत्यत्रागमएवप्रमाणम्। अथपरमतव
सनोच्यते॥ उग्रग्रहस्यलग्नभावफलेसंपूर्णेप्रोक्तहानितुल्याहानिर्भावफलाभावेहान्यभावः। अन्तरान्त्रैराशि
केनहानिसाधनंन्याय्यंतत्रत्रैराशिकम्। रूपमितेनसंपूर्णेनक्रूरलग्नभावफलेनप्रोक्ताहानिर्लभ्यतेतदेष्टे
नकिमित्युग्रोदयभाव ज्ञेननिष्पन्नमित्युपपन्नम्। अतएवोक्तंरत्नावल्याम्। संस्कारएवमुदितोग्रहजीवितांशसं
शोधनेपरमभावफलानुसारम्॥ उक्तात्पकेसतिचभावफलेनुपातादूह्योबुधैर्विधिरसाविहयुक्तियुक्तः॥१॥ ने
त्युक्तंमन्यामहे। गर्गपराशरबादरायणाद्यनुक्तत्वाद्वराहाद्याचार्यैरनुक्तत्वाच्च। किंचयद्येवंयुक्तिबलात्स्वीक्रियते
ततदालग्नगक्रूरंप्रतिशुभस्यसंपूर्णादृष्टौभावफलगुणितलब्धेर्दलंशोध्यंन्यूनदृष्टौतदृष्टिगुणितभावफलघ्नल
ब्धेर्दलंशोध्यंद्वयोःशुभयोर्दृष्टौबलवद्ग्रहदृग्गुणितंतद्दलंशोध्यंबलसाम्येधिकदृष्टिगुणंतद्दलंहेयमित्याद्यतिप्र रामः
सङ्गोभूयानापद्येत। तस्माद्यत्किंचिदिति॥ ॥ अथयोगेभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृत्तिरि ७४

तिस्वामियोगस्यशुभत्वाभिधायकत्वात्सनहानिकरोभवतीतिलग्नगेक्रूरेलग्नेशेप्यसौहानिःकार्येतियतव्या
ख्यातंतन्नविचारपदवीमारोढुमर्हतीति। अत्राहुः॥ योयोभावइतिवाक्येभिन्नविषयकेसत्यपियदिहानिर्नस्वी
क्रियतेतदासिंहराशिपस्तावपिरवौसिंहस्थेषराद्याद्युक्तंनिशान्धत्वंदत्तजलाञ्जलिस्यात्। तत्रयथासिंहसंस्थे
निशान्धइतिवाक्येननिशान्धत्वंदुष्परिहरंतद्वदिहापिलग्नगेक्रूरेलग्नपतावपिवाक्याद्दियंहानिर्दुष्परिहरैव
किंचैवंयुक्तिसंचारेक्रूरेसौम्येचग्रहेलग्नस्थेसाम्यादेषाहानिर्नस्यात्। अपिचलग्नस्थेक्रूरेशुभदृष्टेपापदृष्टेचशु
भाशुभत्वसाम्यात्संपूर्णैवहानिःस्यान्नतदर्धहानिरित्यादिकोभूयानतिप्रसङ्गःप्रसज्येतेति॥ वस्तुतस्तुलग्नेक्रू 74
रेयद्येषांलग्नायुष्येवहानिरुक्तास्यात्तदातस्मिन्नपिसेऽपियोयोभावइतिवाक्यबलाद्धान्यभावोपिस्यात्। बृहज्जात
केसार्द्धोदितोदितनवांशहतेत्यादिवाक्यस्यमहायुर्हानिप्रकरणेपठितत्वात्सात्रबल्यांविहगायुषेतिव्यक्तमुक्त
त्वाच्चक्रार्धहरेणापिलग्नवर्षादिकंयोज्यंग्रहाणांतन्निजायुषीत्युक्तत्वाच्चग्रहायुष्येवासंहारोनलग्नायुषीतिलग्न
गेक्रूरेलग्नपतावपिलग्नायुर्हानिकरणेनकिंचिद्बाधकमितिस्वामियोगस्यशुभत्ववादिभिःपरैरप्यवश्यमास्थेय
म्। यत्पराशरहोरायामपिहानिःकार्येत्येवोक्तमतोयदुक्तमाचार्येणतन्नुपेक्ष्यमिन्नसौक्तियेतितदार्षशास्त्रसंमतंयुक्ति

प्री.म. प्युक्तं च। अतएव सुन्दरसिंहैरप्येवमेवोक्तम्। क्रूरेतरग्रहेऽपि मते वहानिरिति यत्सत्याचार्यैरिष्टं तदयुक्तम्। अस्यात् शार्ङ्गधरव्याख्यानं त
७५ त्सैरेकदोषात्पतितमित्यादिगातिशिन्त्या। क्रूरोदयेऽप्योपचयः सनात्रांशायुषीत्युक्तत्वात्तांशजे सैतोक्तिमेतिसर्वमवदा
त म। यत्तु श्रीपतिपद्धतिटीकायामंशायुर्दायस्तु लग्नबलाधिकत्वादेवोत्पद्यते तत्र क्रूरयोगाद्धानिर्युक्तैवेति वास
नावदत्ता सम्बैर्णांशायुष्येषाह्रानिरिति स्वीकृतं तदनेनपरास्तम्। यदपि च वासनानभिज्ञतया चक्रकलाभिरायुर्दायो
लभ्यते तत्तल्लग्नकलाभिः किमित्यभिधायि तदप्यसदेवेति बोध्यम्॥ एवं दायांशानभिधायाधुना पिण्डनिसर्गजीवश
र्मायुर्दायानयनमाह॥ ॥ गोब्ध्यास्तत्त्वतिथिप्रभाकरतिथिस्वर्गानखाः पैण्डजे नैसर्गे नखभूद्विगोधृति
नखाः पञ्चाशदर्का द्युणाः। दायांशाः स्वगुणैर्हताद्विभगणांशाप्त्या समाद्यायुषी स्वर्गाप्ताश्वसमादि जैवमि
ह त्वांशैर्घटीमन्वितम्॥ २३॥ अर्कादितिलघ्वी पेपञ्चमी। अर्कमारभ्येत्यर्थः॥ अत्र समादिपूर्वोक्तरीत्याग्र
ह्यम्। शेषं स्पष्टम्। स्वर्गाप्तादिति। सर्वेषां ग्रहाणां दायांशा एकविंशत्याभक्ता लब्धं वर्षादि जीवशर्माचार्यमते आयुः स्या
त्। बहुत्वादिदायांशेभ्योऽष्टभक्तेभ्यो लब्धघटीमुखेन युक्तं कार्यमित्यर्थः। पिण्डायुर्वर्षादिसाधनोपपत्तिः प्रागुक्ता। नै राम:
सर्गिकेऽपि दायांशवर्षाद्यानयनयुक्तिः सैव। एवमेव प्रकृतेऽप्ये जीवशर्मोक्त चन्द्रज इति सारावल्यामुक्ते श्चक्राईहा ७५

न्याद्दिकमत्रापिकार्यमित्युपपन्नम्।अथजैवे युक्तिः।जीवशर्मा।सप्तद्दशैकोद्वियमावसवोवेदाग्नयोग्रहेन्द्राण
मावर्षाण्युच्चस्थानानीचस्थानामतोर्द्धंच।मध्येत्वनुपातात्स्यादानयनंशेषमत्रयत्किंचित्।पिण्डायुष एवका
र्यंतत्सर्वंगणितनष्टैरिति॥अतस्तएवहानिसंस्कृतादायांशाअत्रापिग्राह्याइत्युपपन्नम्।उच्चस्थेद्युचरेदा
यांशाभगणांशमिताः।अतःपरमंपरमायुरंशास्तुल्यंपरमायुस्तुसपञ्चदिनंविंशत्यधिकवर्षशतम्।
१२०।०।५।०।० अत्रपञ्चदिनानित्यक्त्वाशेषमायुः १२० परमायुष्ट्वेनतावद्गतम्।अतोनुपातः॥यदिभगणांशमि
तैर्दायांशैः ३६० परमायुःसप्तमांशा १२० तुल्यमायुस्तदेष्टैः किमिति।अत्रहरघातोहरः २५२० गुणाः १२० एतो
गुणेनापवर्त्यप्राप्तएकविंशतिर्हरे २१ अतोदायांशाः स्वर्गाप्तावर्षादिजैवमायुरित्युपपन्नम्।अथपञ्चदिनेभ्य
आयुःसाधनार्थमन्योनुपातः।यदिभगणांशैः ३६० पञ्चसप्तमांशा ५/७ आयुस्तदेष्टैः किंलब्धंदिनादिभवति। त
त्रयत्सादेफलानयनार्थमन्योपिषष्टिर्गुणः ६०॥एवमत्रगुणघातोगुणः ३०० हरघातोहरः २५२० गुणहरौगुणे
नापवर्त्यहरेकिंचिदधिकाअष्टौलभ्यन्तेतत्रस्वल्पान्तरत्वादष्टैवोपात्तास्तेनेभहृदित्याद्युपपन्नम्।अतैवयु
क्त्याहरौपवर्त्यलवतःशरघ्नाद्विवेदभागाप्तघटीभिराद्यमितिमिश्रैरपिसुष्ठूक्तम्।अथसङ्कातश्रीपतिकल्प 75

म. क्रारस्यासन्नोच्यते। तत्र परमायुर्वर्षाणि १२० एषु पञ्च दिनान्येक वर्षद्विसप्तत्यंशात्मिकानि १/७२ समच्छेदविधिना सं
१० योज्य जातं परमायुः। ८६४१ अस्य सप्तमांशोयम्। ८६४१/५०४ अथ भगणांशमिते दीर्घांशेरेतावदायु ८६४१/५०४ स्तदेष्टैः
किमिति। अत्र दिनादि फलानयनाय पुनर्भगणांशगुणे केस्तुल्यगुणहारयोरपगमे ग्रहः स्वोच्चहीनेः स चेत्षड्भ ही
नो भचक्राद्विशोध्यषभागीकृतः सन्॥ कुवेदर्तुनं गैहै ॥ वेदखाक्षैर्विभक्तोदिनाद्यं भवत्येवमायुरिति प्रकारोनि
ष्पद्यते। एकदेशिनस्तूच्चस्य ग्रहे शून्यमिते तस्य च ग्रहान्तरं स्यात्तदानीमेव परमायुरंशा मितमायुर्भवति यदोच्च
ग्रहान्तरं शून्याधिकं स्यात्तदानुपातः। यदि शून्यमितैरन्तरांशैः परमायुषां शोलभ्यते तदेष्टग्रहोच्चान्तरभागैः कि
मिति त्रैराशिकेन यास्तं व्याख्यां वर्णयन्ति॥ ॥ श्रीमच्छिवगुरुचरणान्प्रणम्य राशेः खहरत्वेन फलानन्त्यादेत द
नुकमेवेति यद्यं कुर्वमस्तदिदं सोविदांकुर्वन्तु न च शून्यस्य सहहरघाते सर्वैव भवन्तीति न खहरत्वमिति वाच्यम्।
खगुणः खमिति पाटीगणितोक्तेः। तस्मादपठितपाटीगणितेन सूर्येण यदुक्तं तत्पाटीगणितानभिज्ञतया यष्टिसाधनं भा
स्करोक्तं विषुवद्दिवसे व्यभिचरतीति सुन्दरसिद्धान्ते ज्ञानराजोक्तिवत्तत्याज्यमेयम्। यद्प्यायुष्मता शून्यमितैरन्तरांशैर्वि | रामः
र्शादिपरमायुरंशोलभ्यते तदेष्टैः किमिति त्रैराशिकेण फलं दिनाद्यं भवतीत्युक्तं तदपि फलमन्यजातिमध्ये तदितिपा | ७६

टीगणितोऽस्मिन्नादृतेति बोध्यम्। वस्तुतस्तु दिनादिकमेव फलं मायाति परं तत्र हेतुरपर इति बहूक्तमित्युपरम्यते। अथै
तेषु सिद्धेषु पिण्डाद्यायुष्षु लग्नायुरानयनमाह॥ ॥ स्वाल्लिप्ताः खनखोद्धृता विभतनो वर्षादि पैण्डान्त्रिके
लग्नायुः॥ ॥ विभतमाः विराशिलग्नस्यांशेषमुत्तानम्। अत्रोपपत्तिः। बृहज्जातके। होरास्वांशप्रतिममायुः प्रय
च्छतीति पिण्डायुः प्रकरणेऽभिहितत्वाल्लग्नभुक्तनवांशतुल्यमायुः सिद्धम्। ततोऽनुपातः। आभिः कलाभिः २०० चेदेको
नवांशस्तदेष्टविराशिलग्नलिप्ताभिः कतीति नवांशा भवेयुः॥ एकेन नवांशेनैकं वर्षं तदेभिर्नवांशैः कियन्तीति नवां
शसमान्येवायुर्वर्षाणीत्युपपन्नम्। पिण्डायुर्वदेवांशायुर्जीवशर्मोक्तेः कर्तव्य इत्युक्तेस्तत्राप्येतदेवायुरिति युक्तम्। न
न्वंशायुषि पिण्डायुषि चांशप्रतिमं लग्नायुरिति सर्वैर्जातककृद्भिरुक्तमस्ति। आचार्योक्तप्रकारेण त्वंशायुषि लग्ना 76
युः परमं द्वादशवर्षतुल्यं पिण्डायुषि परमं नववर्षतुल्यमागच्छति तत्र को हेतुरिति चेत्। शृणु तर्हि। पिण्डायुषि होरा
स्वांशप्रतिममायुर्ददातीत्युक्तं तत्र नवैव नवांशा इति परमं लग्नायुर्नवैव वर्षाणि। अंशायुर्दाये तु किल त्रभांशप्रति
मं ददातीत्यभिहितं तत्र भपदोपादानस्येदं तात्पर्यं लग्नं यस्य राशेर्नवमांशे वर्तते स राशिर्मेषादेर्यावत्संख्यो भवति
तावन्तोंऽशा आयुर्दद्यादिति। अतोंऽशायुषि परमं लग्नायुर्द्वादश वर्षाणीति सिद्धम्। अंशायुषि वीर्यान्वितराशिसमं वायुः प्रय

न्हन्तीरः सर्वैरुक्तं पिण्डायायुर्दाये युक्तकेनापिप्रामाणिकेन तथानोक्तं केनचिदेकदेशिनोक्तं तन्मतभेदेऽत्र बहुसंमतत्वादंशतुल्यमेवायुर्गिनि पूर्वमतं साधु। अत एवाह॥ ।निखिलैस्तदंशकसमं कैश्चिद्दुतुल्यं स्मृतम्॥ ॥स्पष्टमात्रयाः श्रीपतिः। आयुस्थ्ये तेषु बलाढ्यलग्नेविहाय राशीन्कृतलिप्तिके त्रा भक्तेद्विशत्या फलमब्दपूर्वं यत्स्यात्तल्लग्नायुः स्ततयोज्यम॥१॥ एतेषु पिण्डादिकुआयुःषु। अबलं वार्थाद्बलेन तल्लग्नं तस्मिन्। अबले बलाढ्ये कालनइत्यर्थः। लग्नस्य राशीन्विहाय शेषभागानां कलाः कृत्वाद्वाविंशत्याह तालब्धमब्दादि यत्तल्लग्नायुः षिलग्नायुर्निमितं योज्यं संग्राह्यमित्यर्थः। चमेमपि हीपिनहम्नीविवलग्नायुषीति निमित्तसप्तमी। आयुष्षयाप्येषु बलाढ्यलग्नइति पाठःपिशब्दोभिन्नक्रमस्तेन बलाढ्यलग्नेपि। अबलेबलवत्यपि वा लग्नेइत्यर्थः। बलाढ्यलग्नेपीति कथनमर्शापूर्वलग्नेबलवत्यपि किं विलग्नायुषि नसेप्यमित्येतदर्थमिति निर्मिनैः सम्यगुक्तम्। सूर्यज्योतिषिकेस्तु आयुस्तथ्ये तेषु बलेषु लग्नेइति पाठः कल्पितः। नचासौयुक्तः। बलवति लग्नेस्य स्यायुरनिर्देशेन्यूनता दोषप्रसङ्गात्॥ केचित्त्वायुस्तथ्येतेषु बलाढ्यलग्नेइति पठित्वा तथैवायुः साध्यं राशितुल्यवर्षयोज्यमित्यर्थः। बलवति लग्ने सतीतिव्याचक्षते तदपिनचतुरस्रम्। दुर्बले लग्ने राशितुल्यवर्षयोगेनार्षशास्त्रविरोधाद्बलेत्वायुषोनुक्तत्वान्न्यूनतादोषतादवस्थ्याच्च॥ अथपरमतम्॥ ।यस्यांशोधिबलस्तदेवहिपरैः॥ ॥यद्यंशेशोबली तदंशातुल्यं लग्नायुर्यदि राश्यधिपोबल

वांस्तदा राशितुल्यमिति परैः कल्याणवर्मगुणाकरादिभिरुक्तं राशिनवांशनाथयोर्बलिनोः सतो राशितुल्याब्दयु
क्तं लग्नांशायुः कार्यमित्यर्थत एव सिद्धम्॥ अन्यदप्याह॥ ॥ तेनाद्यमन्ये यदंशायुर्वत्तु॥ ॥ अंशैः समम्मा
युरंशायुषा तुल्यमंशायुर्वत् तेन तुल्यमित्यादिनावतिप्रत्ययः। यल्लग्नायुः स्याल्लिप्ताः खनखोद्धृता इत्यादिप्र
कारानीतं तत्तेन राशिनाथे बलोपेते राशितुल्यं पुष्टफलं कार्यमंशेशबलिन्यंशसमेन प्रयुक्तं कार्यं द्विगुणं कार्य
मिति यावत्॥ एवमन्येमुक्तं सिद्धान्तमाह॥ ॥ अथ चांशतुल्यमखिलोक्तं ग्राह्यमेवादिमम्॥ २४ ॥ अ
त्रैवकारो भिन्नक्रमस्तेनाखिलोक्तमंशतुल्यमादिममेव ग्राह्यमित्यर्थः॥ अथैषां चतुर्णामायुषामवस्थामाह ॥ ॥ अंशा
युष्मतनाविनोधिकबलेपिण्डं निसर्गं विधोस्य च तुल्यबलं द्वयोर्युतिदलं तज्जायुषोश्चैत्रयः। स्वायूंषि त्रि 77
बलैर्निहत्य पृथगतिर्वीर्यैक्यहृद्धानिजायुर्युत्या त्रिनवोपजेवमुदितं चेद्धीनवीर्यास्त्रयः॥ २५॥ अत्राधिक
बलदस्यत्रलिङ्ग विपरिणामेनाधिकबलाणामिति तनुविशेषणं बोद्धव्यम्। स्त्रियां मूर्तिस्तनुस्तनूरित्यभिधानेन त
नुशब्दस्य स्त्रीलिङ्गत्वात्। षड्रूपाधिकं षड्बलैक्यं यस्य सोऽधिकबलस्तत्र लग्नेधिकबले शायुः स ध्यंसूर्येधिकबले पिण्डा
युश्चन्द्रे नैसर्गिकं साध्यम्। चेल्लग्नार्कचन्द्रास्त्रयोपि हीनवीर्यास्त्रिरूपाल्पबलास्तदा जीवशर्मोदितं साध्यः। यस्मिन्

प्रै॰म॰ रूपाधिकं षड्रूपाल्पबलं समध्यबलस्तत्र लग्नेमध्यबलेंशायुः सूर्ये पैण्डं चन्द्रे निसर्गजं साध्यम्॥ अथ मिश्रायुः संभव
७३ तोन पृथक्कृतत्साधनमाह। स्याद्वेदिति। अस्यायं तात्पर्यार्थः। यदि लग्नार्कचन्द्रास्त्रयोपि षड्रूपाधिकबलाः यद्वा त्रयो
पि मध्यबलास्तदा चलग्नबलेन दिनादिकमंशायुः संगुण्य सूर्यबलेन पिण्डायुः संगुण्य चन्द्रबलेन निसर्गायुः संगुण्ये
षां योगं लग्नार्कचन्द्रबलानां योगेन भजेल्लब्धं वर्षादिस्फुटं मिश्रायुर्भवतीत्ययं मुख्यः। अथवांशपैण्ड निसर्गायुर्योगस्य
तृतीयांशोमिश्रायुः स्यात्। अथ यदि द्वौ षड्रूपाधिकबलौ यद्वा त्रयाणामपि षड्रूपाधिकबलाभावे द्वौ मध्यबलौ तदा त
त्तदायुस्तत्तद्बलेन संगुण्यानयोर्योगं द्वयोर्द्वयोर्बलयोगेन भजेल्लब्धं स्पष्टं मिश्रायुः। मुख्यः पक्षोयम्। यद्वा तस्तदा
युषोर्योगस्यार्द्धं मिश्रायुः स्यात्। अत्रोपपत्तिः। सा एवं यथा। अंशोद्भवं विलग्नात्पैण्डं भानोर्निसर्गजं चन्द्रात्॥ एते
षां योबलवानेकतमं तस्य चिन्तयेदायुः॥ लग्नाद्येष्वर्कचन्द्रास्त्रयोपि बलरिक्ततां यदा यान्ति। परमायुषः स्वरांशं
ददतिखगाजीववर्ग्योक्तम्। अतो यदुक्तं तद्युक्तम्। अथ यदि द्वौ रूपाधिकबलौ मध्यबलौ वा तदा तत्तद्बलवशादायु
र्द्वयप्राप्तौ सत्यां विनिगमकाभावादेकतरायुरवलम्बोनकर्तुमुचितद्वयायुर्द्वयमयोगार्द्धं ग्राह्यमिति पर्यवसितम्। रामः
परं तत्तद्बलवशत्वात्प्राप्तिरितिद्वयोर्बलयोरेकाकारतायां तत्तदायुषोर्द्धमयुक्तं विलक्षणयोर्द्वयोर्बलयोरेकाकारतायां ७८

गार्द्धे विश्रान्ता तत्रानुपातः। यदि बलद्वययोगार्द्धेनैतदायुषोर्द्धं लभ्यते तदायुः प्रापकैतद्बलेन किमित्यत्र हरसंछेदां-
शयोः परिवर्तनाद्द्वयं गुणो द्वयं हरोऽस्त्येवेति तुल्यत्वाद् द्वयस्य नाशे कृते एतदायुष एतद्बलं गुणो बलद्वययोगो भाजकः। ए-
वमेव द्वितीयायुर्दायेऽपि तद्बलं गुणो बलद्वययोगो भाजकः। एवं भाजकयोरैक्ये तत्तदायुस्तत्तद्बलेन संगुण्य योगं बलैक्ये-
न भजेल्लब्धं मिश्रायुर्भवतीत्युपपन्नम्। एवं त्रिष्वपि [illegible]न्यूनाधिकबलेषु मध्यबलेषु वोपपत्तिर्वेद्या। अत्र यत्तुल्यबलादूत्व-
त्र विषष्ट्यंशपर्यन्तं बलसमत्वं विवक्षितमिति केचिदुक्तं तदसङ्गतम्। यतस्तादृशतुल्यबलत्वे प्रकारद्वयसा-
धितमिश्रायुषस्तुल्यत्वोपलम्भेन लाघवात्त्रिजायुर्योगस्यार्द्धमेवोक्तं स्यात्। तस्माद्धीनत्वं मध्यत्वमुत्तमत्वमा-
दायतुल्याधिकत्वेऽप्येवं समीचीनमिति मन्तव्यम्। किंच पराशरेण त्रिजायुर्योगस्य चतुर्थांशं विहायैव मिश्रायुरुक्तम्।
आयुश्च परमं हत्वा स्वेन स्वेन बलेन च। विभजेद्बलयोगेन ग्रहाणां दायमेव सदृति। तस्माद्विषष्ट्यंशपर्यन्तबलसाम्यं
ग्राह्यमिति पक्षो न युक्तः। यत्तु द्व्यायुर्योगार्द्धं त्र्यायुस्तुर्यांशो वा कार्यस्तत् श्रीधराचार्यसंमतमिश्रायुरिति श्रीपतिनो-
क्तं तदशुद्धम्। यत आह श्रीधराचार्यः। अंशायुर्लग्नवीर्येण पैण्डं भानोर्निसर्गजम्। हन्याच्चान्द्रेण सर्वाणि त्र्यंशोऽज्यैक्यं त्रभ-
[illegible]लग्नार्कचन्द्रवीर्याणां संयोगेन स्फुटं फलम्। वर्षादिकं भवेदायुः श्रीधराचार्यसंमतमिति॥ अथ [illegible]नवसप्त[illegible]

ग्री॰ म॰ दिलसूर्णतेषांशायुरेवबहुसंमतत्वाद्ग्राह्यं तथेदन्यः केषांघटतइतिवदति॥ ॥ अल्पेंऽशेनवजीवलोषडपि
८६ केवीर्योग्रहश्चोदये भिन्नंस्वस्वमतेस्मृतायुरितियत्प्रोक्तंत्तेर्यवस्थापितम्। अंशायुर्बहुसंमतेन्चक्तिग्रसस्यं
चसत्योदितंस्याद्दुर्मोष्टसुशीलपथ्यसुभुजांनस्यादिदंपापिनाम्॥ २६॥ अधिकेषडल्पेबलेग्रहोलग्नंवामध्य
बलमित्यर्थात्सिद्धमाशेषं विरोहितार्थमाख्यातंचस्वकृतटीकायामाचार्यैः। अत्रोपपत्तिः। षडेवबलानिसन्तीतिप्रत्ये
कंयदिसंपूर्णत्वमेकंरूपंबलंग्रहस्यतेतदाषड्रूपाणिभवन्तीतिषड्रूपबलवान्प्रत्येकंसंपूर्णबलोपपन्नोबलीयुक्तएवाष
ड्रूपादधःसंनिहितंमध्यबलंषड्रूपाणामधःसंनिध्यंत्वहीनत्मकत्रिरूपपर्यन्तम्॥ मध्यबलाधःसंनिहितंत्रिरूपाल्पही
नबलमितियुक्तमेव॥ अथशिष्यभ्रान्तिनिरासार्थमाह॥ ॥ हानिर्यास्तमितेरिभेप्यनुमतांशोत्थेयबुद्ध्यानत
द्यसौविष्टिकआयुर्येस्तिनिखिलैःपिण्डादिभूक्तातत:॥ आयुःसौरमिदंयतोब्दगणनासौरात्ततःसूरिभिः
प्रोक्तंसत्यमसद्यदल्पकथितंनाक्षत्रकंसावनम्॥ २७॥ केनचिदाचार्येणअस्तमितेरिभेयाहानिरर्द्धमेतत्पु
स्यांशोत्थेआयुर्दायेअल्पासौबुद्धिकृतयाहेतुभूतयाअनुमतास्वीकृतानतदितितन्मतंनसमीचीनमित्यर्थः। अत्र ग॰ भ॰
बुद्धेतिकरणेतृतीया। शेषमाकरेस्पष्टम्। एवंमनुष्यायुर्विधिवद्यवस्थाप्याधुनातत्परमायुरन्यप्राणिनांपरमायुःपुरः ७८

सर्वमायुर्दायानयनं चाह ॥ ॥ पञ्चाहं मरवभूसमा १२००५ नकरिणां व्याघ्राद्यजादेर्नृपा १६ गोःकालो
श्वजिना २४ स्तथोष्ट्रखरयोस्तत्वानि २५ सूर्याः १२ शुनाम् । अम्बायुः परमं रदा ३२ नवदिहानीयायुरेषां
परायुर्निघ्नं नृपरायुषा च विहृतं तेषां स्फुटायुर्भवेत् ॥ २८ ॥ एतद्व्याकारे स्फुटम् । उपपत्तिस्तु यदि मनुष्यप
रायु १२००५ षा प्रमाणीभूतेनेदमानीतं मनुष्यं वदश्वरष्ट्रादीनामवाप्यते तदा स्वस्वपरायुषा किमित्यनुपातेन सु
गमा ॥ ॥ सवासनाया समकारि वृत्तिर्दिवाकरेणामलकेशवोक्तेः ॥ सलग्नखेटायुष एष तत्र दायाधिकारः परिपूर्ति
मागात् ॥ ५ ॥ इति दिवाकरप्रणीतायां केशवपद्धतिटीकायां प्रौढमनोरमाभिधायामायुर्दायाध्यायः पञ्चमः ॥ ॥ अ
थ दशाध्याय आरभ्यते तत्रादौ दशास्वरूपं तच्छुभाशुभफलं चाह ॥ ॥ यस्यायुर्य्य दसौ दशास्य च शुभेष्टोच्च 79
स्वभांशे तथारोहीनीचपरिच्युतस्य यदि सा कष्टारिनीचांशभे ॥ त्यक्तोच्चेत्वव रोहिणी भवति सामध्या
च्चमित्रस्वभांशे सदृष्टियुतस्फुरत्करबलिष्ठेष्टाधिके स्याच्छुभा ॥ २९ ॥ यस्य ग्रहस्य यदायुरसौ अस्य दशा
स्यात् ॥ अत्रादसशब्दस्य विधीयमानलिङ्गता शैत्यं हि यत्ता प्रकृतिर्जलस्येत्यादौ प्रसिद्धा । देवयुगसहस्रे द्वे आद्याः कृ
तौ ह्युतौ नृणामित्यस्य व्याख्यावसरे लिखितं चक्षारस्वामिना । सर्वनाम्नो विधीयमानानूषम नलिङ्ग ग्रहणे कामचारः

हो.म. टि। दृष्टोच्चस्वभांशेवर्तमानस्यग्रहस्यदशाशुभास्यात्।भंचांशश्चभांशम्।दृष्टश्चउच्चंचस्वश्चतेषांभांशास्तस्मिन्।पित्र्यस्ये
८० च्चस्यवास्वस्यवाराशौनवांशेवातिष्ठतोग्रहस्यदशाशुभास्यादित्यर्थः।नीचपरिच्युतस्यदशारोहास्यात्॥ यदिनीचपरिच्यु
तोग्रहः अरेः शत्रोर्नीचस्यवाअंशकेनवमांशेस्यात्तदारोहिणीदशाशुभापिकष्टास्यात्।मिश्रफलदाभवतीत्यर्थः।त्यक्त
मुच्चंयेनसतथाताद‍ृशेग्रहेदशावरोहिणीस्यात्।इयमशुभफलप्रदा।उच्चमित्रस्वराशीनांनवांशेयदित्यक्तोच्चोग्रहःस्या
त्तदावरोहिणीदशापिमध्यास्यात्।सदृष्टयुतस्फुरत्करबलिष्ठेष्टाधिकेग्रहेसतिदशाशुभास्यात्।सद्भिःशुभग्रहैर्दृष्टयुतः
सदृष्टयुतः।स्फुरन्तःकरायस्यसतथा।बलिष्ठःषड्रूपाधिकबलवान्।इष्टेनाधिकइष्टाधिकः अत्रकर्मधारयःसमासः।तदे
तदुक्तंबृहज्जातके।भ्रष्टस्यतुङ्गादवरोहसंज्ञामध्याभवेत्सासुहृदुच्चभांशे।आरोहिणीनिम्नपरिच्युतस्यनीचारिभागेषध
माभवेत्सा।लग्नदशायाःफलंतत्रैवोक्तम्।उभयेऽधममध्यपूजिताद्रेष्काणेश्वरभेषुचोत्क्रमात्।अशुभेष्टसमास्थिरेक्रमाद्धो
राया:परिकल्पितादशेति॥इदानींदशाक्रममाह॥ ॥स्यादाद्याहिदशाधिकौजसइहाङ्गार्काब्जकानांततस्तत्के
न्द्रादिषुजामथद्विबहवोवीर्यक्रमेणैवहि।चेदोजःसमतापुषोऽधिकतयायुस्तुल्यताचेद्दशामीढ्यात्स्यादुदि राम:
तक्रमात्क्रमविधौवीर्यंहितन्नोच्यते॥२०॥ अङ्गार्काब्जकानांलग्नसूर्यचन्द्राणांमध्येयेऽयायःकिंचिदप्यधिकषड् ८०

लैक्यस्तस्याद्याद्दशा स्यात्। बलसाम्ये यस्यायुर्वर्षाण्यधिकानि तस्य प्रथमा दशा। आयुःसाम्ये तु पूर्वं पठितस्य प्रथमाद
शा। लग्नार्कचन्द्राणां लग्नार्कयोर्लग्नचन्द्रयोर्वा बलायुषोः साम्ये लग्नस्य प्रथमं पठितत्वादाद्या दशा। सूर्येन्द्वोर्बलायुषो
स्तुल्यत्वे सूर्यस्य प्रथमा दशेत्यपि ध्येयम्। केचित्त्वार्क्के·न्दूदयानामिति पठन्ति। तदयुक्तम्। लग्नार्कचन्द्राणामिति क्र
मस्य सर्वैः पठितत्वात्। तथा च गर्गः। बली लग्नार्कचन्द्राणामिति। बृहज्जातके। उदयरविशशाङ्केति। लघुजातके लग्ना
र्कशशाङ्कानामिति। श्रीनाभेयपद्धतौ लग्नार्कशीतरश्मीनामिति। सारावल्याम्। लग्नार्कशीतरश्मीनामिति। होरामकर
न्दे। विलग्नार्केन्दूनामिति। श्रीपतिपद्धतावपि। लग्नादित्योडुपानामिति। एवं सर्वेषां प्रामाणिकरीत्या पाठक्रमात्तस्य
च बलायुःसाम्ये दशाक्रमनिर्णयप्रयोजकत्वाच्चाङ्गार्कीब्जकानामिति पाठः साधीयान्। अब्ज एवाब्जकः स्वार्थे कप्रत्ययः। ४८
ततोऽनन्तरं लग्नार्कचन्द्रान्यतमस्य यस्य पूर्वा दशा तस्मात्केन्द्रपणफरापोक्लिमस्थानां ग्रहाणां दशाः स्युः। केन्द्रस्थस्य पूर्वं
दशानन्तरं पणफरस्थस्यानन्तरमापोक्लिमस्थस्येत्यर्थः। अथ यदि केन्द्रादिगता द्वित्र्यादयो भवेयुस्तदा वक्ष्यमाणवी
र्याधिक्यशालिनो ग्रहस्याद्या दशा तदनन्तरं ततोऽल्पबलस्य तदुपरि तस्मादप्यल्पबलस्य दशा स्यादित्यर्थः। अथ रवीन्द्व
न्यतरस्याद्या दशा तदा तत्केन्द्रादिस्थलग्नस्यापि दशा स्यादिति बोध्यम्। बलसमत्वेऽधिकवर्षदातुः पूर्वा दशानन्तरमल्प

 वर्षे तत्तुद्दशा स्यात्। वर्षसाम्येतु मौढ्यात्तूर्यसं। विध्यवशेनास्तमनादुदितक्रमाद्दशा स्यात्। मौढ्यादितिस्व ब्लो पेपञ्चमी
 मौढ्यमंप्राप्येत्यर्थः। यस्येनास्तनभावेनास्तंप्राप्तस्यपूर्वमुद्गमस्तस्यपूर्वादशानन्तरोदितस्यानन्तरंदशा। अत्रोदयसाम्ये
उदितक्रमाल्लग्नार्कसोमावनिजबुधेत्याद्युक्तक्रमाद्दशा स्यादितिध्येयम्। सहजातकेवर्षसाम्येप्रथमोदितस्यप्रथमंद
शेत्युक्तंतत्रप्रथमोदितस्येतिसामान्यतःकथनमर्थद्वयलाभार्थम्। सूर्यवशात्प्रथममुदितःप्रथमोदितइत्येकोर्थः। प्रथम
मुदितउक्तइतिद्वितीयः। अनयोर्मध्येबहुसंमतत्वात्प्रथमपक्षोमुख्यइतरोगौणइत्याहुः। तत्रसूर्यवशादुदयसाम्येप्रथ
मपक्षेणनिर्णयासंभवेगौणपक्षेणनिर्णयोयुक्तएव। तथाचयवनेश्वरः। वयोधिकोयःप्रथमोदितोवाग्रहःसपूर्वंपठितो
दशेशः॥ अस्यार्थः। बलसमानतायांसत्यांयोवयसायुषाधिकःसपूर्वंदशेशः। यदिचायुःसाम्यमपितदासूर्यवशात्प्रथ
मोदितोयःसपूर्वंदशेशः। यद्युदयसाम्यमपितर्हियःपूर्वंपठितःसदशेशइति॥ अत्रेदमवधेयम्॥ चन्द्रस्याद्यायांदशा
यांकेन्द्रादिगानांलग्नार्कभौमगुरूणांबलायुषोःसाम्येलग्नार्कयोःसूर्यवशात्प्रथमोद्गमनलक्षणप्रथमपक्षस्यासंभवा
दपरपक्षाश्रयणेनलग्नस्यप्रथमोक्तत्वादाद्यादशाततोर्कस्यद्वितीया। भौमगुर्वोर्यःसूर्यवशात्प्रागुदितस्तस्यतृतीयाप
रस्यचतुर्थीदशा। उदयसाम्येतुगौणपक्षेणनिर्णयेप्राप्तेप्रथमंपठितत्वाद्भौमस्यतृतीयाचतुर्थीगुरोरिति। अतएवमिश्रो

कपदैवोक्तस्यापि साम्ये प्रथमोदितस्य लग्नार्कचन्द्रारबुधादिकस्येति। यत्तु मिश्रकृतश्रीपतिपद्धतिटीकायां लग्नस्य तृ
तीया चतुर्थी सूर्यस्येत्यादि दृश्यते तल्लेखकदोषात्पतितमिति ध्येयम्। इदं पुनरिहावधेयम्। यदि केन्द्रे कोऽपि न ग्रहस्त
दा पणफरस्थस्य पूर्वा दशानन्तरमापोक्लिमस्थस्येत्यादि। तदाह वराहः। न हि न फलविपाकः केन्द्रसंस्थाद्यभावे भव
ति हि फलपक्तिः पूर्वमापोक्लिमेऽपि॥ इदानीं लग्नदशाप्राथम्ये सति तत्केन्द्रादिगग्रहदशाक्रमावगमार्थं बलं साधयति॥
॥ ॥ चेल्लग्नाद्यदशा स्वभावजफलप्रोज्झासि पाकक्रमे ॥ ॥ भोज्झासि स्वषड्बलैक्यानि। पाकक्रमे इति निमि
त्तसप्तमी। पाकोदशा तत्क्रमनिमित्तं बलानि स्फुरितेऽर्थः। शेषं स्पष्टम्। अत्रोपपत्तिः। लाग्निकदशाप्राथम्ये लग्नाद्भावाः स
न्तीति लग्नात्केन्द्रपणफरादयो भावाः सिद्धा जातास्तथा सत्येको भावांशतुल्ये मुख्ये केन्द्रेऽन्यो गौणकेन्द्रे स्थित इति संपूर्ण ४
न्यूनभावफला त्रिकर्मा मुख्यं गौणकेन्द्रादिस्थित्या वचनाद्बलेन च दशाक्रमविचारे प्राप्ते समभावफलेषु सर्वेषु ग्रहेषु
यथास्थितबलेन निर्णयो यस्याधिकं बलं पूर्वं तस्य दशा ततस्तदूनबलस्येति। तत्र रूपतुल्ये समभावफले कल्पिते त्रानु
पातः॥ यद्यखिलखगानां रूपतुल्ये समभावफले ग्रहस्य तद्बलतुल्यं बलं तदमुष्मिन्भावफले किमिति स्वभावजफलप्रो
ज्झासिरुपपन्नम्। अथार्कस्य चन्द्रस्य वाद्यदशायां केन्द्रादिगदशाक्रमज्ञानार्थं वीर्यमाह॥ ॥ अर्केन्द्वोश्चेत्प्रथमा।

श्री म खगोदयबलाधिभैर्न्यवर्गैर्द्धितः॥ स्वैर्वर्गैश्च बले हि ताबलमिहैक्यम्॥ ॥ स्पष्टमेतदाकरे। अथैकदेशि
८२ मतमाह॥ ॥ मूलितैक्यं परे॥ ॥ परे आचार्या एवं वदन्ति मूलं संजातं येषां ते मूलितास्तदस्य संजातं तार
कादिभ्य इतजितीतच्। तादृशानां सप्तवर्गस्थानामङ्कानामैक्यं बलं स्यादिति॥ अथ प्रसङ्गे नरिष्टकररिष्टस्य बल
माह॥ ॥ अथैवं रिष्टस्य भङ्गे जेऽधिकबलो भङ्गस्तदा रिष्टहृत्॥ ३१॥ खगोदयबलाद्विरिलनेनैव प्र
कारेण रिष्टदभङ्गजे बले साध्ये इत्यर्थः। अत्र प्रगृह्यत्वाभावः प्रामादिकः। अतो रिष्टदभङ्गजे बहुबले इति पाठ्यम्। ए
वं रिष्टदभङ्गजे बले साधिते सतीति सप्तम्यन्तत्वेन यथाश्रुतमेव व्याख्येयमिति वा यदि रिष्टभङ्गः रिष्टकरापेक्षया
बहुवीर्यस्तदा रिष्टभङ्गः स्यात्। अयं मुख्यः पक्षः॥ यदा तयोर्बलसाम्यं तदानेन मुख्यपक्षेण निर्णयासंभवे पक्षान्तरेण
निर्णयमाह॥ ॥ भङ्गकृद्रिष्टकृतो हिताहितशुभासत्वं च नीचोच्चभास्ताद्यस्यास्य तां विचार्य मतिमान्रि
ष्टस्य भङ्गं वदेत्॥ ॥ भङ्गकृदर्थाद्रिष्टभङ्गकृत्॥ अत्र ढ्रलोपे पूर्वस्य दीर्घ इति सूत्रेण दीर्घत्वम्। अत्र वर्गद्वयध्या
हृत्वम्। नीचोच्चभास्तादय इत्यत्रादिशब्देन मूलत्रिकोणस्वाधिमित्रमित्रामित्राधिमित्रगृहजयपराजयोत्पातानां सं रामः
ग्रहः। मतिमानिति हेतुगर्भम्। तेनायमर्थः संपन्नः॥ रिष्टभङ्गे ग्रहयोर्वर्गराशिहोरादौ शुभासत्वं सौम्यपापसंबन्धित्वं त ८२

यास्वोच्चत्रिकोणस्वाधिमित्रमित्रवैर्यधिवैरिगृहजयपराजयोत्पातास्तनीचेषुसमाश्रितानांसंबन्धित्वंहिताहितत्ववि
शिष्टंविचिन्त्यम्।रिष्टेष्टभङ्गेशयोःसप्तवर्गेशान्सौम्यपापान्दर्शितस्वोच्चादिनीचान्तसमाश्रितांश्चेतेहिताएतेत्वहिता
इतिचिन्तयेदित्यर्थः।रिष्टेशभङ्गेशयोःसौम्यपापत्वचिन्तनंनवि यद्दर्शिततुङ्गादिनीचान्तसमाश्रयत्वंचहिताहितत्वेन
चिन्त्यम्।तथाचश्रीधरः।वर्गनाथान्विचिन्त्यादौसौम्यपापान्हिताहितान्।नीचोच्चगांस्तथान्यांश्चशोधयेत्तान्परस्पर
मिति॥अत्रसमस्यार्द्धमित्रत्वार्द्धशत्रुत्वेनहिताहितत्वसाम्यात्समोनगणनीयइतिप्रोचुः।एकेनशुभेनसमंमित्रमधिमि
त्रंच।एकेनपापेनसमानममित्रमध्यमित्रंच॥द्वाभ्यांशुभाभ्यांसमंत्रिकोणंस्वगृहंच।चतुर्भिःशुभैःसमानःस्वोच्चोयु 82
द्धजयश्च।चतुर्भिःपापैःसमोनीचस्थओत्पातिकोयुद्धजितोस्तंगतश्च।तथासतिरिष्टकरस्यसप्तवर्गेशानांसौम्यपाप
त्ववशेनस्वाधिमित्रादिगृहस्थितिवशेनदर्शितस्वोच्चादिवशेनचयाहितसंख्यायाचाहितसंख्यातयोरन्तरंकृत्वा
हितमहितंवाशेषंग्राह्यम्।एवंभङ्गेश्वरस्यापिहितमहितंवाशेषंग्राह्यम्।पश्चाद्रिष्टेशभङ्गेशयोर्द्वयोरपियदि
हितात्मकशेषंतदारिष्टभङ्गोयथारिष्टकर्तुरहितात्मकशेषाद्रिष्टभङ्गकर्तुर्हितात्मकेशेषेधिकेरिष्टभङ्गस्तथारिष्ट
हर्तुरहितशेषाद्रिष्टकरस्यहितशेषेधिकेरिष्टभङ्गोन्यथातुरिष्टमेवेत्यप्याहुः॥अथरिष्टकररिष्टहरबलानयनेताव

ग्र॰म॰ दुपपत्तिरुच्यते। वृद्धयवनः। हेतीपमृत्योर्बलिनस्तु वर्गे भङ्गस्तदारिष्टकराद्बली चेत्। रिष्टकर्तान्यूनबलस्य सप्तवर्गे
८३ न्यूनबलो रिष्टकर्तुरपेक्षया रिष्टहर्ता बलिनः सप्तवर्गे बलाधिकस्तदारिष्टभङ्गोऽन्यथा तु रिष्टमेव॥ अयमर्थः रिष्टकर्तान्यू
नबलस्य राशौ न्यूनबलस्तथा न्यूनबलस्य होरायां न्यूनबल इत्यादि तदपेक्षया रिष्टभङ्गकर्ता बलिनो राशौ बली तथा बलि
नो होरायां बलीत्यादि। अत्र प्रागुक्तयवनवाक्ये सप्तवर्गे द्विवर्गात्मकत्वमित्यष्टौ वर्गास्ततो रिष्टेशभङ्गेशयोर्बलमष्टसु स्था
नेषु साध्यं तत्र द्वे स्थाने गृहसंबन्धिनी षट्स्थानानि होरादिसंबन्धीनि। अत्र रिष्टेशभङ्गेशयो द्वयोरपि सप्तवर्गेशबला
नां साम्ये यथास्थितसत्त्वं द्वर्गेशबलेन निर्णय इति स्थितौ सुगमार्थमष्टतुल्ये समबले पूर्वस्थापनेन साकमेकक्रमला
भार्थं कल्पिते त्रैराशिकम्। द्वयोरपि वर्गेशानां सर्वेषामष्टतुल्ये समबले स्थिते यदि राशीशस्याष्टतुल्ये समबले राशि
स्थबलतुल्यं बलं तदास्मिन् राशीशबले किमिति राशिस्थबलं राशीशबलेन गुणनीयमष्टभिर्भाज्यमेवं राशिसंबन्धि
द्वितीयस्थानस्थबलं राशिनाथबलेन गुणनीयमष्टभिर्भाज्यमनयोर्योगे राशिस्थबलमेकस्थानस्थमेवं राशीशबले
न गुण्यं चतुर्भिर्भजनीयमित्युपपन्नम्। एवं होरादिस्थबलं होरादीशबलेन गुण्यमष्टभिर्भाज्यमित्युपपन्नम्। यद्वा राम॰
द्वयोरप्यष्टस्थानस्थे तुल्ये समबले स्थिते यदि राशिस्थे समबलेऽष्टतुल्ये राशीशबलतुल्यं बलं तदस्मिन् राशिबले किमिति ८३

सरांचराशिस्थराशीशबलघातोष्टभक्तोनिष्पन्नइत्यनयोः पक्षयोर्नकोपिविशेषइतिमिश्राः। पश्चादेषामेकं सर्वब
लमितियुक्तम्। यत्सर्वबलमधिकं तन्मूलमप्यधिकमितिसर्वबलस्यमूलग्रहणेनकापिहानिः। यत्तुप्रत्येकंमूलमा
दायतदैक्यंसर्वबलमितिमतंतन्निर्मूलत्वादुपेक्ष्यम्। किंचयत्ररिष्टहर्तुर्बलयोगाद्रिष्टकर्तृबलयोगोधिकस्तत्ररिष्टह
र्तुर्बलमूलयोगाद्रिष्टकर्तृबलयोगःस्वल्पइत्यादिदूषणंधीमद्भिरवलोक्यम्। यत्तुश्रीपतिनेष्टकष्टगुणितबलयोरन्त
राद्बलमित्युक्तंतत्रमतस्तथासतिरिष्टकरस्यभङ्गकरस्यवाबलपूर्णपदोच्चचेष्टाबलयोगोरूपंतदेष्टकष्टबलयोः साम्या
दन्तरबलेशून्येसर्वबलस्यशून्यत्वात्सद्बलपूर्णोपिग्रहोरिष्टकर्तारिष्टहर्तावानस्यात्। स्वप्राचीनश्रीधराचार्यविरो 83
धश्च। अन्यान्यपिदूषणानिश्रीकेशवप्रणीतटीकातोऽवसेयानीतिसंक्षेपः। अथशुभासत्त्वमित्याद्युदाह्रियते। तन्ने
दंसप्तवर्गचक्रंग्रहाणाम्। अथरिष्टकर्ताभौमस्तत्रतुःशुभात्मकस्तोच्चस्थएकशुभात्मकमित्रगृहस्थःपञ्चसंख्याकसौ
म्यवर्गस्थोभौमस्तोरेष्यचन्द्रएकशुभात्मकमित्रगृहस्थोभौमत्रिंशांशेगुरुरेकशुभात्मकाधिमित्रगृहस्थइतिशुभा
त्मकयोगेहितसंख्याजाता १२। एवंभौमोद्विसंख्याकपापवर्गस्थोभौमराशीशःशनिरेकपापात्मकशत्रुगृहस्थोभौम
द्रेष्काणादित्रिकस्वामीशुक्रश्चतुःपापात्मकास्तंगतश्चतुःपापात्मकनीचस्थश्चभौमद्वादशांशेबुधश्चतुःपापात्मका

स्तोमत्वेद्विगुणात्मकस्वगृहस्येतिद्विपापात्मकइतितद्योगेजाताचाहितसंख्या २८। हितसाहितसंख्ययोरन्तरे ५। प
महितात्मकंभौमस्य १७। एवंरिष्टहर्तुर्गुरोर्हिताहितसंख्ये १२।८ अनयोरन्तरे शेषंहितात्मकंगुरोः। अत्ररिष्टकर्तु
र्भौमस्याहितशेषाद्रिष्टहर्तोगुरोर्हितशेषमल्पमित्यरिष्टमेव। अत्रेदमवगन्तव्यम्। यत्रोच्चत्रिकोणस्वगृहं च प्रा
प्तं स्यात्तत्रोच्चमेवग्राह्यम्। यत्रतुत्रिकोणस्वगृहे प्राप्ते स्यातांतत्रमूलत्रिकोणमेवग्राह्यम्। अत्रतुस्वोच्चाधिमित्रगृ
हादिकंत्रिकोणाधिमित्रगृहादिकंवाप्राप्तंतत्रबाधकाभावात्तत्फलमपिग्राह्यमिति। अथकेन्द्रादिगेषुसमवी
र्येषुयदैकोबलिनः सप्तवर्गेन्योनिर्बलस्सप्तवर्गेतदानयोः पौर्वापर्येणदशाक्रमनिर्णयेन्यायेपूर्ववदिष्टस्थान
स्थंबलंतत्तद्वर्गेशबलगुणितमेषांयोगेपूर्ववत्सर्वबलंसिद्धम्। शेषोपपत्तिः सुन्दरमिश्रमवलोक्येतिसंक्षेपः
॥ ॥ येष्टरिष्टहतौदशाक्रमदहौजः श्रीधराद्योदितंकष्टेष्टघ्नबलान्तरात्क्वचकृतंतद्युक्तिशून्यंत्वस
त् ॥३२॥ व्याख्यातचरमेतत्॥ इदानीमन्तर्दशानयनमाह॥ ॥ अर्द्धस्यैकभगस्त्रिकोणगृहगस्त्र्यंश
स्यचास्तिनगांशास्यांघ्रिश्चतुरस्त्रगोनिजगुणैः पत्त्यैकभेस्याद्बली। अंशादौकुरुरूपमत्रसमतांकृत्वा
चन्द्रांशांघ्रिदामंशघ्नाःस्वदशाः पृथक्खलुलवैक्याप्ताः स्युरन्तर्दशाः॥३३॥ मूलदशापतेरेकभगस्त्वरा

शिस्योग्रहोनिजगुणैःस्वीयगुणैःएरोहावरोहोच्चनीचेष्टकष्टादिभिरूर्ध्वसपक्षापाचकोभवति।त्रिकोणगृहगोनव
मपञ्चमस्थानस्थस्त्र्यंशस्सपक्षःस्यात्।अस्तेसप्तमेवर्तमानोग्रहोनगांशस्यपाचकः।चतुरस्रगश्चतुर्थाष्टमस्थानस्थः
अङ्कप्रेश्चतुर्थांशस्यपक्षाभवति।मूलदशापतेरितिसर्वत्राध्याहर्तव्यम्।अत्रग्रहइत्युपलक्षणंतेनलग्नस्याप्यन्तर्द
शाभागित्वमितिविमिश्राः।वराहमिहिराचार्योऽपि।सहोराश्चैवंपरस्परगताःपरिपाचयन्ति।गर्गोऽपि।लग्नेनसहिताःस
र्वेह्यन्योन्यंफलदायकाइति।बृहज्जातकटीकायामुत्पलोदाहृतमेवतत्स्वनराजकृतयवनजातकेलग्नादशाजीवदशा
प्रयातादत्तेनराणांसुधनानिसौख्यम्।सत्सङ्गनरेन्द्रैःगविवेकताचेत्येवमादिफलमपिलग्नान्तर्दशासंभवंगम्यतिते ८५
नसर्वेऽपत्येषुग्रहःपाचयतीतिग्रहस्यव्यापृतस्यान्तर्दशापाचकानलग्नमितिप्राचीमतंपरास्तम्।एकभेएकरा
शौनवमपञ्चमान्यतरस्मिन्सप्तमचतुर्थाष्टमान्यतरस्मिन्वायदिद्विप्रभृतयोग्रहाभवेयुस्तदातन्मध्येयोनन्तरराशी
वत्तीर्यवान्सएवपक्षःस्यात्।अत्रगुणाकरः।एकोर्वेपदिभूयांसःसंभवन्तिनभश्चराः॥एकएवतदातेषांदद्यादन्तर्द
शांबलीति॥अत्रयुक्तिमाहभट्टोत्पलः।सर्वग्रन्थेषुएकःपंगस्त्रिकोणगृहगइत्येकवचननिर्देशाद्यएकोबलीसएवा
न्तर्दशाभागीति।अत्रेदंचिन्त्यम्।यद्येकवचननिर्देशादेकस्यैवान्तर्दशापाचकत्वंतर्हिनवमपञ्चमस्थितयोर्मध्येए

श्री·म· कस्यैवान्तर्दशापाचकत्वं स्यात्। न चेष्टापत्तिः अपसिद्धान्तात्। तस्माद्युक्त्या एकस्यान्तर्दशेति न साधु। किंतु वचना
८५ द्वि। तत्राचमयः। एकर्क्षोपगतानां यो भवति बलाधिको विशेषेण। एकः स एव हर्ता नान्ये तत्र स्थिता विहगा इति। व
स्तुतस्तु। बहवश्चेत्तु ते खिलाः केन्द्रादिगा ग्रहाः सर्वे ददत्येवापहृत्य चेति पराशरोक्तेरन्तर्दशाप्रदा स्युरिति चतुर्णामे
कराशिसंस्थानाम्। बन्धनविनाशदैन्यविद्यासशुभग्रहाणां त्विति सारावल्यामुक्तत्वान्निकृष्टार्थप्रतिपादकवरा
हादिभिरेकराशिगानामेकोंऽशं हरति बलीत्यादिषदनुक्तत्वाद्दर्शितमयवचनस्य चक्रार्द्धहानिगुणकविषयकत्वा
दैकभस्थित्रिकोणगृहग इत्याद्याम्नातैकत्वस्योद्देश्यविशेषणत्वेन ग्रहैकत्ववदविवक्षितत्वाच्चैकराशिगाः सर्वेऽपि अन्त
र्दशापाचका इति। अतोऽत्र पक्षैकभे ते खिला इति पठितव्यम्। एकभे वर्तमानास्ते ग्रहा अखिला अपि फलकाराः स्युरित्य
र्थः। नन्वमम वाक्यादेकस्यैवान्तर्दशाप्रदत्वं शङ्क्यम्। तस्य चक्रार्द्धहानिविधायकहरनिर्णायकत्वादित्युक्तम्।
हर्तेति पदाम्नानसामर्थ्यात् अन्यथा एकः स एव दातेति वदेत्। बहवश्चेदित्यादिपराशरवाक्यस्यायमर्थः। चेदे
कभे बहवो ग्रहाः स्युस्तदा ते खिला अपि यथोक्तं भागं मूलदशापतेरपहृत्य स्वभागं ददतीति प्रयच्छन्ति। अत्राखिला राम:
इत्युक्तेऽपि पुनः सर्वे इति पदोपादानं सर्वेऽपि अन्तर्दशापाचकाः स्युर्नत्वेक इति दार्ढ्यार्थम्। ननु भवन्तु नाम समेऽपि ८५

प्यन्तर्दशाप्रदाः कानोह्यमिनिस्तथाप्यन्तर्दशाक्रमः कथं स्यादित्यतो विशेषणद्वारेणाह॥ केन्द्रादिगा इति। एकराशिगा
नामध्येयः सर्वाद्यदशाप्रदेर्लग्नार्काब्जान्यतरस्मात्केन्द्रगास्तस्य प्रथमान्तर्दशा। तदनन्तरं पणफरस्थस्य तदनन्तर
मापोक्लिमस्थस्य केन्द्रगेषु बहुषु यस्य दशाक्रमवीर्यं बहु तस्याद्यान्तर्दशानन्तरं तदूनबलस्य एवं पणफरापोक्लिम
स्थेष्वपि बलसाम्ये बहूनां स्तुः क्रमेणायुःसाम्ये प्रथमोदयक्रमेण तत्साम्ये प्रथमोक्तक्रमेणान्तर्दशा स्यादित्यर्थः॥ सर्वाद्य
दशापतेस्त्वन्तर्दशाप्यस्य प्रथममन्तर्दशास्यैव कार्या। तेन यस्य पूर्वं दशा तस्यान्तर्दशापि पूर्वमेवेति दशाक्रमादन्तर्द
शाक्रमः स्यादिति भावार्थः। अत्र बहुषु एकराश्या पाठात्पाठक्रमादन्तर्दशाक्रमः स्यादित्येके। दशाक्रमादन्तर्दशेत्यन्ये। 95
त्रिकोणयोश्चतुरस्रयोरेकभे सप्तमे वा बहुषु सत्सु पाठक्रमेण निर्णयासंभवे दशाक्रमवशेन निर्णय इत्युभयोः पक्ष
योः समुच्चयो न तु बाध्यबाधकभाव इत्यपरे॥ अत्र ब्रूमः॥ ॥ मूलपाकपतिः पूर्वं ददात्यन्तर्दशां ततः। दशाक्रमवशाद
न्ये दद्युरन्तर्दशां ग्रहाः॥ इति भगवद्गर्गवाक्यात् केन्द्रादिगा इति प्राग्दर्शितपराशरवाक्यात्तथा केन्द्रादिदायगस्य तु सर्व
स्य नाकद्युसदां बलानि तद्वत्समान्यधिकं हि यस्य। द्युचारिणस्तस्य दशाप्रमा स्यादन्तर्दशा वा विदशा द्वयावेति श्रीप
त्याचार्यके स्वदशाक्रमवशादेवान्तर्दशाक्रम इति। दायगस्य तु सर्वस्य सहगस्य दलं भवेत्। सुतधर्मगयोस्त्र्यंशः पादं स्म

ग्रै·मं तिसुखस्थयोः। सप्तांशः सप्तमस्यस्य प्रक्रियाप्यधुनोच्यत इति पराशरजातके दशार्द्धमेकगेहयस्त्रिकोणगो गुणांशक
८६ मा सुखेष्टमेषु गांशकं नगांशमस्तभस्थित इति ज्ञातुगिपद्धतौ तथा अर्द्धतृतीयमर्द्धञ्च तथार्द्धसार्द्धसप्तमंभागम्। एकर्क्षे
नवपञ्चमचतुर्थनिधनर्क्षसप्तानामिति भट्टोत्पलोदाहृतसत्याचार्यवाक्ये त्रिभागभागी च त्रिकोणसंस्थ इत्यादियवने
श्वरवाक्ये च पाठभेददर्शनात्सर्वग्रन्थेष्वेकरीत्यापाठात्पाठक्रमेणान्तर्दशाक्रम इति पक्षो न चारुचातुरीगोचरः। अत
एव समुच्चयपक्षोऽपि न रमणीयः। किञ्च यदि पाठक्रममेवैपर्य्यमियात दशादन्तर्दशाक्रमः स्वीक्रियते तदा सर्वत्रैकव
चननिर्देशादेकराशिगानामेकस्यैव बलिष्ठस्यान्तर्दशास्त्वित्यनिष्टापादनम्। ननु तथापि पाठक्रमादन्तर्दशाक्रम इ
ति पक्षस्य बहुसंमतत्वादनेन दशाक्रमवशादन्तर्दशाक्रम इत्येकसंमतपक्षस्य बाध इति चेन्न। यतसंप्रस्थानां न
पश्यतीतिन्यायादेकेनापि गर्गवाक्येन बहूनामिदानींतनग्वाक्यानामन्धस्थानीयानां प्रतिबन्धसंभवात्। तस्माद्द
शाक्रमवशादन्तर्दशाक्रम इति गर्गेणाकण्ठरवेणोक्तत्वादत्रभवतोत्पलेनाप्यस्यैवाङ्गीकरणाच्चायमेव पक्षो ज्याया
नित्यस्मद्गुरूणां मतम्॥ ॥ अंशादाविति॥ ॥ स्पष्टं समच्छेदविधानं लीलावत्याम्। अन्योन्यहाराभिहतौ हरांशौ रा ग्र·मः
श्योः समच्छेदविधानमेवमिति। स्वदशेत्यत्र स्वशब्देन मूलदशापतिः। अत्रोपपत्तिः। येऽन्तर्दशापाचका अर्द्धन्यादयो ८६

शयंशघ्नाशास्तज्जन्यान्तर्दशायोगो दशातुल्य इति तावत्स्वसिद्धम्। तस्माद्दशायोगेन दशातुल्यान्तर्दशा लभ्यत इति निष्प
न्नं तत्र सदृशच्छेदानामंशानां योगेऽन्तरं वा कार्यमित्युक्तेः छिदां समतां कृत्वेत्युपपन्नम्। अत्रोदाहरणम्। अंशाः
समच्छेदीकृता एते अथानुपातः। यद्यंशयोगेनानेन $\frac{२१}{२१}$ दशातुल्यान्तर्दशा तदा पृथक्
पृथगंशकैः कियन्त्यन्तर्दशेति। अत्र सच्छेदांशगुणदशायां सच्छेदांशयोगेन ह्रियमाणा
यां छेदं लवं च परिवर्त्येत्यादिना दशायां छेदो गुणो हरश्च तुल्यत्वात्तयोर्नाशो भविष्यतीति प्रागेव छिदां नाशं कृत्वेत्यपि सा
धूक्तम्। एवं छेदापगमे कृतेंऽशघ्ना स्वदशांशयोगेन भाज्यान्तर्दशा स्यादित्युपपन्नम्। इदानीं प्रत्यब्दमासद्युनिशाघटी
जन्यसूक्ष्मफलज्ञानार्थं विदशादिसाधनमाह॥ ॥ इत्याभ्यो विदशास्ततोऽप्युपदशास्ताभ्यश्च सूक्ष्मं फलम्॥ ॥
इत्यमुना प्रकारेणाभ्योऽन्तर्दशाभ्यो विदशाः साध्याः। अयमभिसन्धिः। अन्तर्दशा एव दशाः कल्प्याः। अन्तर्दशापतिर्दशा
पतिः कल्प्यः। ततोऽन्तर्दशैकभगदृत्याद्युक्तप्रकारेणान्तर्दशामध्ये विदशाः साध्या इति तथा विदशां दशां विदशापतिं दशेशं
च प्रकल्प्य विदशामध्ये उपदशाः साध्याः। एवमग्रेऽपि द्रष्टव्यम्। तथा सति सूक्ष्मं फलं स्यादित्यर्थः॥ अथान्यदाह॥ ॥ प
क्षांशोनदिनहृत्यं तु कलयेत्तासुः कृतं दृश्यते॥ पक्षैः खेटलवान्तरेण च भवेन्मासान्तरं चासुपः प्रोक्तैर्वेस्तुद

द	स	त्रि
१	१	१
१	७	३

२१	३	७
२१	२१	२१

शादिलग्नजफलं तेभ्योतिदृग्भ्यो नमः ॥ ३० ॥ एककलातुल्येन ग्रहान्तरेण यदि नवांशकलाभि २०० रेकं वर्षं त
दैककलया किमित्यनुपातेनायुष एकं दिनमष्टाचत्वारिंशत् घटिकाश्चान्तरं पतति। ब्रह्मसौरार्यादिभिः पक्षे ग्रहा
णां भागाद्यमन्तरमस्ति। तेनायुर्दायस्य मासाद्यन्तरं स्यात्। किंच जन्मकालस्य पलमात्रान्तरेण लग्ने षट्कला अन्तरं ते
न च दशादिनान्यायुषोन्तरं पतति। एवमायुषोन्तरे संजाते दशाप्रवेशस्यान्तरं स्यात्। तथा सति तत्कालीनलग्नफलं यैरा
चार्यैः श्रीपत्यादिभिरुक्तं तेभ्योतीतदृग्भ्यो नमोस्त्विदमुपहासः। यद्यपि यन्त्रैः स्पष्टतरोत्र जन्मसमयो वेद्योत्र खेटाः स्फुटाय
त्वसेहि घटन्वेतत्से कार्या इति प्रागुक्तमस्ति तथाकृते आयुषोन्तरमपि न पतति तथापि यदि जन्मकालग्रहादिसाधनं
स्पष्टतरं न क्रियते तदैवादृशमन्तरं पतति तस्मात्स्पष्टतरं तत्साधनं कार्यमिति शिष्यावधानार्थमेतदुक्तमिति बोध्यम्॥ अत
एव दशाप्रवेशकालीनलग्नसाधनं वदति॥ ॥ शाकोब्दाजनिमध्यमार्कभमुखं मासादितद्युग्दशाब्दाद्यं तत्र
शाके समादितरणिर्मध्योदशादौ भवेत्। घस्रीभूतदशाऽथक्त्रिकु १३ हृता खाङ्काष्ट ८९० हृत्तद्युता सास्या
त्तावनिका दशाब्दफलयुक्तद्युकृज्जनिद्युव्रजः ॥ ३५ ॥ तस्मात्तावयवाङ्गणात्त्वकरणात्साध्याद्दशादौ खे
गाः क्षेपान् जन्मखगात्प्रकल्प्य यदि वा साध्या दशा सावनात्। ते स्पष्टाश्च विधिपिश्वसंक्रमवशान्मासो दशादौ

ततः पूर्वोक्तं जडकर्म चात्र तु मया तल्लाघवं दर्शितम्॥ ३६॥ ॥ शाकर्क्षाब्दाः कल्प्याः जनिमध्यमार्क
राश्यादिकं मासादिकल्प्यम्। तेनाब्दादिना युक्तं दशाया अब्दाद्यं कार्यम्। एवं कृते यः शक उत्पद्यते यच्च राश्यादि तत्र श
के सराश्यादितरणिर्मध्यो दशादौ भवेत्। तत्र शके सराश्यादि सूर्यो मध्यमो यस्माद् भवति तदा दशाप्रवेशाद् इत्यर्थः। ए
तदुक्तं भवति। जन्मकालीनशके जन्मकालिकरवौ सर्वाद्यदशापतेर्लग्नसूर्यचन्द्रान्यतरस्य दशाप्रवेशः। तदनन्तरं तत्रा
ब्दमासादौ सर्वाद्यदशेशदशाब्दाद्यं योज्यं तदग्रिमदशाप्रवेशः स्यात्। एवमग्रेपि यद्दशावर्षाणि योज्यानि तत्तदग्रिम
दशाप्रवेशः स्यात्। एवं सामान्यतो दशाप्रवेशज्ञाने तात्कालिकमासाद्यानयनार्थमाह। घस्रीभूतदशेति। दशावर्षाणि
द्वादशगुणानि तल्लस्यमासयुतानि मासाः स्युः। तान् त्रिंशता संगुण्य तत्र दिनानि योज्यानि सा घस्रीभूतदशा भवेत्। सा
ष्टयकृस्यात्र यो दशागुणास्वाङ्काष्टभि ८९० र्भक्ता लब्धेन दिनाद्येन षष्ट्यकृस्या युक्ता कार्या। दशाब्दतुल्यैः पलैश्च युक्ता का
र्या सा सावनदिनात्मिका दशा भवति। तया सावनदशया युक्युक्तः जन्मकालिकोऽहर्गणः कार्यः। स दशाप्रवेशेऽहर्गणो
भवति। जन्मदिनजार्कोदयिकोऽहर्गणोऽर्कोदयाद्गतनाडीपलयुतो जन्मकालिको द्युव्रजो भवतीति ध्येयम्। द्वितीयादि
दशासावनयुतो द्वितीयादिदशाप्रवेशकालिको द्युगणस्तृतीयादिदशाप्रवेशकालिको भवतीत्यपि द्रष्टव्यम्। तस्मा
त्तात्पयवादहर्गणात् जन्मकाले यस्मात्करणाद् ग्रहाः साधितास्तत्करणोक्तप्रकारेण दशाप्रवेशे खगाः साध्याः॥ विधा

न्तरमाह। क्षेपान्जन्मखगांश्च प्रकल्प्येति। दशासावनदिनान्यमेवसावयवद्युगणंप्रकल्प्यजन्मकालिकंचरदेशान्तराद्य
संस्कृतमध्यग्रहतुल्यंक्षेपंचप्रकल्प्यस्वकरणाद्ग्रहाःसाधनीयाः। परमत्रदशासावनंजन्मकालादारभ्यव्यतीतदशा
सावनोपेतंग्राह्यमितिबोद्धव्यम्। यद्वाकेवलदेशस्यसावनतुल्याहर्गणात्पूर्वदशाप्रवेशकालिकखगान्क्षेपान्प्रकल्प्य
ग्रहाःसाध्याइत्यपिद्रष्टव्यम्। ततःपक्षत्रयेणापियेसाधिताग्रहास्तेलङ्कापूर्वक्षितिजासन्नप्रदेशमध्यार्कसंबन्धकाल
द्वास्तवदशाप्रवेशनाडीतुल्ये नेहसिजाताअपेक्षितास्तुस्वदेशस्पष्टार्कोदयकालदशाप्रवेशनाडीतुल्येकालइत्युद
यान्तरचरदेशान्तरभुजान्तरसंस्कृताःकार्याः। संस्कारस्तुदिनार्द्धतुल्याभीरात्र्यर्द्धतुल्याभिर्वानतघटीभिरेताश्चरकला
स्तद्देशनतघटीभिःकिमित्यनुपातलब्धकलाभिःकार्यइत्याहुर्भोष्यकृतः॥ अथतेग्रहाःस्पष्टाःकार्याः। ततःस्फुटार्के
न्दुभ्यांविरविचन्द्रलवारविहृताइत्यादिनातिथिश्चसाध्या। तस्याघटिकाद्यंदशाप्रवेशकालिकरवीन्दुभ्यांसाधित
त्वाद्दशाप्रवेशकालादनन्तरंस्यात्ततोदशाप्रवेशनाडीमुखेनसंस्कृतंसूर्योदयाज्जायतइतिधीमद्भिरवलोक्यम्। या
तिथिरानीतासायदिपञ्चदशभ्योन्यूनातदाशुक्लपक्षोन्यथाकृष्णपक्षइतिज्ञेयम्। संक्रमवशान्मासोज्ञेयः॥ ॥ अत्रे
दमवधेयम्। स्पष्टसूर्यस्यभुक्तांशानांभोग्यानांचांशानांकलाःस्पष्टगत्याभक्तालब्धदिनादिद्वयेनदशाप्रवेशकालात्प्रा

गूर्ध्वं चक्रमेण पूर्वापरसंक्रान्ती भवतः। ततो यस्मिन्दशापतावधिके मासि कृष्णप्रवृत्तिस्तत्र यदि मेषसंक्रमणं तद
सचैत्र एवं वृषादिसंक्रमणे वैशाखादिसंज्ञा। यदा तु पूर्वसंक्रान्तिः पूर्वदर्शान्तात्प्रागपरसंक्रान्तिरग्रिमदर्शान्तादनन्त
रं भवति तदासौ संक्रान्तिमासोऽधिमासोऽग्रिममासनामा भवति। यद्वा संक्रान्तिद्वयं तन्मास एव तदा क्षयमास इति ॥
॥ प्रथमपक्षेऽहर्गणः सप्ततष्टः करणादिवाराद्गतो वारो भवेत्तन्नाडिकाद्यमेव सूर्योदयादिष्टकालः। द्वितीये अहर्गणो
जन्मनाडीपलयुतः सप्ततष्टो जन्मवाराद्गतो वारस्तदधःस्थनाड्याद्यमेवेष्टकालः। तृतीये द्युगणः पूर्वदशाप्रवेशनाडी
पलयुतो द्वितष्टः पूर्वदशादिवाराद्गतो वारोऽधःस्थनाडीमुखमेवेष्टकालः। प्रथमपक्षे जन्मकालिकसूर्यसिद्धान्ताहर्ग ४
णे यदि दशासावनं योज्यते तदाहर्गणनाड्योरान्त्यर्द्धेनोनाः सूर्योदयादिष्टकालः स्यादिति वर्षैः श्रीपत्यादिभिर्यु
गार्कचन्द्रैर्युगसूर्यसावनद्युत्यादिना जडकर्म कृतम्। अत्र तु मया तत्स्थाल्लाघवं दर्शितम्। यावद्दशादिस्थमात्रं
पूर्वोक्तत्वादन्यथाप्युक्तमित्युक्तं तदापात इति वेदितव्यम्। अत्रोपपत्तिः॥ वर्षायनर्तुयुगपूर्वकमत्र सौरादित्युक्ते
र्दशादिवसाः कृतास्ते तु सौरा एव। अथ तेषां सावनीकरणमन्तरेण दशाप्रवेशकालिकलग्नादिसाधनं न प्राप्यत
इति सावनीकरणार्थमुपायः। तत्रैते सूर्यसिद्धान्तमते युगसावनाः १५७७९१७८२८ सौराश्च १५५५२०००००० एषाम

ग्रै॰म॰ न्तरम् ।२२७१७८२८॥ अथानुपातः। यदि युगसौरदिनैरेभिः १५५५२००००० सौरापस्यासावनेष्वेतावदाधिक्यं
८९ २२७१७८२८ लभ्यते तदेष्टैः किमिति। अत्र गुणकत्रयोदशांशेन १७४७५२५ गुणके पवर्त्तिते त्रयोदश लब्धाः १३ त
थाते नैव हरे पवर्त्तिते किंचिन्न्यूनाः स्वाङ्काष्टौ ८९० लब्धास्ते संपूर्णा गृहीताः। तस्मादुपस्थीभूतदशाधिकहतात्स्वाङ्काष्ट
भक्ताल्लब्धेभ्यः सावनेभ्यः सौराणां न्यूनत्वात्पक्षस्याघस्थीभूतदशायुक्ताकार्येत्युपपन्नम्। परमत्र हराधिक्ये फलाल्प
त्वनियमात्स्वाङ्काष्टहरस्याधिकस्योपादानाद्युगसौराः एषकस्यास्त्रयोदशघ्नाः स्वाङ्काष्टभक्ताल्लब्धान्विता युगसावने
भ्योल्पा जायन्ते षां युगसावनानां चान्तरमेतत् १४२३॥ अथ यदि युगसौरवर्षैः ४३२०००० इदमन्तरं १४२३ तदेष्टैः किमि
ति फलस्य दिनात्मकत्वाद्दिनात्मकं फलमायास्यति। तत्र दिनघटीस्थाने शून्यमेवोपलभ्यत इति पलात्मकं फलानय
नार्थं षष्टिवर्गो गुणः ३६०० अस्यान्तरस्य च वधे जात इष्टवर्षाणां गुणः ५१२२८०० हरश्चायं ४३२०००० स्वल्पान्तरमनयो
रूपेस्य नाशे कृते दशावर्षतुल्यान्येव पलानीत्युपपन्नम्। पूर्वं साधितसावनेष्वेतावन्न्यूनमासीदतो योज्यमित्यपि साधु।
पूर्वदशाप्रवेशकालीनमध्यमार्कः पूर्वदशामासादितुल्यराश्यादियुतः पूर्वदशासावनोत्थमध्यमार्कजन्मकालीनम राम:
ध्यार्कयोगतुल्यापरदशाप्रवेशजमध्यार्केण यथा समो भवति न तथा स्पष्टार्क इति मध्यमार्क एव दशामासादियोजने ८९

युक्तम्। शेषोपपत्तिः सुगमा बालावबोधाच॥ इदानीं दशाशुभाशुभफलमाह॥ ॥ चन्द्रः प्राप्तदशेश्वरस्य सुहृदुच्च
स्वर्क्षसंस्थो दशानाथाद्धीनवमसप्तमोपचयगो दद्याच्छुभानीति च। यस्मिन्भेऽत्र विधुः स जन्मनि तनुस्वाम्यादि
भावो यदा तत्तद्वृद्धिकरोऽथ तत्क्षयकरः प्रोक्तेतरस्थानगः॥ ३७॥ प्राप्तदशायाः स्वामिनो यन्मित्रगृहमुच्चं वा त
त्रस्थश्चन्द्रः शुभानि दद्यात्। अथवा कर्कटस्थश्चन्द्रोऽथवा दशेशात्तत्काशात्पञ्चमनवमसप्तमतृतीयषष्ठदशमैकादश
स्थानान्यतरस्थानस्थः शुभानि दद्यात्। एवं शुभफलप्रदे चन्द्रे सति अत्र दशाकाले यस्मिन् राशौ चन्द्रः स राशिर्जन्मका
ले यस्मिन्भावे पतितस्तद्भाववृद्धिकरो भवति। एतदुक्तं भवति। यदि चन्द्राधिष्ठितराशिस्तनुभावे स्यात्तदा शरीरसौख्यं
यदि धनादिभावे तदा धनादिसौख्यमिति। यदि तु शत्रुमृत्युव्ययभावेषु स्यात्तदा तद्भावनाशः। सत्वः कथयति विपरी
तं रिःफषष्ठाष्टमेष्विति वराहवचनात्। यदि प्रोक्तान्यस्थानस्थश्चन्द्रः स्यात्तदा तदधिष्ठितराशिर्यस्मिन् लग्नादिभावे
तन्नाशः स्यात्। अरिमृत्युव्ययस्थो यदि स राशिस्तदा तद्भाववृद्धिः॥ अथान्यदाह॥ ॥ यद्द्रव्यं स्वचरस्य भावगृहहर्म्यो
ग्रादि सर्वं फलं योज्यं वृत्तिकृतिर्बलादिह दशायां चाथ योवैरयुक्॥ पापः पापदशां विशेत्स च विपत्कृत्तीथ
तद्वद्वृद्धस्तकाले बलवान्खगः शुभसुहृद्दृष्टेष्टषड्वर्गगः॥ ३८॥ खचरस्य यद्द्रव्यं ताम्रसा मणि मेत्यादि

श्री·भ· केकथितं तत्सर्वं दशायां योज्यं। तथा भावफलदृष्टिफलराशिफलादिकं सर्वं फलजातं दशायां योज्यं। वृत्तिकृति र्जी
९० विका। अयं देवदत्तः केन कर्मणा जीवनं करिष्यतीत्यादिरूपा दशायां योज्या नन्वेतत् कथं योज्यमित्यत आह। बला
दिति सकलेयश्चेर्कफलं संपूर्णमध्यबलेमध्यं हीनबलेतिस्वल्पमित्यर्थः। अथानन्तरं वैरेण युक्तः शत्रुरितिय
वत्। क्रूरस्य मूलदशापतेः शत्रुर्यदि क्रूरो मूलदशायामन्तर्दशां करोति तदा विपत्तिः स्यात्। अत्रायमभिसंधिः। यदि
क्रूरः क्रूरदशामध्येन्तर्दशां कुर्यात्तदा विपत्तिः स्यात्। यदि त्वन्तर्दशाकारको ग्रहः पापो मूलदशापतेः शत्रुस्तदा महती
विपत्तिः। यथोक्तं सारावल्याम्। क्रूरदशायां क्रूरः प्रविश्य चान्तर्दशां कुरुते। पुंसां स्यात्संदेहस्तदारियोगे सदैव महानि
ति वैरियुगित्यपपाठः। अथैतद्दशारिष्टस्यापवादं वदति। तद्भङ्ग दद्रिति। अन्तर्दशाकाले कश्चित्बली ग्रहः शु
भमित्रेण दृष्टोथवा शुभस्य षड्वर्गगो यद्येष्टाधिकः स रिष्टभङ्गः स्यात्। तथोक्तं सारावल्याम्। प्रवेशे बलवान् खेटः शु
भमित्रैर्निरीक्षितः॥ सौम्याधिमित्रवर्गस्थो मृत्युकृन्न भवेत्तदेति। अथाष्टवर्गफलस्य स्वल्पत्वाधिकत्वकल्पना
विचारमाह॥ ॥ खेटस्तस्य यदष्टवर्गजफलं पूर्णं शुभं जन्मतस्त्विन्दोर्वृद्धिषु च स्वभोच्चभसुहृद्भस्व राम:
त्रिकोणेस्थितयः॥ दुष्टं मध्यफलं विपर्ययगतस्यानिष्टमस्तकुटं शस्तं स्वल्पतरं खगस्य च वदेत् ज्ञात्वा ९०

बलं तत्त्वतः ॥ ३९ ॥ जन्मतन्विन्द्वोः वृद्धिषु स्वभोच्चभसुहृद्गृहत्रिकोणे चयः खेटः अस्ति तस्य यच्छुभमिष्टव
र्गफलं तत्पूर्णं स्यादित्यन्वयः । तनुश्चेन्दुश्च तन्विन्दू जन्मनि तन्विन्दू तयोः जन्मलग्नजन्मराश्योरित्यर्थः । वृद्धिषूप
चयभवनेषु । स्वभं च उच्चभं सुहृद्गृहं त्रिकोणं चेत्येषां समाहारद्वन्द्वः । स्वराशौ स्वोच्चे स्वमित्रगेहे स्वमूलत्रिकोणे इत्यर्थः ॥
अथ तादृशग्रहस्य दुष्टं मध्यफलं स्यात् । दुष्टं फलं मध्यं स्यादित्यर्थः ॥ विपर्ययगतस्य जन्मराशिजन्मलग्नयोरपच
यस्थाने शत्रुनीचभे शत्रुभे वा स्थितस्य ग्रहस्यानिष्टफलमप्युक्तं स्यात् । शस्तं समीचीनं फलं स्वल्पतरं स्यात् । अत्र जन्म
लग्नराश्योरुपचयस्थस्य सतः शत्रुनीचभस्थितस्याथवा तयोरपचयस्थस्य सतः स्वोच्चादिषु स्थितस्य शुभमशुभं समं
स्यात् ॥ एवं जन्मलग्नराश्योरेकस्मादुपचयस्थोऽन्यस्मादपचयस्थो यदि स्वभोच्चादिष्वस्ति तस्य शुभमधिकमशुभम
ल्पं स्यात् । यदि तादृशो नीचारिभेऽस्ति तदा तस्याशुभमधिकं शुभं न्यूनं स्यादिति ध्येयम् । खगस्य बलं तत्त्वतो ज्ञात्वा फ
लं वदेत् । यो ग्रहे संपूर्णबले शुभमशुभं च फलं संपूर्णं मध्यबले मध्यं हीनबले हीनमित्येतत्प्रथममवधार्यानन्तरं प्रोक्त
प्रकारेण न्यूनत्वाधिकत्वं वाच्यमित्यर्थः ॥ अथोदर्कस्य बहुविधत्वात्कालस्य दुर्लक्ष्यत्वात्कविज्ञातकफलस्याभि
चारिकं कर्तव्यमित्याह ॥ ॥ जीवेत्क्वापि विभङ्गरिष्टजशिशुर्भूरिष्टं विनामीयते याद्योऽब्दः शिशुदुस्तरोऽपि च परो

ग्रं॰ कार्येषु नोपपत्तिका॥ कार्यप्रश्ननिमित्तपूर्वशकुनैरसन्त्वमानं धिया होराज्ञेन सुबुद्धिनात्र बहुधा यादृक्केस्यका
८१ लोक्यते॥४०॥ क्वापि विगतेभङ्गो यस्य तादृशं यद्रिष्टं तत्र जातः शिशुर्जीवेत्। अत्र ढ्रलोपे पूर्वस्य दीर्घोण इति सू
त्रेण दीर्घत्वम्। क्वापि दृश्यते रिष्टं विनापि शिशुः मीयते प्राणैः विमुज्यत इत्यर्थः। मीङ् हिंसायाम्। हिंसात्र प्राणवियोगः॥
दिवादिभ्यः श्यन्। मीयत इत्यस्य मरणार्थत्वं चकत्वमाख्यातचन्द्रिकायामप्युक्तम्। परेति प्रेति मरणे म्रियते च
प्रमीयते। संतिष्ठते सुमाप्नोति विरमत्यारमत्यपीति॥१॥ केचित्तु मृङ् प्राणत्याग इति धातोर्म्रियत इति रूपमत्र पठ
न्ति। तदसत्। दीर्घस्यासंभवात्। म्रियत इति पाठे तु छन्दोभङ्गः। तस्मान्मीयत इत्येव पाठः साधीयान्। क्वापि विभङ्ग
रिष्टजशिशुरिष्टं विना मीयते इति। तत्र फलस्य व्यभिचारदर्शनात् सुबुद्धिना होराज्ञेन जन्मकालं सूक्ष्मतरं सम्यग्लक्षयि
त्वा धिया बुद्ध्या होराग्रन्थान्मुहुर्मुहुर्विलोक्य शुभं विज्ञाय पत्रिका कार्येत्यन्वयः। वस्तुतस्तु रिष्टजशिशुजीवनं प्रबलं भङ्गं
विनानुपपद्यमानं भङ्गाभावेपि भङ्गमाक्षिपति। यद्यपि शास्त्रे पुरुषेण भङ्गो नोपलभ्यते नैतावता शास्त्रदोषः। न ह्ययं स्था
णोरपराधो यदेनमन्धो न पश्यतीति न्यायात्। न च प्रत्यक्षेण शास्त्रेऽनुपलभ्यमानोपि रिष्टभङ्गः कथं कल्पनीय इति वाच्यम्। रामः
अधुनातनप्रचरद्वस्थग्रन्थेष्वनुपलब्धोप्यप्रचरद्वस्थगर्गादिप्रणीतगुरुजातकशास्त्रे भविष्यतीत्यवश्यं फलक ८१

स्यनेस्य मुक्तत्वात्॥ अन्यथा शास्त्रप्रामाण्यविलयापत्तेः। एवं रिष्टानुपलम्भेऽपि मरणे रिष्टफलबलात्कल्प्यं तथा सति शा
स्त्रप्रामाण्यमव्याहतमेवेति बोध्यम् । अथ घोब्दः शिशोर्दुस्तरः अपि च परौ द्वौ द्वितीयतृतीय
वर्षौ दुस्तरौ। अतः पत्रिका नो कार्या॥ आदिमवर्षत्रयेऽत्तावधिकानि। रिष्टानि संध्या यदि मदोऽधिति होरापापैर्भान्तगतैर्मरणाये
त्यादिना बहूक्तानि एवं द्वितीयतृतीययोरपि बहूनि कथितानि सन्ति तेषां सर्वेषां प्रचरद्वस्थग्रन्थेषु भङ्गानामसत्त्वेवात
तदनेकरिष्टतद्भङ्गकृदूहप्रबलदुर्बलभावेन रिष्टतद्भङ्गान्यतरनिर्णयस्य दुर्गमत्वाद्वर्षत्रयपर्यन्तं पत्रिका न कार्या॥
वर्षत्रयानन्तरं तु अल्परिष्टोक्तेस्तद्भङ्गानामधुनातनग्रन्थेषु सत्त्वात्स्वल्पत्वेन तन्निर्णयस्यापि कर्तुं शक्यत्वाच्च वर्षत्रयान
न्तरं जन्मपत्रिका कार्येति भावः। अथ यदि कश्चिदाग्रहशीलो वर्षत्रयमध्य एव पत्रिका कार्येति वदेत्तदा प्रश्ननिमित्तपूर्वशा
कुनैः प्रश्ने निमित्त पूर्वैर्लग्नबलोपलब्धस्त्याद्यैः शकुनैश्च यदि वा प्रश्नैर्निमित्तपूर्वैः सुतदुर्वचनादिभिः शकुनैः पूर्णकुम्भादिभिश्च शु
भं ज्ञात्वा पत्रिका कार्या ननु प्रश्ननिमित्तशकुनाद्यन्यतरेणैव शुभं विचिन्त्य पत्रिका कार्येति लाघवादाचार्यस्य वक्तुमुचितं त
[illegible] त्रयेणैव शुभं विचार्य कार्येत्युक्तमित्यत आह। बहुधोदर्कश्च कालो बलीति। बहुप्रकारं भाविफलं बलवदित्यर्थः। तथा चा
[illegible] निमित्तं शकुनाः स्वकर्म शारीरमागन्तुकमद्भुतानि। दोषाभिचारग्रहचारकालकाम्यानि चैवं त्रिविधः फलाप्त्यै॥ एवं

श्री० जा०
८२

कौ॰ मार्गाणां बहुलाहृद्‌प्रकारैः शुभं विज्ञाय पत्रिकाविधातव्येति भावः। रक्ष्यस्वमानमिति। प्राचीनगर्गादिग्रन्थानामु
पलब्धेः इदानीन्तनग्रन्थेतु सकलारिष्टतद्भङ्गानामसत्वादिदमिदमेव भविष्यतिनो चेत् मयायज्ञोपवीतं त्याज्यमित्यादिप्र
णप्रतिज्ञां कार्यां किंतु प्रचरद्भिरस्य ग्रन्थपर्यालोचनयैतादृशमस्तीतिवाच्यमिति भावः। अत्र संरक्ष्यमानं निजं होराज्ञेन
विपाठ इत्यत्रानन्ययारक्षस्वमानमित्यस्यानिराकांक्षत्वानन्वयादनन्वितमपार्थकमित्यपार्थकता। कचित्तु स्वके
न्त्रात्स्वमानं प्रीतिविपाठे द्रक्ष्यते सतु नितरां साधुः स्वमानं त्रात्रारक्षतेत्यर्थः। कचित्तु मानं प्रियारक्षतेति पाठः सोपि साधी
यान्॥ अथग्रन्थालङ्कारमाह॥ ॥ नन्दिग्रामे केशवो विप्रवर्यो योभूद्धोराशास्त्रसंघं विलोक्य॥ तेनोक्तं यं पद्ध
तिर्जातकीया चक्रे रिंशद्वृत्तबद्धा सुबोधा॥४१॥ स्पष्टार्थम्॥ इदानीं ग्रन्थपाठकफलावाप्तिव्याजेन ग्रन्थप्रशंसामनु
प्रकरन्साह॥ ॥ये सुबोधां पठन्तीमामप्यां जातकपद्धतिम्॥ होराविल्पदवीं यान्ति लोके मानं यशः सुखम्॥४२॥
सुगमम्॥ ॥गो॥ तस्मुत्तरतीरवर्तिनगरे गोलत्रविद्युते गोलग्रामसमाहूये मुनिभरद्वाजान्वये दैववित्॥ योभूत्तु ज्ञदिवाकरो बुध
कः श्रीकेशवोस्मात्मजो दैवज्ञार्यगणेशसंज्ञकगुरोर्लब्धावबोधोशकः॥१॥ तस्मान्महेशार्चनलब्धसौख्यः श्रीकृष्णनामाजनि ए.अ.
निविप्रमुख्यः॥ कालत्रयज्ञानवताहि येनदैवज्ञशब्दोभुवि सार्थकोभूत्॥२॥ तस्माद्भूतां तनयौ तदाद्यो मीमांसकाद्यो ८२

प्रौ.म.
टी.३

गणको नृसिंहः॥ शिरोमणेर्वार्तिकमुक्तियुक्तं सौरं च भाष्यं समकारि येन॥३॥ सिद्धिर्यया राजमानः सुखदलितपरोद्दण्डचण्डाभिमा
नः सिद्धान्ताभिज्ञसुज्ञद्विजवरनिवहोद्गीतकीर्तिः सुमूर्तिः॥ विद्यामासाद्य यस्माद्दिवि दधति विबुधाचार्यकस्पर्द्धिभावं हृष्यन्तो यस्य
शिष्याः स जयति जगति श्रीशिवाख्यो द्वितीयः॥४॥ श्रीमन्नृसिंहसुतवर्यदिवाकराख्यः सत्सङ्कृते गणककेशवनिर्मितायाः॥
टीकामिमां विविधयुक्तिविशेषरम्यामाज्ञां शिवस्य सुगुरोः कृतवानवाप्य॥५॥ पूर्वोक्तिविश्वासवतां प्रतीतिर्नेतन्निरासे न वि
नाप्यतः स्यात्॥ अतो मया खण्डि पुरातनोक्तिर्गरूपमेभ्योस्तु नमो महद्भ्यः॥६॥ दोषेषु बद्धहृदयाः खलता नितान्तमुष्ट्रावलीढ
पिचुमन्दककण्टकादौ॥ सन्तः प्रशान्तहृदयास्तु गुणान्भजन्तः कुर्वन्तु मद्गणितिषु प्रकटं गुणोघम्॥७॥ मानंदि विप्रवरता
मपि भूर्युपेत्य ज्योतिर्ज्ञसंनिधिमिलत्सुरभानुभावः॥ तेजः प्रसन्नतरसाधुतमोहरागो भास्वान्विभातु स शिवः सकलैकमित्रः ९
॥८॥ अर्यहृवाची भास्वान् श्रीसूर्यः शिवो मद्गुरुः शेषं स्पष्टम्। शाके गजाम्भोधिशरेन्दु १५४८ तुल्ये सिद्धान्तविद्वोढमनो
रमाख्यो दिवाकरोऽबुधकेशवोक्तेर्वृत्तिः सयुक्तिः समगात्समाप्तिम्॥९॥ इति श्रीसकलगणकचक्रचूडामणिश्रीकृ
ष्णदैवज्ञसुत श्रीमन्नृसिंहगणकस्य सुतेन संप्रदायप्रवर्तकाचार्यश्रीमत्पितृव्यशिवज्योतिर्विल्लब्धविद्येन दिवाकरेण विरचिता
यां श्रीमत्केशवसांवत्सरोक्तजातककर्मपद्धतेष्टीकायां सवासनायां प्रौढमनोरमाभिधायां ग्रन्थः समाप्तिमलङ्कारः॥

3610

विबोधयन्निराकुर्वन्नविद्यातिमिरं सदा।

इतिकेशवीयाजातकपद्धतिःप्रौढमनोरमासहितासमाप्ता॥

सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः॥